Digitized by Arya Samaj Foundation

Digitized by Arya Samaj Foundation Chennai and eGangotri

080533

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080533

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

Vol. XIX, No. 1] [May, 1936.

१८५८ शकीये वैशाखे ...-वर्षस्य १म-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती मातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः —

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्

श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Just out! Just out!! Just out!!!

Sanskrit Sahitya Parishad Series No. 20.

BHĀṢĀRATNAM

OF

Kaṇāda Tarkavāgīśa.

—:o:—

Edited with a New Commentary, an important Introduction, and a separate chapter on the explanation of some technical terms of the Nyāya and Vaiśeṣika Philosophy, etc.

BY

Pandit Kalipada Tarkacharyya,

Professor of Nyāya, Government Sanskrit College, Calcutta.

—:o:—

Price { *for members—Rs. 3/-*
for others—Rs. 3-8 as.

To be had of—

THE SANSKRIT SAHITYA PARISHAD,
17, R. G. Kar Road, Shyambazar,
CALCUTTA.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

May, 1936.	१८५८-शकीये वैशाखे १९श-वर्षस्य १म-संख्या	Vol. XIX No. 1

श्रीहनुमत्प्रसादस्तोत्रम्

[निबन्धकः—आर. रङ्गाचार्यः शिरोमणिः]

विलासो वैदेहीहृदयकमलोन्मीलनकला
विदग्धो वाचां यः समभवदशोकावनितले ।
प्रमाद्यल्लङ्केशस्मयविदलनोद्दाममहिमा
स दद्यादस्माकं सुरभिरिह वाचां मधुरताम् ॥१॥

त्विषामीशं देवं वियति समुदञ्चत्स्वकिरणं
सुरद्रोर्मन्वानः फलमिति परीपाकमधुरम् ।
ग्रहीतुं तं मातुर्बहिरवतरन्नेव जठरात्
समुद्युक्तो योऽभूत्स वितरतु धाटीं मम गिराम् ॥२॥

तुरासाहि स्तोकं चरितवति यस्मिन्नविनयं
जगत्सर्वं स्तब्धं बधिरमथ कुर्वाणमवशम् ।
समाधातुं क्रुद्धं कति कति समीरं स्तुतिगिरः
समन्ताद्वैधात्र्यो दिवि समुदिता नः स शरणम् ॥३॥

तपस्तप्त्वा तीव्रं जगति शरदां यच्छतमहो
सुराणां सर्वेषां समभिलषितं चाप्यसुलभम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदस्मिन ब्रह्मास्त्रं समजनि यथा कुण्ठितबलं
नमस्तस्यै शक्त्यै प्रणतजनगत्यै भवतु मे ॥४॥

पुरस्तादुल्लोलोच्चलदलघुवीचीतरलितं
पयोधिं संवीक्ष्य द्रुतगलितधैर्ये कपिकुले ।
जजृम्भे गम्भीरा तनुरधिमहेन्द्रक्षितिधरं
यदीया स श्रीमान् भवतु मम भव्याय महते ॥५॥

महावेगे तस्मिंस्तरति जलधिं साह्यविधये
समायाताः केचिन्नपरिगणिताः कार्यवशतः ।
विनश्यद्विश्वासे मरणशरणे दुर्गतजने
सुखं वा दुःखं वा किमु कलयते कार्यपरता ॥६॥

गभीरप्रोन्मीलन्नतवलितनाभीविलसितं
मदोच्चल्लोलंवद्युतिरुचिररोमावलियुतम् ।
समुन्मीलत्सान्द्रत्रिवलिजितगङ्गाम्बुललितं
नताङ्गीवृन्दं को भवति विमुखो वीक्ष्य यद्दते ॥७॥

स्फुटन्मल्लीमालाकलितकवरीभाररुचिराः
समभ्युद्वक्षोजद्वयविहतकोकीमदभराः ।
समृध्यत्तारुण्या निशि विवसना वीक्ष्य युवती-
र्विना तं धीराग्र्यं जगति गणयेत्तुच्छमिह कः ॥८॥

त्रिलोकीकल्याणी त्रिषवणपराणामभिमता
त्रयीवेद्यास्तुल्या त्रिदशपतिसन्त्राणनिपुणा ।
दिदीपे शाखेव क्षितिनिपतिता प्रोन्नततरो-
रशोकोद्याने यन्नयनशुभदा दीप्तिकलिका ॥९॥

"दयासारद्रोणी दरदलितपङ्केरुहरुचि
शरज्ज्योत्स्नाधारा शमधनजनानन्दजननी ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अशोकोद्यानेऽर्चिः कलितकरुणा काऽपि शुशुभे
यदग्रे कल्याणी कलयतु स नः कामितमिह ॥१०॥

समुत्साहं ब्रूमः कथमिव कपीनां यदुदिते
समुत्कण्ठा सर्वंकषमहिमगम्भीरवचसि ।
अहो दृष्टा सीतेत्यमृतरसनिष्यन्दमधुरे
विषीदद्बालानामिव स जयतान्मातृवचने ॥११॥

यदानीते सान्द्रस्फुरदनुपमानन्दलहरी
पयो धेनोर्वत्सेऽस्रवदिव जगन्मूर्तिहृदये ।
स देवीमूर्धालङ्करणमहिते दृष्टिविषये
मणौ स्ताद्भद्राय प्रणतजनचिन्तामणिवरे ॥१२॥

जयतु जयतु रम्यं ब्रह्मचर्यस्य भाग्यं
जयतु जयतु देव्या अञ्जनायाश्च भाग्यम् ।
जयतु च रघुवीरे भक्तिमद्भागधेयं
जयतु विशरणानां पक्त्रिमं भागधेयम् ॥१३॥

"तलक्काडू" रङ्गनाथेन कृतं स्तोत्रं हनूमतः ।
भूयाद्भूत्यै रसविदां भक्तिभाजां हनूमति ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीन-शिक्षापद्धतिः *

[निबन्धकः—श्रीश्रीराम-शास्त्री]

धर्मोऽर्थः कामो मोक्षश्च—एते चतुर्वर्गाः, एतेषां साधनमेव पुरुषार्थ-सिद्धिः। तत्रादौ धर्मशब्दस्योपन्यासाद्धर्म एव प्रथमतः सेव्यस्ततश्चार्थः। यदि तावदेवंक्रमेण धर्मसेवानन्तरमर्थः सेव्यते, तर्हि स एवार्थो धर्मानुबन्धी भवतीति धर्मसम्बद्धतया तथाविधादर्थात् कामोऽपि मोक्षानुकूलो भवति, ततश्चातिदुर्लभोऽपि मोक्षः सुलभः स्यात्। यद्यप्यर्थमन्तरेणापरेषां त्रयाणां वर्ग्याणां मध्ये नैकतमोऽपि निष्पद्यते, क्वचिदल्पतया क्वचिद् बहुलतया वा त्रिवर्गसाधनविषये अर्थस्य प्रयोजनं भवति, तथापि स एवार्थस्त्रिषु वर्ग्येषु हेय इति शास्त्रकारैर्बहुधा गीयत एव, न केवलं गीयते, कार्यतोऽप्यर्थान्न प्रति यथेष्टं समादरस्तैर्न क्रियत इति शास्त्रकृतामृषीणामनुष्ठानपरम्परया स्पष्टमेव प्रतीयते। किन्त्वधुनाऽस्माकं शिक्षादोषेण धर्मादर्थस्य गरीयस्त्वं दृश्यते, तत एव पुरुषार्थसाधने सुमहान् विपर्यासः सञ्जातः। वयन्तु चतुर्णां वर्ग्याणां मध्ये वर्णाश्रमभवनस्य भित्तिस्थानीयं धर्मं दूरे

---

* प्रबन्धोऽयं कलकत्तातोऽचिरनिर्गतायां साप्ताहिक्यां "देववाणी" पत्रिकायां क्रमशः प्रकाशितोऽभूत्, किन्त्वस्माकमसौभाग्यवशादसमाप्त एव निबन्धे तत्पत्रिकासम्पादकः कृष्णचन्द्रः सहसाऽन्तर्धानं गतवान्; कृष्णविरह-विधुरा सापि देववाणी द्युनिवासभूयमनुप्राप्ता। अधुना बहूनामन्तेवासिनामनु-रोधेनात्र संस्कृतसाहित्य-परिषत्पत्रिकायां पुनः स प्रबन्धः क्रमशः प्रकाशयिष्यते। "देववाणी"पत्रिकायां प्राकाश्यमुपगतमंशं परिहृत्य यदि ततपरत एव प्रकाश्यते, तर्हि परिषत्पत्रिकापाठकानां महदसौकर्यं भवेदिति कृत्वा पुनः प्रथमत एव प्रकाश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिहृत्य अर्थत एवापरेषां वर्गाणां सेवने सम्यक् प्रवृत्ताः, अत एवास्माकं कामोऽपि प्रायेण कलुषितो भवति, अत एव मोक्षो हि सुदूरपराहतः, संसारश्च दुःखाकरीभवति। भोगार्थिनां विषयिणां वार्त्तयाऽत्र नास्ति समधिकप्रयोजनं यतस्ते भोगभूमावेतावदेवाग्रेसरा अभवन्, येन तेषां प्रत्यावर्त्तनमापाततोऽसम्भवतयाऽलीकमिवानुमीयते, किन्तु ये तावदिह संस्कृतसेविनो ब्राह्मणास्ते यदि प्राचीनवर्त्मना ऋषिवृत्तमनुसृत्य च संस्कृतशिक्षायां सर्वथा प्रवर्त्तेरन्, यद्यर्थं कामञ्च हेयत्वेन परिकल्प्य केवलं धर्म-मोक्षयोः साधने सम्यक् यतेरन्, तर्हि आदर्शं प्राप्य क्रमशः सर्व एव तथाविधं प्रयत्नं कर्त्तुं शंक्नुवन्त्येव, "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति श्रीमद्भगवद्-गीतोक्तेः। वयं ब्राह्मणाः, विशेषतः पूर्वमस्माकं पूर्वजा भुवि देववद्व्यवहारं कुर्वन्तो भूदेव इत्याख्यां लब्धवन्तः, अत एव "ब्राह्मणस्य तु देहोऽयमपि भोगाय नेष्यते" इति मनुस्मृतिमनुसरद्भिरस्माभिर्भूदेवत्व-मायत्तीकर्त्तुं येनाऽऽचरणेन शक्यते, तथाविधाचरणमेवास्माकमवलम्ब-नीयम्।

भो भोः सुरसरस्वती-सेवका विद्यार्थिनः, अवश्यमेव भवद्भिरिद-मनुश्रूयते यत् "देवो भूत्वा देवं यजेत" इति, दैवी वाक् संस्कृतं नाम, एवञ्च देवत्वमन्तरेण सा दैवी वाणी न सम्यक् सेवनीया भवति, तन्नाम देवत्वं भूदेवत्वमेव, तच्च सम्यक् साधनायत्तं, साधनन्तु ब्रह्मचर्यादिस्वीकाररूपो धर्मः। किन्तु ब्रह्मचर्यशब्दमात्रेण शङ्कां मा कुरुत तत्तु "दीर्घकालं ब्रह्मचर्यम्" इत्यादिवचनरचनया ऋषिभिः कृपया कलौ सङ्कुचितम्, तेन सा भीतिः परिहर्त्तव्या। अध्ययनार्थं गुरुगृहे वासो गुरुसेवा यथाविधि सन्ध्यावन्दनादीनामनुष्ठानमेवं तत्सहकृतं संस्कृताध्ययनम् एतैरेव विधिभिरस्माकं ब्रह्मचर्यपरिपूर्त्तिर्भवेत्, अपितु एवम्भूतमेव ब्रह्मचर्य-मस्माकं प्राचीनचतुष्पाठीशिक्षासमाजे सुबहुकालं व्याप्य प्रचलति, अत एव ब्रह्मचर्यविषये एतदेव यथेष्टं मन्यते मनीषिभिः। एवंविधया व्यवस्थयाऽस्माकमध्ययनं भवति चेत् स्वल्पेनाप्यशनेन, यथाप्राप्तेन वसनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येन केनचिच्छयनीयेन च जीवनयात्राशिक्षा भवितुमर्हत्येव, आशास्महे च तेनार्थस्यापि पिपासा कदापि न वर्द्धितुं पारयतीति।

अत्र सुमहानेको दृष्टान्तः समापतति मनसि यत्—पूर्वमासीन्नवद्वीपनगरे रामनाथो नाम कश्चिन्नैयायिकप्रवरः, स तु महाभागो बहुभ्यश्छात्रेभ्योऽन्नं दत्त्वा निरन्तरमध्यापनव्रतमाचचार। एकदा तस्यैतावता गुणेनाऽऽकृष्टो नवद्वीपपतिः श्रीमन्महाराजः कृष्णचन्द्रस्तत्साक्षात्कारार्थं तद्गृहमुपागतवान्, दृष्टवांश्च तस्य बहुशो दारिद्र्यलक्षणम्। न्यायशास्त्रानुशीलनेन प्रथितस्य नवद्वीपस्य नृपतिर्न्यायानुरक्ततया नैयायिकभाषया तमपृच्छत् "अधुना कस्मिन्नपि विषये भवतः काऽप्यनुपपत्तिर्विद्यते न वा?" अत्रानुपपत्तिशब्दस्यार्थाभाव एव तस्य राज्ञस्तात्पर्यम् आसीत्, किन्तु पण्डितराजस्य रामनाथस्य हृदये अर्थाभावविषयिणो काऽपि वार्त्ता न स्थानमलभतेति स यथाश्रुतमर्थमादायोत्तरमदात्—"अपरा काऽपि नानुपपत्तिर्मे विद्यते, केवलं शिरोमणिटिप्पण्यामेकत्र काचिदनुपपत्तिरासीत्, सा-त्वद्यैव मया मीमांसिताऽभूत्, ततश्चाधुना काऽपि मे नानुपपत्तिर्विद्यते।" तच्छ्रुत्वा राजा तं मनसा बहुशोऽभिनन्द्य ऋजुनैव मार्गेण पृष्टवान्—'कोऽप्यर्थाभावोऽस्ति वा?' तदाकर्ण्य पण्डितः प्रत्युक्तवान्—"अभावः स्वभावो वा, तन्नाहं जाने, तन्मे पत्नी जानाति" इत्युक्त्वा पाठगृहसन्निहितमेकं तिन्तिडीवृक्षं दर्शयित्वा तेन सह वाङ्निष्पत्तिः कृता। राजा तु प्रश्नानुपृच्छिकयाऽन्येभ्यो ज्ञातवान् यत केवलं तिन्तिडीपत्रशाकयुक्तेनान्नेन सच्छात्रस्य तस्य जीवनयात्रानिर्वाहो भवतीति।

अस्माभिरेवमनुश्रूयते यत्—प्रीतिप्रसन्नो राजा प्रासादं निर्माय तत्र तं प्रतिष्ठाप्य "ब्रह्मत्रा"दिदानेनाप्यायितुकामो बहुशः प्रार्थयामास, किन्तु निरीहः स ऋषिकल्पः पण्डितोऽर्थस्यानर्थकारितया तं प्रत्याख्यातवान्। अहो एवम्भूतं भूदेवं कुक्षौ धृत्वा क्षितिर्धन्या।

एतादृशस्य अध्यापकस्य सविधे ये छात्राः शिक्षिता भवेयुस्तेषां हृदये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विलासव्यसनं न कदापि प्ररूढं भवति, यथाप्राप्तेनाप्यर्थेन ते संसारयात्रां निर्वाहयितुं पारयेयुः।

एतदर्थं प्रमाणतयाऽस्माभिरुल्लिख्यते यदस्माकं पूर्वजा अत्यल्पेनाप्यर्थेन होलाकोत्सवं दुर्गोत्सवं पितृमातृश्राद्धादि वर्णाश्रमोचितं सकलं कार्यजातञ्च सम्पादितवन्तः, आनुषङ्गिकतदवशेषभोगेन दीर्घायुष्कतां प्राप्तवन्तश्च। वयन्तु तथाविधदारिद्र्यशिक्षारूपं ब्रह्मचर्यं वर्जयित्वा वैदेशिकशिक्षया प्रभूतधनार्जनसमर्था अपि दूरे आस्तां सत्क्रियाजातं सुखेन जीविकामपि कर्त्तुं न शक्नुमः, यथेष्टाहाराभावेन च दीर्घायुषोऽपि न भवामः।

एतस्मादधिकम् अपरं दुःखं यत्—काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम्—अधुना विजातीयशिक्षया नापि भृतिप्राप्तिर्घटते नवा ज्ञानार्जनस्य आनुकूल्यं जायते, प्रायेण जना "इतो नष्टस्ततो भ्रष्टः कर्मकारहकारवत्" भवन्ति, अत एव विद्यार्थिनो विदांकुर्वन्तु यत्—धर्ममोक्षोपयोगिनीः संस्कृतशिक्षाः परिहाय अर्थमरीचिकामोहेन भवद्भिर्न मरुभूमिर्गन्तव्येति।

(२)

संक्षेपतः संस्कृतविद्यार्थिनां कर्त्तव्यविषये कथञ्चिदुपादिष्टमस्माभिः। अस्मिन् प्रबन्धे अस्मद्देशीया प्राचीनसंस्कृतशिक्षापद्धतिः कीदृशी आसीत्, सम्प्रति लुप्तप्राया सैव प्रदर्श्यते। तत्रादौ ब्राह्मणबालकानां वर्णज्ञानात् पूर्वमर्थाद् वाक्स्फूर्त्तेरनन्तरं पञ्चाब्दपर्यन्तं या नाम मौखिकी शिक्षा प्रचलिता आसीत् तस्या एव विवरणं क्रियते।

अस्याः शिक्षायाः समयः सायंसन्ध्यावन्दनानन्तरं निरूपित आसीत्। गृहकार्यव्यपदेशाद्गुरुजनानां दिवसे समयाभावः, अपि तु क्रीडाकौतुकरतानां बालकानां दिने अनभिरुचिरत्र निदानम्।

निर्वर्त्तितनिखिलगृहकृत्यः कृतसन्ध्यावन्दनश्च पिता रात्रौ कुमारं क्रोडे कृत्वा स्नेहसिक्तभाषया तमभिभाषते—वत्स, यन्मया कथ्यते जिज्ञास्यते वा, तत् कथय, समर्थश्चेदुत्तारय। पितुरङ्के स्थित एव ऊर्द्ध्ववदनो बालक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तद्वदने प्रसारितदृष्टिः स किं कथयति तदर्थं शिष्टवदभिनिविष्टो यदा आस्ते, तदा तत्प्रश्नः पाठना च ।

पिता । किन्ते नाम ? तत् कथय । अनधिगतनाम्नः स्वनामकथनासमर्थस्य शिशोस्तूष्णीम्भावमनुभूय पिता तं वाचयति—"कथय कुमार ! श्रीमधुसूदनदेवशर्मा" इति । बालकोऽपि अविकलं कथयति श्रीमधुसूदनदेवशर्मा इति । अपूर्णेन्द्रियशक्तेः शिशोर्यदि जिह्वाजाड्याद् दन्तोष्ठयोरप्यपुष्टतया संयुक्तवर्णस्य कस्मिंश्चिदंशेऽस्पष्टता जाता, तदपि पुनर्जिज्ञासया वाचनया वा यावत् स्वरतो वर्णतो वोच्चारणस्य परिपूर्त्तिर्न भवेत्, तावद् जिज्ञासां वाचनाञ्चासकृत् चालयित्वा बालको यथा परिशुद्धतयः क्षिप्रतया च स्वनाम सम्यक् कथयति, पित्रा तथा यत्नः क्रियते । इत्थमेकदिनमेव तस्य स्वनामशिक्षणे सम्यक् कथने चातीतं भवेत, अथवा बुद्धिमतां मेधाविनां वा बालकानां द्वितीयादिप्रश्नेष्वपि तद्दिन एवोत्तरमायत्तीभवत्येव । यातु तावत, अतः परं स्वनामकथनसमर्थस्य शिशोरन्तिके पितुः प्रश्नः ।

पिता । त्वं कस्य पुत्रः ? पूर्ववत् पितृतः प्राप्तोपदेशः शिशुः प्रभाषते—अहं श्रीभवानीप्रसादभट्टाचार्यमहाशयस्य पुत्र इति । पुत्रस्य यथायथं नामशिक्षाप्राप्तिपर्यन्तं पितुः प्रयत्नो दिवसे रात्रौ वा यथावसरं प्रचलति । दिग्दर्शनार्थमनयोः प्रथमद्वितीययोः प्रश्नोत्तरयोः प्रकारः प्रदर्शितः, अतः परं प्रश्नोत्तरच्छलेन पितुः पुत्रस्य च जिज्ञासोत्तरयोर्निर्यास एव निरूप्यते । बाहुल्यभीतिरत्र हेतुः ।

पिता ।—त्वं कस्य पौत्रः ?

बालकः ।—अहं पशुपतिभट्टाचार्यमहाशयस्य पौत्रः ।

पिता ।—त्वं कस्य प्रपौत्रः ?

बालकः ।—अहं प्रमथनाथभट्टाचार्यमहाशयस्य प्रपौत्रः ।

एवंक्रमेण पितृकृत्यादौ नितान्तप्रयोजनतया पिण्डसम्पर्कपर्यन्तं त्रैपुरुषिकं नाम सावधानतः शिक्षयति, अतः परं शिक्षयति च मातामहप्रमातामह-वृद्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमातामहानां नामानि। ततः परं वृद्धप्रपितामहाद् बीजिपुरुषपर्यन्तमित्थं शिक्षयति, यथा प्रश्नमात्रेण बालकस्तत्क्षणादुत्तरयितुं शक्नोति। वचनमिदं बहुलमिति यद् जीवतः पुरुषस्य सश्रीकं नाम, मृतस्य कस्यचिदूर्ध्वतनस्य श्रीहीनं नाम कथनीयमित्येतदपि पित्रा यथावसरं यथावधानञ्च शिशुः शिक्ष्यते।

अस्य तु प्राचीनं नाम "नाम-श्लोकः" इति। वैदिकानां ब्राह्मणानां विशेषतो वङ्गदेशनिवासिनां मध्येऽस्य प्रचारबाहुल्यं दृश्यते। वैदिकगुरूणां तथा वैदिकपुरोहितानां शिक्षामनुचिकीर्षूणामपरेषां राढीय-वारेन्द्र-भूदेवानां मध्येऽपि क्वचिदस्य प्रचारो दृश्यते।

उपयोगिता चास्याः शिक्षायाः सुमहत्येव। पुरुषसंख्यायास्तथा सम्पर्कस्य च विज्ञानात् कः सपिण्डः कः सकुल्यः को वा समानोदकः सगोत्रश्च, के कीदृक्सम्बन्धभाजश्च तन्निर्द्धारणं भवति। प्रयोजनञ्च तर्पणोदकदानादौ स्मृतिशास्त्रीयौद्वाहिकसम्बन्धविचारणादौ च।

अतः परं प्रत्येकप्रश्ने ये केचित् सारसिका उपप्रश्नाः उपोपप्रश्नाश्च विद्यन्ते उत्तराण्यपि तेषामतीव माधुर्यपूर्णानि, का कथा बालकानां सर्वेषामेव यत्नतस्तानि शिक्षणीयानि। अस्माभिः क्रमशस्तानि प्रश्नोत्तराणि प्रकाशयिष्यन्ते।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुरूपोक्तयः

[निबन्धकः—श्रीद्विजेन्द्रनाथगुह-चतुंधुरीणः]

"यथा स्त्रीणां तथा वाचां
साधुत्वे दुर्जनो जनः ।"
(उत्तरचरिते १।५) ।

"सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्त्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥"
(अभिज्ञानशकुन्तले ५।१७) ।

यद्वा "सरसाः कान्तिहारिण्यो नाना-
श्लेषविचक्षणाः ।
भवन्ति कस्यचित् पुण्यैर्मुखे वाचो
गृहे स्त्रियः ॥

"काव्ये भव्यतमेऽपि विज्ञनिवहै-
रास्वाद्यमाने मुहुर्दोषान्वेषणमेव
मत्सरजुषां नैसर्गिको दुर्ग्रहः ।
कासारेऽपि विकाशिपङ्कजचये खेलन्म-
राले पुनः क्रौञ्चश्चञ्चुपुटेन कुञ्चित-
वपुः शम्बूकमन्विष्यति ॥"
(लौकिकानामाभाणकः) ।

"लौकिकानां हि साधूनाम्
अर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां
वाचमर्थोऽनुधावति ॥"
(तद्वत् १।१०) ।

"मीमांसते किमार्योऽयं
कौशिकेऽप्यनुशासति ।
वाचमेषामृषीणां हि
शास्त्रमेवानुरुध्यते ॥"
('अनर्घराघव'नाटके)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"स्नेहं दयाञ्च सौख्यञ्च
यदि वा जानकीमपि ।
आराधनाय लोकानां
मुञ्चतो नास्ति मे व्यथा ॥"
(तद्वत, १।१२) ।

"यत् सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्संम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त ! धिङ् माम-
धन्यम् ॥"
(तद्वत १।४२) ।

"दुःखसंवेदनायैव
रामे चैतन्यमर्पितम् ।
मर्मोपघातिभिः प्राणै-
र्वज्रकीलायितं स्थिरैः ॥"
(तद्वत, १।४७) ।

"लक्ष्मणः । * * * तेन चित्र-करेण अस्मदुपदिष्टम् आर्यस्य चरित-मस्यां वीथिकायाम् अभिलिखितम् ।"
(तद्वत्, प्रथमेऽङ्के) ।

"लक्ष्मणः । एष भरद्वाजाऽवेदि-तश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम ।"
(तद्वत, प्रथमेऽङ्के)

"निश्चित्य चानन्यनिवृत्ति वाच्यं
त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् ।
अपि स्वदेहात् किमुतेन्द्रियार्थाद्
यशोधनानां हि यशो गरीयः" ॥
(रघुवंशे १४।३५) ।

"राजर्षिवंशस्य रविप्रसूते-
रुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः
पयोदवातादिव दर्पणस्य ॥"
(रघुवंशे १४।३७)

"अथ मोहपरायणा सती
विवशा कामवधूर्विबोधिता ।
विधिना प्रतिपादयिष्यता
नववैधव्यमसह्यवेदनम् ॥"
(कुमारसम्भवे ४।१ ; यद्वा, रघुवंशे, १४।५६) ।

"तयोर्यथाप्रार्थितमिन्द्रियार्थान्
आसेदुषोः सद्मसु चित्रवत्सु ।
प्राप्तानि दुःखान्यपि दण्डकेषु
सञ्चिन्त्यमानानि सुखान्यभूवन् ॥"
(रघुवंशे १४।२५) ।

"त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥"
(रघुवंशे, १३।५३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मणः । सोऽयं शैलः ककुभ-
सुरभिर्माल्यवान नाम * *
(तद्वत, १।३३) ।

"इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नय-
नयो-
रसावस्याः स्पर्शो वपुषि बहल-
श्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो
मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु
विरहः ॥"
(तद्वत् १।३८) ।

"अद्वैतं सुखदुःखयोरनुगुणं सर्वास्व-
वस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा
यस्मिन्नहार्यो रसः ।"
(तत्रैव) १।३९

"एतद्गिरेर्माल्यवतः पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च
त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥"
(तद्वत्, १३।२६)

"सेयं ममाङ्गेषु सुधारसच्छटा
सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी
प्राणेश्वरी लोचनगोचरं गता ॥"

"The expense of spirit in a
waste of shame
Is lust in action: and till ac-
tion, lust
Is perjur'd, murderous,
bloody, full of blame,
Savage, extreme, rude, cruel,
not to trust;
Enjoy'd no sooner, but des-
pised straight;
Past reason hunted; and no
sooner had
Past reason hated, as a swal-
low'd bait
On purpose laid to make the
taker mad:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Mad in pursuit, and in possession so,
Had, having, and in quest to have extreme;
A bliss in proof,—and prov'd a very woe;
Before, a joy propos'd behind, dream.
All this the world well knows; yet none knows well
To shun the heaven that leads men to this hell."*
(Shakespeare: Sonnet, 129;
Scott: Lay of ths Last Ministrel, Canto V, 13*).

"कालेनावरणात्ययात् परिणते यत्
स्नेहसारे स्थितम्
भद्रं प्रेम सुमानुषस्य कथमप्येकं हि
तत् प्राप्यते ॥"
(तद्वत)

"When love begins to sicken and decay
It useth an enforced ceremony.
True love can no more be diminished by showing of evil-hap.
Than flowers are marred by timely rains.*"
(Sir Philip Sydney;
Shakespeare: Venus & Adonis, St. 134.)

"Tried in temptation, strengthened in distress,
Unmoved by absence, firm in every clime,
And yet—oh more than all! Untired by time,
Which nor defeated hope, nor baffled will,

* The writer is indebted to "Some English Parallels to Bhavabhuti" in the *Calcutta Oriental Journal*, Vol. II, pp. 273-276. for these quotations.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Could render sullen, nor rage could fire,
If there be love in mortals—this was love!"
—Byron.

हा हा धिक् परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत् तत् पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् ॥"
(तद्वत्, १।४०) ।

"पौरेषु सोऽहं बहुलीभवन्तम्
अपां तरङ्गेष्विव तैलबिन्दुम् ।
सोढुं न तत्पूर्वमवर्णमीशे
आलानिकं स्थाणुमिव द्विपेन्द्रः ॥"
(रघुवंशे १४।३८) ।

"ऋषीणामुग्रतपसां यमुनातीर-वासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥"
(तद्वत्, १।५०) ।

"कृतसीतापरित्यागः स रत्नाकर-मेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥
लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः ॥"
रघुवंशे १५।१२)

"सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।"
(तद्वत्, २।१) ।

"स्मरणं श्रवणं वापि दर्शनं वा महात्मनाम् ।
सेयं कुशलवल्लीनां महती फल-सन्ततिः ॥"
(अवदानकल्पलतायां १०।११
Vol, 1, Bibliotheca Indica, Calcutta, 1888)

"वज्रादपि कठोराणि
मृदूनि कुसुमादपि ।

"कुसुमात् सुकुमारस्य
क्रूरस्य क्रकचादपि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकोत्तराणां चेतांसि
को नु विज्ञातुमर्हति ॥"
(तद्वत २।७)

"न राजापचारमन्तरेण
प्रजास्वकालमृत्युश्चरति"
(तद्वत, द्वितीयेऽङ्के आत्रेयी-
वार्त्तायाम्) ।

"परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकवरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ॥"
(तद्वत, ३।४) ।

"ददतु तरवः पुष्पैरर्घ्यं फलैश्च
मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु
वनानिलाः ।
कलमविरलं रत्युत्कण्ठाः क्वणन्तु
शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वन-
मागतः ॥"
(उत्तरचरिते ३।२४)

'पुरोत्पीडे तडागस्य परीवाहः
प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव
धार्यते ॥"
(तद्वत ३।२९)

को जानाति परिच्छेदं
स्त्रीणां चित्रस्य चेतसः ॥"
(अवदानकल्पलतायां ८।६४)

"लोकः सुखानि किल पुण्यफलानि
भुङ्क्ते ।
हतो न चेत् कुनृपतेर्विनिपातवातैः ॥"
(तद्वत, ६।७०) ।

"वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति ॥"
(अभिज्ञानशकुन्तले ७।२१) ॥

रघुवंशे २।८-१३

"Home they brought her
warrior dead", etc,
(Tennyson: The Princess
a medley*)

---

* *The Calcutta Oriental Journal*, Vol. II, p. 276.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दंशः ।
तथैव तीव्रो हृदि शोकशङ्कु-
र्मर्माणि कृन्तन्नपि किं न सोढः ।।"
(तद्वत् ३।३५) ।

"अन्धतामिस्रा हि असूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते ये आत्मघातिन इत्येवमृषयो मन्यन्ते" ।
(तद्वत्, चतुर्थेऽङ्के जनक-वार्त्तायाम्) ।

"अनियतरुदितस्मितं विराजत्-
कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जुजल्पितं ते ।।"
(तद्वत्, ४।४) ।

"सन्तानवाहीन्यपि मानुषाणां
दुःखानि सद्बन्धुवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि
स्रोतःसहस्रैरिव संप्लवन्ते ।।"
(तद्वत् ४।८) ।

"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।"
(तद्वत्, ४।११) ।

"मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो वाष्पबिन्दुरधरं परिवाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
वाष्पं प्रमृज्य विगतानुशयो भवेयम् ।।"
(अभिज्ञानशकुन्तले ७।२५) ।

"असूर्या नाम ते लोका
अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति
ये के चाऽऽत्महनो जनाः ।।"
ईशावास्योपनिषत्—(१।३)

"आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥
(अभिज्ञानशकुन्तले, ७।१७) ।

"तमवेक्ष्य रुरोद सा भृशं
स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो
विवृतद्वारमिवोपजायते ।।"
(कुमारसम्भवे ४।२६) ।

पदं हि सर्वत्र गुणैर्निधीयते
(रघुवंशे ३।६२) ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामरहस्यम्

—:०:—

[निबन्धकः—श्रीशरत्कमल-न्याय-स्मृतितीर्थः]

(पूर्वानुवृत्तिः)

अपिच श्रूयते—यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरः, यं सर्वाणि भूतानि न विदुः, यस्य सर्वाणि भूतानि शरीरम्, यः सर्वाणि भूतानि अन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः। इत्यधिभूतम् (बृहदारण्यकोपनिषत्। ३।७।१५।)

तथाच एतदेव चिद्वस्तु श्रीरामः सर्वेषु भूतेष्वन्तर्यामित्वेन विराजते यतस्तत एव सर्वाणि भूतानि स्वकर्मसु चेष्टन्ते—इति प्रकृते भावनीयम्। तदेतत् स्मर्यते—

(१) "यथा दारुमयी योषिन्नृत्यते कुहकेच्छया।
एवमीश्वरतन्त्रोऽयमीहते सुखदुःखयोः॥"

आह्निकतत्त्वधृतमहाभारतवचनम् सन्ध्याव्याख्यानप्रकरणे द्रष्टव्यम्।

(२) ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥

श्रीभगवद्गीता। १८।६१

अपि च श्रूयते—

(१) अथाध्यात्मम्—यः प्राणे तिष्ठन् प्राणादन्तरः, यं प्राणो न वेद, यस्य प्राणः शरीरम्, यः प्राणमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(२) यो वाचि तिष्ठन् वाचोऽन्तरः, यं वाङ् न वेद, यस्य वाक् शरीरम्, यो वाचमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरः, यं चक्षुर्न वेद, यस्य चक्षुः शरीरम्, यश्चक्षुरन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(४) यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरः, यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरम्, यः श्रोत्रमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(५) यो मनसि तिष्ठन् मनसोऽन्तरः, यं मनो न वेद, यस्य मनः शरीरम्, यो मनोऽन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(६) यस्त्वचि तिष्ठंस्त्वचोऽन्तरः, यं त्वङ् न वेद, त्वक् यस्य शरीरम्, यस्त्वचोऽन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(७) यो विज्ञाने तिष्ठन् विज्ञानादन्तरः, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरम्, यो विज्ञानमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(८) यो रेतसि तिष्ठन् रेतसोऽन्तरः, यं रेतो न वेद, यस्य रेतः शरीरम्, यो रेतोऽन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

बृहदारण्यकोपनिषत्। ३।७।१६-२३।

तथाच प्राणः (१) अपानः (२) उदानः (३) समानः (४) व्यानः (५) इति पञ्च वायवः, चक्षुः (१) श्रोत्रं (२) नासिका (३) जिह्वा (४) त्वक् (५) इति पञ्च ज्ञानेन्द्रियाणि, वाक् (१) पाणिः (२) पादः (३) पायुः (४) उपस्थः (५) इति पञ्च कर्मेन्द्रियाणि, मनश्च अन्तरिन्द्रियम्, विज्ञानं रेतश्च इत्यादीनि सर्वाण्यध्यात्मवस्तूनि। एतेषु सर्वेष्वध्यात्मवस्तुषु चिद्वस्तु श्रीरामोऽन्तर्यामित्वेन विद्यत इति प्रकृते विभावनीयम्। तदेतत् सूत्रितं शारीरके भगवता बादरायणेन—

(१) "अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।"

वेदान्तदर्शनम्। १।२।१८।

(२) "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्।"

वेदान्तदर्शनम्। २।१।५।

इत्यादिना। श्रुत्याऽभ्युक्तञ्चैतदेव चिद्वस्तु—यथा "स्वधिते! मैनं हिंसीः" (१) "शुभिके! शिर आरोह" (२) "ओषधे! त्रायस्वैनम्"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) "यो वः शिवतमो रसस्तस्य भाजयतेह न उशतीरिव मातरः" (४) "अहस्तदवलुम्पतु" (५) "रात्रिस्तदवलुम्पतु" (३) इत्यादि। * अपि च एतदेव चिद्वस्तु श्रुत्यन्तरेण प्रश्नोत्तराभ्यां व्याख्यातम्। तथा च प्रश्नः—

"केनेषितं पतति प्रेषितं मनः ?
केन प्राणः प्रथमः प्रैति युक्तः ?
केनेषितां वाचमिमां वदन्ति ?
चक्षुः श्रोत्रं क उ देवो युनक्ति ?"

इत्यादि—सामवेदीयकेनोपनिषत्। १

उत्तरम् यथा—

श्रोत्रस्य श्रोत्रं मनसो मनो यद्
वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः,
प्रेत्यास्माल्लोकादमृता भवन्ति॥ इत्यादि
न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः॥इत्यादि।
यद् वाचाऽनभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि, नेदं यदिदमुपासते॥इत्यादि
यन्मनसा न मनुते येनाहुर्मनो मतम्।

---

* स्वधिते मैनं हिंसीः (१) शुभिके! शिर आरोह (२) "ओषधे! त्रायस्वैनम्" (३) इत्यादि मन्त्राणामर्थविचारव्याख्यानादि सर्वमृग्वेद-संहितायाः सायणाचार्यकृते उपोद्घातभाष्ये द्रष्टव्यम्। तथाच तत्र तद्भाष्य-पङ्क्तिः—"ओषध्यादिमन्त्रेष्वपि चेतना एव तत्तदभिमानिदेवतास्तेन तेन नाम्ना सम्बोध्यन्ते"—इत्यादि।

"अपि हि अदेवता देवतावत् स्तूयन्ते यथा अश्वप्रभृतीनि ओषधि-पर्यन्तानि, अथाप्यष्टौ द्वन्द्वानि"—इत्यादि वेदनिरुक्तग्रन्थे देवतालक्षणविचार-प्रकरणे दैवतकाण्डे पूर्वपक्षो द्रष्टव्यः, समाधानमप्येतद्द्रष्टव्यं तत्रैव यथा—"महाभाग्याद्देवतया एक आत्मा बहुधा स्तूयते"—इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ इत्यादि

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ इत्यादि ।

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ इत्यादि ।

यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ इत्यादि ।

केनोपनिषत् । १म-खण्डे २-८ मन्त्राः ॥

एतेन मन-आदीनां चालको ब्रह्मपदार्थ एव चिद्वस्तु इति फलितम्, तच्च प्रकृते श्रीराम एवेति विभावनीयम् ।

परिशेषे च एतस्यामेवोपनिषदि एतच्चिद्वस्तु सर्वदेवताशक्तिरूपा "बहुशोभमाना उमा हैमवती" इति व्यपदिश्यते । तथाच "हिमवतोऽपत्यं स्त्री हैमवती तस्या "उमे"ति नाम प्रसिद्धम् । श्रूयते च एतत् "उमा" नाम यजुर्वेदीयरुद्राध्यायमन्त्रे—"नमः सोमाय च रुद्राय च" इत्यादि । "उमया"सह वर्त्तमानः सोमस्तस्मै "सोमाय" इत्यर्थः * दुर्गोत्सवमन्त्रवर्णेनापि

"दाडिमि ! त्वं पुरा युद्धे रक्तवीजस्य सम्मुखे ।

"उमा"कार्यं कृतं यस्मात्तस्मात्त्वं वरदा भव ॥"

इति "उमा" नाम स्मृतमिति श्रुतिस्मृतिवर्णयोरैक्यमुपपन्नमिति प्रणिधातव्यम् ।

सुव्यक्तमुक्तं महाकविना कालिदासेन—

"उमे"ति मात्रा तपसो निषिद्धा ।

पश्चा"दुमा"ख्यां सुमुखी जगाम ॥

कुमारसम्भवे । १म-सर्गः

---

* "उमया सह वर्त्तमान इति सोमः" (सायणाचार्यकृतभाष्यम्), "उमया सहितः सोमस्तस्मै, प्रसादकाले हि देवः सोमः सन्निधत्ते" (भट्टभास्करकृतभाष्यम्) । यजुर्वेदसंहितायां रुद्राध्याये अष्टमानुवाके प्रथमो मन्त्रो द्रष्टव्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080537

एतेन चिद्वस्तुनः कन्यकारूपत्वं व्याख्यातं वेदितव्यम्, तदेतत् सुव्यक्त-मृग्वेदीये वागाम्भृणीये सूक्ते—

"अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥"

देवीसूक्तप्रथममन्त्रः—ऋग्वेदसंहिता। ८।७।११।१।

व्याख्यातश्चैतद् वेदभाष्यकारेण सायणाचार्यपादेन—"अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत्"—इत्यादिभिः।

अतश्च हंसऋचि चिद्वस्तुनः "अद्रिजा" इति नाम श्रूयते, यथा—

"हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।" *

"अद्रेः" हिमालयात् जायते या सा अद्रिजा पर्वतराजपुत्री "पार्वती" (१) "उमे"ति प्रसिद्धा। चिद्वस्तुनः कन्यकारूपत्वं (स्त्रीरूपत्वं) नैव चित्रं तस्य सर्वमूलस्य सर्वशक्तिमत्त्वया सर्वरूपत्वसम्भवात्। तदेतच्चिद्-वस्तुनः सर्वरूपत्वं श्रूयते—यथा—

(१) नैव स्त्री न पुमानेष न चैवायं नपुंसकः।
यद् यच्छरीरमादत्ते तेन तेन स युज्यते॥

श्वेताश्वतरोपनिषत्। ५।१०।

(२) स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालाग्निः स चन्द्रमाः।
स एव भूतश्च भव्यश्च यच्च ब्रह्म सनातनम्॥

कृष्णयजुर्वेदीयकैवल्योपनिषत्। १।८-९। मन्त्रौ।

---

* "ततोऽर्घ्यं भानवे दद्याच्छुचिहंसः सदित्यृचा" (१) "हंसः शुचिषदिति ...आदित्यञ्चोपतिष्ठेत्" (२) इति नरसिंहपुराणवचनम् (१) हारीतवचनञ्च (२) हलायुधकृतब्राह्मणसर्व्वस्वधृतम्। उद्धृतप्रमाणाभ्यां मन्त्रोऽयं सूर्यस्यार्घ्यदाने (१) उपस्थाने च (२) प्रयुज्यत इत्यवगम्यते। "अद्रेः पर्वतादिपाषाणमयप्रदेशात् स्फुलिङ्गाग्निरूपेण जायत इत्यादि व्याख्यानं सूर्यपक्षे तद्ग्रन्थादवगन्तव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) त्वं स्त्री त्वं पुमानसि त्वं कुमार उत कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः ॥
श्वेताश्वतरोपनिषत् । ४।३ ।

(४) इन्द्रो मायाभिः पुरुरूप ईयते ॥
बृहदारण्यकोपनिषत् । २।५।१९ ।

ऋचाऽभ्युक्तञ्चैतत् सर्वरूपत्वं चिद्वस्तुनो यथा—

(१) "इन्द्रं मित्रं वरुणमग्निमाहु-
रथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्य-
ग्निं यमं मातरिश्वानमाहुः ॥" इत्यादि ।
ऋग्वेदसंहिता । २।३।२२।६ ।

(२) "रूपं रूपं मघवा बोभवीति
माया कृण्वानस्तन्वं परि स्वाम् ।
त्रिर्यद्दिवः परि मुहूर्त्तमागात्
स्वैर्मन्त्रैरनृतुपा ऋतावा ॥" इत्यादि ।
ऋग्वेदसंहिता । ३।३।२०।३ ।

(४) "नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा ॥" इत्यादि ।*

---

* "विष्णुर्यद् विषितो भवति विशति, व्याप्नोति वेवेष्टि" इत्यादेर्महर्षि-यास्कनिर्वचनात् स्थूलत्वमणुत्वञ्च—"अणोरणीयान् महतो महीयान्" इति श्रुतिव्याख्यातमवगम्यते । ततश्च स्थूलसूक्ष्मविभागेन बहुरूपत्वं परमात्मनः तच्च फलतो विराड्विश्वरूपमेव "वि"विधेन रूपेण "राजते" इति "विराडि"ति निर्वचनात् । आत्मनः परमत्वमेवं व्याख्यातम्—"सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अकुण्ठशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥" (इत्यादिवायुपुराणे) । सर्वाण्येतानि श्रीरामे भावनीयानीति प्रकृतार्थः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेतत् सर्वरूपत्वं श्रीराम एव विभावनीयमिति प्रकृतार्थः फलितः ।

"आत्मनि"—इत्यादि, आत्मा हि वस्तुनः स्वं रूप स्वाभिन्नं रूपमित्यर्थः, तथाच अग्नेर्दाहिका शक्तिः, चन्द्रस्य ज्योत्स्ना, सूर्यस्य प्रभा, जलस्य शीतलता, समीरणस्य सदागतिरित्यादीनि वस्तूनि तत्तद्वस्तूनां स्वं रूपं तदेव तेषामात्मा, ततश्च वस्तुनः स्वाभिन्नं रूपं श्रीराम एवेति भावनीयमिति प्रकृतार्थः । तदेतदुक्तं स्वयमेव परमात्मना पार्थसारथिमूर्त्तिना—

"अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः ।
अहमादिश्च मध्यश्च भूतानामन्त एव च ॥"

श्रीमद्भगवद्गीता । १०।२० ।

प्रह्लादेन च भक्तचूडामणिना इदमात्मवस्तु एवमनुभूतम्, यथा—

"मह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः !
आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वदा ॥"

("सर्वत" इति वा पाठः)

श्रीमद्भागवतम् । ७।६।१९ ।

गोपीभिश्चाप्येतदेवानुभूतम्—

"न खलु गोपिकानन्दनो भवान्
निखिलदेहिनामन्तरात्मदृक्" ।

श्रीमद्भागवतम् । १०।३१।४ ।

आत्मशब्दनिर्वचनेनाप्येतदवगम्यते ; तथाच "अत् व्याप्तिसंहत्यो"रिति "अत्"धातो "रात्मे"ति सिद्धम्, "व्याप्तिः साकल्येनाभिसम्बन्धः" यथा "सैन्धवघन" इत्यादि । तथाच यथा लवणपिण्डेषु लवणरसः सर्वावयवावच्छेदेन सर्वदा उपलभ्यते एवं सृष्ट्यावच्छेदेन यद् वस्तु सर्वदा उपलभ्यते स एव आत्मा । "संहति"र्मेलनम् यथा "क्षीरे सर्पिरिवार्पितम्"—तथाच यथा क्षीरेण सह सर्पिषः, सर्पिषा च सह क्षीरस्य सर्वदा मेलनम्, एवं सृष्ट्या सह यद्वस्तुनः येन वस्तुना च सृष्टेः सर्वदा मेलनं स एव आत्मा, स एव श्रीराम एवेति प्रकृतार्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेतदात्मवस्तु मातृरूपेण स्मृत्वा प्रणमन्ति

इन्द्रियाणाम् अधिष्ठात्री भूतानाञ्चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥"

श्रीश्रीचण्डी । ५।७७ ।

स्तौति च मातृरूपेणैव—

"देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूह-मूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥"

श्रीचण्डी । ४।३ ।

"इति रामपदेनासौ परं ब्रह्माभिधीयते ॥" इत्यादि ।

श्रीशङ्कराचार्येण च एतदात्मवस्तु विश्वरूपेण मातृरूपेण च स्तुतम्

"त्वं भूमिस्त्वं जलौघस्त्वमसि हुतवहो गन्धवाहस्त्वमेव
त्वञ्चाऽऽकाशो मनश्च प्रकृतिरपि महापूर्विकाऽहङ्कृतिश्च ।
आत्माप्येवासि मातः परमिह भवती त्वत्परं नैव किञ्चित्
क्षन्तव्यो मेऽपराधः प्रकटितरदने ! कामरूपे कराले !

तथाच श्रीरामः "अनन्त" (१) "नित्यः" (२) "आनन्दः" (३) "चित्-स्वरूपः" (४) "आत्मा" च (५) तस्मिन् योगिनो रमन्ते यत "इति" हेतो "रामपदेन" "परं ब्रह्म" एव अभिधीयत इति समुदितार्थः ।

"बृहत्त्वाद् बृंहणत्वाद् वा ब्रह्मैवाऽऽत्मेत्यभिधीयते" इत्यादिना ब्रह्म-शब्दस्य व्युत्पाद्यमानत्वाद् "ब्रह्मपदार्थो बृहन (१) परममहान् (२) सर्वगतः (३) देहादीनां परिणमयिता (४) आत्म-स्वरूपश्चेत्यवधेयम् ।

(१) "अणोरणीयान महतो महीयान्
आत्माऽस्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको
धातुः प्रसादान्महिमानमात्मनः ॥" इत्यादि ।

कठोपनिषत् । २।२० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) "आकाशवत् सर्वगतश्च नित्यः ।" इत्यादि ।

स्मर्यते च—यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।

सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ।।" इत्यादि ।

श्रीमद्भगवद्गीता । १३।३३ ।

सूत्रितञ्चैतत् शारीरके भगवता बादरायणेन—

"आकाशस्तल्लिङ्गात्"

वेदान्तदर्शने । १।१।२२ सूत्रम् ।

इत्यादिभिः । एवञ्च प्रकृते "श्रीराम एव बृहन् (१) परममहान् (२) सर्वगत (३) इति विभावनीयम् । तदेतन्मातृरूपेण स्मृत्वा प्रणमन्ति—

"जय सर्वगते ! देवि ! कालरात्रि नमोऽस्तु ते ।।"

श्रीचण्डिकार्गलास्तवः

बृंहणत्वाद् "देहादीनां परिणमयितृत्वाद्"—इति वेदान्तकल्पतरु-व्याख्यानम्, तदेतच्छ्रूयते—

(१) एकोऽहं बहु स्याम्, नामरूपे व्याकरवाणि" । इत्यादि

(२) "तत ऐहत ततोऽजायत" । इत्यादि ।

(३) "स जीवेनाऽऽत्मनाऽनुप्रविष्टः ।" इत्यादि च ।

एतदेव देहादीनां परिणमयितृत्वरूपं बृंहणवस्तु मातृरूपेण स्वयमेव व्याख्यातम्, यथा—

(१) एकैवाहं जगत्यत्र द्वितीया का ममापरा ।

पश्यैता दुष्ट ! मय्येव विशन्त्यो मद्विभूतयः ।। इत्यादि ।

श्रीश्रीचण्डी ।१०।५ ।

(२) अहं विभूत्या बहुभिरिह रूपर्यदास्थिता ।

तत् संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ।।"

श्रीश्रीचण्डी । १०।८

अत्र "एका एव अहम्" (१) "एका एव तिष्ठामि (२) इत्यादिना "एक-मेवाद्वितीयम्" (१) "एकमेवाद्वयं ब्रह्म" (२) इत्यादि ब्रह्मणः स्वं रूपमुक्तम्, "मद्विभूतयः" (१) "बहुभी रूपैरास्थिता" (२) इत्यादिना च देहादीनां परिणमयितृत्वरूपं बृंहणत्वं व्याख्यातमवगन्तव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षिभिश्चाप्येतद् देहादीनां परिणमयितृत्वरूपं बृंहणत्वं प्रत्यक्षीकृतं मातृरूपेणैव। यथा—

"नित्यैव सा जगन्मूर्त्तिस्तया सर्वमिदं ततम्।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम॥
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।
उत्पन्नेति तदा लोके सा नित्याऽप्यभिधीयते॥"

श्रीश्रीचण्डी। १।६४।६५।६६।

अत्र "नित्यैव सा" (१) "तया सर्वमिदं ततम्" (२) इत्यादिना ब्रह्मणः स्वं रूपमुक्तम्, "जगन्मूर्त्तिः" (१) "तत्समुत्पत्तिर्बहुधा श्रूयतां मम" (२) इत्यादिना च देहादीनां परिणमयितृत्वरूपं बृंहणत्वं व्याख्यातम्। तदेतत् सर्वं प्रकृतार्थे श्रीरामे विभावनीयम् "एकं सद् विप्रा बहुधा वदन्ति" इत्यादिपूर्वोक्तमन्त्रवर्णादिति फलितार्थः।

अत्र अनन्तनित्यानन्दचिदात्मनां पदार्थानां स्वरूपत एव ब्रह्मणोऽभिन्नत्वात् "परं ब्रह्म" इत्यादिसुस्पष्टोक्तेश्च श्रुतिकथितानन्तत्वादि सर्वमेव श्रीरामस्य स्वरूपं लक्षणमिति प्रणिधातव्यम्॥

(क्रमशः)

दत्ता

पञ्चमः परिच्छेदः

प्रस्थिते तस्मिन्नागन्तुके क्षणमन्यमनस्कं नीरवञ्चावस्थाय सहसा सचकितं मुखमुन्नमयन्त्या एव विजयायाः कपोलयोरुपरि नितान्तमकारणमेव क्षीणा काचिल्लोहिता दीप्तिः प्रादुर्बभूव। विलासस्य दृष्टिर्यद्यन्यत्र निबद्धा नाभविष्यत्तदा मन्ये तस्य विस्मयस्याभिमानस्य च सीमाऽपि नास्थास्यत्। मृदु हसन्ती विजया प्रावदत्, अस्माकं वचसा तु समाप्तये नावसर एवाऽऽसादितः। तर्हि मतोऽयं भूमिभागः स्वायत्तीकर्त्तुं भवतस्तातपादानाम्?

विलासो गवाक्षपथेन बहिर्दृष्टिरासीत्, तथैव (स्थित्वा) प्रावोचत्, बाढम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजयया प्रोक्तम्, परमत्र नास्ते किञ्चिदसामञ्जस्यं नाम ?

विलासेनोक्तम्, नहि।

विजयया पुनरपि पृष्टम्, अपि नाम तत्रभवानपराह्णेऽस्यां दिशि समागमिष्यति ?

विलासेनोक्तम्, न शक्नोमि वक्तुम्।

विजया हसन्ती प्राह, अपि नाम कुप्यति भवान् ?

समयेऽस्मिन् विलासो मुखं प्रत्यावर्त्य गम्भीरं प्रत्यवोचत्, कोपमकुर्वतोऽपि पुत्रस्य पितुरवमानतः क्षोभो मन्ये नास्वाभाविकः।

वचनमिदं विजयां प्राहरत्, तथापि सा स्मितमुखी प्राह, परमनेन तस्य मानो हत इतीयं वितथा धारणा कथं भवतः प्रादुर्भूता ? तत्रभवान् स्नेहान्मम क्लेशो भवेदित्यमन्यत, परं कष्टं न भवेदित्येवामुं भद्रमहोदयं प्राबोधयम्, नात्र मानापमानयोस्तु काचिदपि कथा वर्तते विलासमहोदय ?

नैतेन विलासस्य गाम्भीर्यमात्रा बिन्दुमात्रमपि लघूभूता। स सशिरःकम्पं प्रत्युत्तरमाह, वाक्यमेवेदं न भवति। अथ भवत्याः सम्पदो भारं भवती स्वीकर्त्तुमिच्छति, स्वीकरोतु। परमतः परं मया पितृदेवोऽवश्यमेव सावधानो विधातव्यः, अन्यथा पुत्रस्य कर्त्तव्यतायां मम प्रमादो भवेत्।

अनेनाचिन्तनीयेन कठोरेण प्रत्युत्तरेण विजया विस्मयेन हतबुद्धिर्जाता। क्षणं स्तब्धीभूय साऽतिशयपीडमवदत्, विलासमहोदय, तुच्छमिमं विषयमित्थंकारं मनसि निधाय भवान् गुरूकरिष्यतीति न मया मनसापि कृतम्। अस्तु, यदि बोधभ्रमेणान्याय्यमेव मयाऽनुष्ठितम, अयमपराधः स्वीक्रियते, न पुनर्भविष्यति। वदन्ती विजया विलासस्य मुखं प्रत्यालोक्य निश्वासमेकममुञ्चत्। तया मनसि कृतम्, नातः परं कस्यापि किमपि वक्तव्यमवशिष्येत—दोषस्वीकारस्य समकालमेव तस्याप्यवसानं भवेत्। परं न किल विजयया विदितासीदियं वार्त्ता यत्, दुष्टं व्रणमिव तथाविधोऽपि मानवो वर्त्तते, यस्य विषदिग्धा क्षुधा सकृत् कस्यापि स्खलितान्तराश्रयं लभमाना सती न पुनः कथमपि निवर्त्तितुमिच्छेत्। अत एव विलासो यदा प्रत्युत्तरेणावोचत्, एवं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्हि पूर्णगङ्गोपाध्यायं विज्ञापयतु भवती यद् रासविहारी महोदयो यदादिष्टवान तस्यान्यथाकरणं भवत्या न शक्यम् इति, तदा विजयाया नेत्रसमीपेऽस्य जनस्य हिंस्रः स्वभाव एकपद एव प्रोद्भासमानः समदृश्यत। सा कियत्कालं निःशब्दं कृतावलोकना सती शनैरवादीत्, अपि नाम तत् कर्मैतस्मादपि भूयसेऽन्याय्याय न कल्पिष्यते ? भवतु, वरं स्वयमेव मया लिपिद्वारेण तस्यानुमतिरादीयते।

विलासेनोक्तम्, तुल्ये एवेदानीमनुमतेर्ग्रहणाग्रहणे। यदि नाम भवती तत्रभवन्तं ग्रामस्य सर्वत्राश्रद्धेयं कर्त्तुमिच्छेत्, मयापि तर्ह्यत्यन्ताप्रियं कर्त्तव्यं पालयितव्यं स्यात्।

विजयाया अन्तरिन्द्रियमकस्मात् क्रोधेन पूर्णमासीत्, परं सात्मसंयमं विधायावदत् श्रूयतांतावत् किमिदं कर्त्तव्यं नाम ?

विलासेनोक्तम्, भवत्या भूसम्पदः शासनव्यापारेषु तत्रभवता न पुनः करो दातव्य इति।

भवतो वारणं तत्रभवता श्रोष्यत इति भवान मन्यते ?

अन्ततः सैव चेष्टा मया कर्त्तव्या भवेत्।

विजया क्षणं मौनेन स्थित्वा अन्यतोऽवलोक्य तथा शान्तेन स्वरेणैवोत्तरं प्रत्यपद्यत, साधु, भवता यथाशक्ति क्रियताम्, परमन्यस्य धर्म्ये कर्मणि न मयाऽन्तरायः कर्त्तुमर्हः।

सत्यामपि कण्ठस्य मृदुतायां तस्या आन्तरः कोपो नागुप्यत। विलासस्तीव्रेण कण्ठेनावोचत, भवत्यास्तातपादास्तु नैवं वक्तुमुदसहिष्यन्त।

विजया प्रत्यावृत्य दण्डायमाना नेत्रे उन्नमय्य तस्यास्यमवलोकितवती, प्रावदच्च, मम तातपादानां वार्त्तां भवत्तोऽहमधिकतरमेव जानामि। अलं तदवलम्ब्य तर्केण। मम स्नानस्य वेला सञ्जाता, मयोत्थीयते। एवमुक्त्वा सर्वां वाग्वितण्डां बलान्निरुध्य उत्थाय दण्डायमानायां तस्यां क्रोधोन्मत्तस्य विलासस्य कृत्रिमं भद्रताया मुखावरणमेकपद एव मुखादस्रं-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत। स स्वकं स्वभावमेकान्ततोऽनावृतं विधाय निरतिशयेन कटुना कण्ठेनावोचत्, जातिरेव योषितामेवं कृतघातिनीति।

कृतपादप्रवतना विजया विद्युद्वेगेन परावृत्य पलमात्रमस्य मूढस्य मुखं प्रति तीक्ष्णां दृष्टिं निपात्य शनैर्निःशब्दश्च गृहं विहाय प्रातिष्ठत, विलासश्च सद्यो मालिन्यमाससाद।

पितृभक्तेरतिशयेनैव स विरोधमारचयामासेति मा नाम केनापि भ्रमितव्यम्। ईदृश एव तथाविधानां मानवानां स्वभावो यद् निरूपित एव छिद्रे निष्प्रयोजनं तद् वर्धयन् दुर्बलं पीडयन् भीतं पुनरपि भीतिमापादयन आनन्दमनुभवतीति—ततो यथा तथा वा भवतु, कारणञ्च यावदेवासंलग्नं भवतु। परं विजया यदा तिलमात्रमप्यनवनत्य तमेव तृणीकृत्य जुगुप्सया प्रतस्थे, तदेयं स्वयंप्रारब्धस्य कलहस्य क्षुद्रता विलासमात्मसमीपेऽपि नितरां क्षुद्रमकरोत्। स कियत्कालं तूष्णीमवस्थाय वदनं मसीवर्णं विधाय शनैः शनैर्गृहं प्रति प्रतस्थे।

अपराह्णे रासविहारी पुत्रं सह कृत्वा साक्षात्कर्त्तुमुपागतवान्। प्रावदच्च, न साध्वनुष्ठितं त्वया मातः। ममाऽऽदेशविरोधिना त्वद्दत्तेनाऽऽदेशेनाहं परमेवाप्रतिभः कृतः। तद् यातु, तवैव सम्पदित्यत इमं विषयमवलम्ब्य समधिकमालोचनं कर्त्तुं नोत्सहे। परमसकृदेवं वृत्ते स्वसम्मानमक्षुण्णं रक्षितुं मयाऽवश्यमेव व्यवहितेन भाव्यमिति पूर्वमेव स्मारयामि।

विजया न किमप्युत्तरं प्रत्यपद्यत। प्रत्युत मौनमुद्रितवदना सा कथञ्चिदपराधं स्वीचकारैव। रासविहारी तदा कोमलः सन् विषयसंक्रान्तमन्यं संवादं प्रास्तावीत्। नूतनस्य भूखण्डस्य क्रयालोचनं समाप्याब्रवीत्, जगदीशनिबन्धनं भवनं यतस्त्वया समाज्ञायैव समर्प्यते मातस्ततो विलम्बमकृत्वाऽवसित एवास्मिन् पूजाया अवकाशे तस्य स्वायत्तता विधेया—किं वा त्वयोच्यते?

विजया ग्रीवां सञ्चाल्यावदत्, अत्रभवता यत् समुचितं मंस्यते तदेव भविष्यति। मन्ये ऋणशुद्धेरङ्गीकृतः कालस्तु तेषां समुत्तीर्णः?

रासविहारिणोक्तम्—बहोर्दिनात् पूर्वम्। जगदीशस्तस्य विक्षिप्तं तत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दणं समूढीकर्तुम् अष्टभिर्वर्षैर्देयमिति निर्णीय तव पितुः सकाशादयुतं रूप्यकाणामृणं कृत्वा विक्रयपत्रं लिखन्नददात। नियमस्त्वासीत, एषु वर्षेषु निर्यातयितुं प्रभावत् चेत् सम्यक्, अथ न शक्नुयात्, तस्य भवनमुद्यानं पुष्करिणी—अस्य सर्वाः सम्पद एवास्माकं भविष्यन्ति। अतीता अष्टौ वत्सराः, तदयं नवमो वत्सरः प्रवर्त्तते।

विजया कियन्तं क्षणमधोमुखं नीरवश्चाऽऽसीना मृदुस्वरेणावदत, श्रूयते तस्य तनयोऽत्र वर्त्तते, तमाहूय भूयोऽपि कियद्दिनमवसरो दातुं युज्यते न वा, यदि कश्चिदुपायं स कर्त्तुं क्षमेत।

रासविहारी सशिरःकम्पं प्रावदत, तन्न शक्ष्यति—न शक्ष्यति। अथ शक्नुयात—

असमाप्त एव पितुर्वचसि विलासः सपदि गर्जनमुदपादयत। इदानीं यावत् स कथञ्चन धैर्यमवलम्ब्यासीत, अतः परं न प्रबभूव। कर्कशेन स्वरेणावदत्, शक्नुवत्येव वा तस्मिन् वयं कथं दास्यामः। अर्थग्रहणवेलायां तस्य मत्तस्य ज्ञानं नासीत—कीदृशः समयः क्रियत इति? कथमस्य निर्यातनं करिष्यते?

विजया विलासं प्रति सक्रूर दृष्टिपातं विधायैव रासविहारिणो मुखं प्रत्यालोक्य दृढशान्तेन कण्ठेनावदत, तत्रभवान् मम पितृबन्धुः, तत्सम्बन्धिनी कथा ससम्मानं वक्तव्येति पिता मामुपादिशत।

विलासः पुनरपि सतर्जनमवदत्, सहस्रकृत्व उपदिष्टेऽपि स यदेकः—

रासविहारिणाऽन्तरा प्रतिबध्योक्तम्—त्वं तावत्तूष्णीमास्स्व विलास।

विलासेन प्रत्युक्तम्, सर्वमिदं निष्फलं भावप्रवणत्वं न मया सोढुं शक्यते—तेन केनापि विरज्यतां वा, अन्यत यत्किञ्चन क्रियतां वा। नाहं सत्यं वक्तुं बिभेमि, न च सत्यं कर्म कर्त्तुं पश्चात्पदो भवामि।

रासविहारी पक्षद्वयमेव शान्तयितुं सहासमिव वदनं विधाय मुहुर्मस्तकं कम्पयन्नाह। सत्यमेतत, सत्यमेतत। अस्मद्वंशोचितेयं प्रकृतिर्मत्तोऽपि नापासरत। न नाम बुद्धं त्वया मातर्विजये,—एतस्मादेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणादहं तव तातश्च सर्वस्य देशस्य प्रतिपक्षीभूय सत्यधर्मं ग्रहीतुं न भयमध्यकुर्व ।

विजयया प्रोक्तम्, तातो मरणान् पूर्वं मामादिशत्, ऋणशुद्धिं निमित्तीकृत्य तस्य शैशवसुहृदो गृहभवनादिकं यथा मया न विक्रीयेत। वदन्त्या एव तस्या नयने वाष्पदूषिते अभवताम्। स्नेहमयस्य पितुर्योऽनुनयस्तस्य जीवनकालेऽन्याय्यं स्वैराचारित्वमिवाभात, तन्मरणादूर्ध्वमद्य पुनस्तदेव दुरतिक्रमणीय आदेश इव तां प्रतिबध्नाति।

विलासोऽवदत्, एवं तर्हि तत्रभवानेव कथं सर्वम् ऋणवन्धं नाजहादिति श्रूयताम् ?

विजया तस्य प्रत्युत्तरमकृत्वा रासविहारिणो मुखमालोक्य पुनरवदत्, जगदीशमहोदयस्य पुत्रमाहूय सर्वं वृत्तान्तं तस्मै ज्ञापितमस्त्विति ममाभिलाषः।

तस्य प्रत्युत्तरदानात् पूर्वमेव विलासो निरपत्रप इव पुनरवोचत्, अथ यदि स भूयोऽपि दशवत्सरसम्मितं समयं याचेत, अपि नाम स एव दातव्यः ? एवं सति देशे समाजप्रतिष्ठाया आशा सागरस्यातले गर्भे विसर्जनीयेति दृश्यते।

एतस्याप्युत्तरमकुर्वती विजया रासविहारिणमेव लक्षीकृत्यावदत्, अपि नामात्रभवता तमाहूय विषयेऽस्मिंस्तस्याभिलाषो ज्ञातुं शक्यते न वा ?

सुचतुरो जनोऽयं रासविहारी। स पुत्रस्यौद्धत्येन मनसि विरक्तोऽपि बहिस्तस्यैव मतं समीचीनं प्रमाणयितुं भूमिकाच्छलेन शममवलम्ब्योक्तवान्, अवधत्स्व मातः, युवयोर्मतद्वैधमन्तरा तृतीयस्य जनस्य वाक्प्रयोगोऽन्याय्यः,—यतः, कथं युवयोः श्रेयो भविष्यतीत्यद्य माऽस्तु श्वस्तु युवाभ्यामेव स्थिरीकरिष्यते, वृद्धस्यास्य मतामतयोरावश्यकता नैव भविष्यति ; परं मातर्यदि वाक्प्रयोगः कर्त्तव्यः स्यात्तदा वक्तव्यमेव—विषयेऽस्मिन तवैव भ्रान्तिर्विलसति। भूसम्पत्परिचालनकर्मणि मयाऽपि विलासस्य समीपे पराजयः स्वीकर्त्तव्यः स्यात्—तदिदं मयाऽनेकशः प्रत्यक्षीकृतम्। अस्तु, त्वमेव तावद् ब्रूहि, कस्य प्रयोजनमधिकम्, तव, जगदीशपुत्रस्य वा ? यदि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य ऋणशुद्धेर्योग्यतैवावर्तिष्यत तदा स स्वयमागत्य सकृत् सयत्नं साक्षात्कारं नाकरिष्यत्? जानात्येव स त्वामत्रागताम्, इदानीं यदि वयमेव याचकीभूय तमाह्वयामस्तदा नूनं स प्रभूतमेव समयं प्रार्थयिष्यते। तेन च फलमिदमेव भविष्यति यत्, सोऽर्थमपि दातुं न शक्ष्यति, युवयोः समाजप्रतिष्ठासङ्कल्पोऽपि चिराय निमङ्क्ष्यति। सम्यक् चिन्तय मातः, इदमेव यथार्थं न वा?

विजया नीरवमवातिष्ठत। तस्या मनोगतमनुमाय वृद्धो रासविहारी क्षणादूर्ध्वम् अवोचत्, सम्यक्, किमपि तस्य परोक्षं नैव भाव्यम्। तदा स्वयं यदि स समयं प्रार्थयेत तदा वरं विवेचनीयम्। किमुच्यते मातः?

विजया स्कन्धं विकम्प्योवाच, बाढम्। एवमपि तस्या मुखाकृतिं विलोक्य स्पष्टमेव बुद्धम्, यत् सा प्रस्तावमिमं मनसा नानुमोदितवती। रासविहारिणाऽद्य विजया परिज्ञाता, स निश्चितमेवाबुध्यत, अस्याः कन्यकाया अल्पमेव वयः, परं सा तस्याः पितुः सम्पदोऽधिकारिणीति जानाति, एवञ्च तां मुष्टावानेतुमपि समयोऽपेक्षिष्यते। अत एकमेव विषयं निमित्तीकृत्य वादानुवादो न समीचीन इति विविच्य सान्ध्योपासानाच्छलेनोदचलत्। विजया प्रणम्य निःशब्दमासनं विहायोदतिष्ठत्, स आशिषाऽभिनन्द्य बहिर्जगाम। विजया मुहूर्त्तं तूष्णीमवस्थाय कथितवती, मया बहूनि पत्राणि लेख्यानि वर्त्तन्ते, अस्ति नाम मया किमपि प्रयोजनं भवतः?

विलासः कठोरं प्रतिवचनमदात्, न किमपि, भवती गन्तुमर्हति।

भवतकृते 'चा' प्रेषयितुमादेक्ष्यामि वा?

न हि, प्रयोजनं नास्ति।

बाढम्, नमस्कारः—इत्युक्त्वा विजया करतलद्वयं सकृदेकीकृत्य गृहं परित्यज्य प्रातिष्ठत।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষৎ-

পুস্তকালয়ের নিয়মাবলী।

১। পুস্তকালয় ছুটীর দিন (প্রতি বৃহস্পতিবার ও পর্ব্বদিন) ব্যতীত প্রতিদিন বৈকাল ৩৷৷০ সাড়ে তিনটা হইতে রাত্রি ৯ নয়টা পর্য্যন্ত খোলা থাকিবে। পরিষদের কোনও বিশেষ অধিবেশন যে সকল দিনে অনুষ্ঠিত হইবে সেই সকল দিনে পুস্তকালয়ের সাধারণ কার্য্য বন্ধ থাকিবে।

২। পরিষদের পাঠগৃহে বসিয়া যে কোনও ব্যক্তি উক্ত সময়ের মধ্যে যে কোনও পুস্তক দেখিতে ও পড়িতে পাইবেন, পড়িবার জন্য তাঁহাকে স্বাক্ষর করিয়া পুস্তক লইতে হইবে এবং পুস্তকালয় বন্ধ হইবার পূর্ব্বে গৃহীত পুস্তক প্রত্যর্পণ করিতে হইবে।

৩। পরিষদের সভ্য ব্যতীত অপর কাহাকেও পুস্তক গৃহে লইয়া যাইতে দেওয়া হইবে না। সভ্যের দেয় অগ্রিম) চাঁদা বার্ষিক অন্যূন ৩৲ তিন টাকা।

৪। কোনও সভ্যকে একসময়ে দুইখানির অধিক পুস্তক গৃহে লইয়া যাইতে দেওয়া হইবে না।

৫। এক খণ্ড পুস্তকের জন্য ৪৲ (চারি টাকা) এবং তদতিরিক্ত প্রত্যেক খণ্ডের জন্য ২৲ (দুই টাকা) পরিষদে জমা দিতে হইবে। উক্ত জমার টাকা ইচ্ছামত তুলিয়া লইতে পারা যাইবে, কিন্তু টাকা তুলিয়া লইলে আর পুস্তক দেওয়া হইবে না।

৬। দুর্মূল্য বা দুষ্প্রাপ্য পুস্তক কাহাকেও গৃহে লইয়া যাইতে দেওয়া হইবে না, এবং নিয়মিতভাবে চাঁদা আদায় না হইলে পুস্তক-প্রদান বন্ধ করা যাইবে।

৭। পুস্তক-বিশেষের জন্য (অর্থাৎ মূল্যবান্ অথচ দুষ্প্রাপ্য নহে এরূপ স্থলে) গ্রন্থাধ্যক্ষ স্বয়ং বিবেচনাপূর্ব্বক ৪৲ চারি টাকার অধিক জমাও দাবী করিতে পারিবেন।

৮। কোন সভ্যই একযোগে এক মাসের অধিক কাল কোনও পুস্তক রাখিতে পারিবেন না।

৯। যদি কোনও পুস্তক হারাইয়া যায় বা ব্যবহারের দোষে কোনরূপে পুস্তকের কোন ক্ষতি হয় তবে উহা যথাযথভাবে পুনঃ-স্থাপনের জন্য সমগ্র ব্যয় যে গ্রহীতার ত্রুটীতে ঐরূপ হইবে তাঁহাকে বহন করিতে হইবে।

১০। পুস্তক-গ্রহণকালে গ্রহীতাকে দানাদান-পুস্তকে স্বয়ং স্বাক্ষর করিতে হইবে, যদি তিনি অনুপস্থিত হন তবে তাঁহার স্বাক্ষর-সংযুক্ত পত্র প্রতিনিধির হস্তে পাঠাইতে হইবে। অন্যথা পুস্তক দেওয়া হইবে না।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Sanskrit Sahitya Parishad

(Registered under Act XXI of 1860)

The Sanskrit Sahitya Parishad is an academy of Sanskrit literature, established in Calcutta in 1916 for the cultivation and diffusion of Sanskrit learning and culture. It is a duly registered association. It

(1) Arranges for meetings and disquisitions in Sanskrit.

(2) Holds regular classes in the old style.

(3) Awards stipends to deserving students of the attached *Tol*.

(4) Possesses a very large library of printed Sanskrit books and rare manuscripts. [About 4900 books + 3200 MSS.]

(5) Stages Sanskrit dramas. [26 dramas staged.]

(6) Conducts a Sanskrit monthly. [Vol. XIX continues.]

(7) Makes cheap publications of unpublished works in an up-to-date fashion. [20 books published.]

The association started with *thirty* members, and during the last twenty years the number has risen to about *one thousand*, who hail from all parts of India. It has been receiving Government and Corporation grants.

Privileges of a Member :

A member (1) is generally invited to all functions, (2) witnesses dramatic performances, (3) uses the books of the Parishat Library. (4) gets a monthly Sanskrit journal free and (5) receives the publications at concession rates.

The subscription of a member is not less than *three rupees* a year, *which should be paid in advance.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

Vol. XIX, No. 2] [June, 1936.

१८५८ शकीये ज्यैष्ठे १९श-वर्षस्य २य-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः —

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

ंस्कृत-साहित्य-परिषत्,
ामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Some Publications in the

Sanskrit Sahitya Parishad Series

1. **Kali-tantram**—(कालीतन्त्रम्)—Edited by **Pandit Sati Chandra Siddhantabhushana** with an original commenta and Bengali translation.—Demy 8 vo, pp. 82. 1922.

As. 10 & As. 8 (for membe

2. **Sankari-Sangitam**—(शङ्करी-सङ्गीतम्)—by Jayanārāyan Songs to the goddess Śankarī after *Gītagovinda of* Jayadev Edited by **Pandit Dakshina Charan Bhattacharya.**—Den 8 vo, pp. 32. 1923. As.

3. **Muktivadah**—(मुक्तिवादः)—by Gadādhara Bhatt charya. Edited by **Pandit Kalipada Tarkacharya** with learned introduction, two commentaries and Bengali elucid tion. It describes the theory of emancipation according t the *Navya* (modern) Naiyayika School.—Crown 16 mo, pp 242. 1924. Rs. 2 & Re. 1 As.

4. **Durgapuja-tattvam**—(দুর্গাপূজা-তত্ত্বম্)—by Raghu nandana Bhattāchārya. Edited by **Pandit Satish Chandr Siddhantabhushana** with a valuable introduction containi the history of, as well as various information about the gre autumnal festival of the goddess Durgā.—Demy 8 v pp. 134. 1924.

Re. 1 As. 4 & Re.

5. **Pitridayita**—(पितृदयिता)—by Aniruddha Bhatta, Gu of Ballālasena. Edited by **Pandit Dakshina Charan Bhatt charya.** It is a work on Śrāddha, etc., of the Sāmavedin It shows that even at the time of Ballālasena Śrāddhas we performed in the presence of Sāgnika Brāhmanas instea of their symbolic substitute—*Kuśa-grass*.—Demy 8 v pp. 102. 1924.

Re. 1 As. 4 & Re.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

June, 1936. | १८५८-शकीये ज्यैष्ठे १९श-वर्षस्य २य-संख्या | Vol. XIX No. 2

कलिवर्ज्यविमर्शः *

[निबन्धकः—श्रीबटुकनाथकाव्यतीर्थः एम् ए, बि एल्]

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

युगेऽस्मिन् संप्रवृत्ते नानासम्प्रदायसङ्कुले प्राचीनविचाररीति-विपरीतमतिभिः समन्तात् परिव्याप्ते, बहुधा विवदमानेष्वपि विद्वत्सु, दुर्निरूपं धर्मस्वरूपमिति निर्विवादम् । स्थितेऽप्येवं नानासिद्धान्तबन्धुरायां धर्मतत्त्वालोचनसरण्यां सत्यमेवाद्वितीयं शरणमिति धीमद्भिरनायासेनैव समुपलभ्यते । हेमाद्रिनिबन्धस्मृतिचिन्तामणौ कलिधर्मप्रकरणे विवृण्वन्निममेवार्थं वर्त्तते कश्चिच् श्लोको यथा—

न विद्वत्ता न शुद्धोऽर्थो न शुद्धिर्मनसः कलौ ।
यतोऽतः सत्यमेवैकं नराणामुपकारकम् ॥

विवृतान्यपि पुरा निबन्धकृद्भिरधुना तावदसाकल्येन साम्प्रदायिक-

* कलिकाता-विश्वविद्यालयप्रदत्त-योगेन्द्रचन्द्रघोष-ल-रिसार्चपुरस्कारप्रबन्धतः संकलितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्या च प्रायशः कलिवर्ज्यानि विचार्यन्ते। तद् यथा सकलशास्त्रपारावारीणैः निखिलं वाङ्मयं हस्तामलकवत् पश्यद्भिस्तत्रभवद्भिर्विद्वद्भिरेतद्विषयकम् अविचारितपूर्वं विचार्यजातं समाधानं नेष्यते तदभिप्रायेण किमप्यत्र प्रास्ताविकम् उपस्थाप्यते।

युगभेदेन धर्मभेदः।

जगत्-संसृतिप्रभृतिपर्यायभूते परिदृश्यमानेऽस्मिन् सृष्टिप्रवाहे नियतपरिवर्त्तनधर्मिणि क्रियास्वरूपस्य धर्मस्यापि परिवर्त्तनशीलत्वं सुतराम् आयात्येव। धर्मद्रष्टृभिः शास्त्रकृद्भिरपि तद् बहुशः समुद्घोषितम्। तथाहि—

अन्ये कृते युगे धर्मास्त्रेतायां द्वापरेऽपरे।
अन्ये कलियुगे नृणां युगह्रासानुसारतः।
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।
द्वापरे यज्ञमेवाऽऽहुर्दानमेकं कलौ युगे॥

इत्येवं बहूनि वचनानि स्मर्यन्ते। हेतुश्चात्र युगपरावृत्त्या द्रव्याणां पुरुषाणां कर्मणाञ्च वैलक्षण्यमेव। युगधर्मप्रसङ्गे "पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते।" इति मनुवचनवदन्यान्यपि युगधर्मपराणि परिलक्ष्यन्ते वचनानि। परन्तु तेषां सर्वेषामेव वचनानां विषयाः साकल्येन कलिवर्ज्यप्रकरणे नैवोपनिबद्धाः—इति शास्त्रविदां सुविदितमेवाऽऽस्ते। निर्णयसिन्धुकृता भट्टकमलाकरेणापि—

"यस्तु कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे।
पापप्रसक्ताश्च सदा कलौ नार्यो नरास्तथा॥

इत्यादित्यपुराणवचनेन यद्यपि कृतयुगसम्बन्धि धर्मसामान्यं निषिद्धम् तथापि सर्वस्य तस्य निषेद्धुमशक्यत्वं" स्पष्टीकृतम्। परन्तु वचनबलेन स्पष्टं कलिवर्ज्यत्वेन अनिर्दिष्टानामपि बहूनां धर्माणाम् एतत्कोट्याम् अन्तर्भावो युक्तः प्रतीयते आचारपरम्परापर्यालोचनेन।

कानि कति वा कलिवर्ज्यानि।

अथ कानि तावत् कलिवर्ज्यानीत्यपेक्षायाम्—श्रौतकर्मा-श्रमधर्मा-शौच-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायश्चित्त-व्यवहारात्मक-कोटिचतुष्टये संविभज्य तान्यत्र प्रदर्श्यन्ते। पुरत एव तत्र श्रौतकर्माणि तदानुषङ्गिकाणि चोल्लिख्यन्ते—यथा अग्निहोत्रं त्रेता-परिग्रहापरपर्यायम्, प्रजारणिपरिग्रहः, लीढापरिग्रहः, मुखाग्निधमनम्, नर-मेधाश्वमेधकौ, राजसूयो गोमेधश्च, शामित्रम्, सौत्रामणीसुराग्रहः, सोमविक्र-यणम्, सत्रदीक्षा चेति द्वादशसंख्यकानि। अथ विंशतिसंख्यकान्यपराणि आश्रमधर्मकोट्यामन्तर्भावमर्हन्ति—यथा दीर्घकालं ब्रह्मचर्यम्, नैष्ठिकब्रह्म-चर्यम्, गुरुदारेषु गुरुवद्वृत्तिः, दक्षिणा गुरुचोदिता, कमण्डलुचर्या, उच्छिष्टा-पवर्जनम्, अश्वस्तनिकता, द्विजातीनामापद्वृत्तिः, शूद्राणां पाचकत्वम्, शूद्र-पक्वान्नभोजनम्, गृहिणां दीर्घप्रवासित्वम् दूरतीर्थयात्रा च, वानप्रस्थ-संन्यासौ, महाप्रस्थानगमनम्, भृग्वग्निमरणम्, सार्ववर्णिकं भैक्ष्याचरणम्, यत्रसायं-गृहस्थत्वम्, सधर्मकप्रतिमापूजा, वरातिथिपितृभ्यः पशूपाहरणञ्चेति।

एवं शौचप्रायश्चित्ताधिकृतानि चतुर्दश। यथा गोतृप्तिशिष्टपयसाचमनम्, नवोदके दशाहम्, अघसंकोचनम्, अस्थिसञ्चयनोर्ध्वाङ्गस्पर्शनम्, विप्राणां मरणान्तिकप्रायश्चित्तविधानम्, परोद्देशात्मसंत्यागः, पापिसंसर्गदोषः, स्तेयान्यमहापातकनिष्कृतिः, सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि, बलात्कृतासंग्रहः, गुरुस्त्रीत्यागः, मद्यपानम्, समुद्रयात्रा, शोधितनौयातृसंग्रह-श्चेति। व्यवहारकोट्यां तावद् "विवाहपूर्वो व्यवहारः" इति न्यायानुसारेण मातुलकन्यापरिणयनम्, असवर्णाविवाहः, नियोगो विधवाविवाहश्च निवेश्यानि, तथा पितापुत्रविरोधे साक्षिदण्डः, दत्तौरसेतरपुत्रस्वीकारः, ज्येष्ठांशः, हीनसप्तमभक्तहरणं च एवं साकल्येन अष्टसंख्यकानि।

व्याख्याने विप्रतिपत्तयः।

प्रायशो यद्यपि निबन्धकारैर्न्यूनाधिकतया कलिवर्ज्यानामुद्धृताना-माचाराणां नामानि समुल्लिखितानि, तथापि तेषां स्वरूपनिरूपणे नाना-विकल्पा एव तैरुपन्यस्ताः।

तद् यथा "उच्छिष्टस्यापवर्जन"मित्यत्र भट्टकमलाकरेण "उद्दिष्ट-स्यापि वर्जनम्" इति पाठान्तरं कल्पयित्वा विप्रतिपत्तयः समुत्थापिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव "चत्वार्यब्दसहस्राणि" इत्यादि व्यासवचने "त्रेतापरिग्रहः" संन्यासश्च समानार्थकतया कैश्चिद् गृहीतौ। धर्मसिन्धुकारेण तु 'त्रेतापरिग्रहस्य अग्निहोत्रस्वीकार एवार्थः प्रदर्शितः। अपरश्च—स्मृतिकौस्तुभकारेणानन्तदेवेन "प्रतिमाभ्यर्च्चनार्थाय सङ्कल्पश्च सधर्मकः" इत्यस्य व्याख्याने प्रमाणमनुल्लिख्यैव अभ्यर्च्चनापदस्य देवतासाक्षात्कारोद्देश्यकम् अर्च्चनमित्थं व्याचचक्षे। निर्णयसिन्धुकारस्य वेतनग्रहणपूर्वकं प्रतिमापूजनमिति व्याख्यानञ्च तेन पर्युदस्तम्। अपरार्कधृतब्रह्मपुराणवचने "धारणञ्च कमण्डलो"रिति स्नातक-वनि-यतिषु साधारणमिति धर्मसूत्रेभ्यः स्पष्टम्। तथापि मदनपारिजातकारः कमण्डलुरिति नैष्ठिकब्रह्मचर्यमित्याह। वानप्रस्थबोधकमेतत् पदमित्यपरे। दीर्घकालब्रह्मचर्यपरमिति दामोदरभट्टः कलिवर्ज्यविनिर्णये। यच्च कमण्डलुरिति संन्यासवाचकम् इति केचित्तदपि न समीचीनम्, अपरार्केण उद्धृते

"गोपशुं देवरात् पुत्रं सत्रयागं कमण्डलुम्।
सुराप्रयोगं भिक्षुञ्च न कुर्वीत कलौ युगे॥"

इति वचने तयोः पृथङ्निर्द्देशात्। एवं संन्यासनिषेधस्य तात्पर्यविवृतावपि। अनेन ब्राह्मणेतरेषां संन्यासेऽनधिकारिता कलियुग इति केचित्। विविदिषा संन्यासप्रतिषेध इत्यपरे। त्रिदण्ड-संन्यासमात्रस्य बाध इत्यन्येऽपि। काषायदण्डधारणप्रतिषेध इति स्मृतिमुक्ताफलाख्यदाक्षिणात्यनिबन्धकृतो वैद्यनाथदीक्षिताः। परन्तु काषायस्य एकदण्डस्य च धारणं सर्वत्राधुना प्रचलतीति तद्व्याख्यानमपि विचार्यम्।

कलिवर्ज्यनिषेधकालानुमानम्।

एते कलिवर्ज्यनिषेधाः कदा कथं वा प्रादुरासन्नित्यद्यापि मनीषिभिः सम्यक्तया न निरणायि।

"विहितान्यपि कर्माणि धर्मलोपभयाद् बुधैः।
समयेन निवृत्तानि साक्ष्यभावात (साध्वभावात) कलौ युगे॥"

इति चतुर्वर्गचिन्तामणिधृतवचनमत्रावधेयम्। परन्तु एतद्वचनस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"समापने निवृत्तानि" इत्यनाकरम् पाठान्तरं उररीकृत्य कमलाकरभट्टादयोऽर्वाचीना निबन्धकाराः तद्बलेनैव जनमेजयाश्वमेधसमाप्तौ एते निषेधाः प्रवर्त्तिता इत्यकल्पिषत। ततश्च "तेन द्रोणादीनां वधे कथं पाण्डवानां कलिमध्ये दोषो नास्तीति" आशङ्कानिरासे कृतो वितथाभिनिवेशः। वस्तुतस्तु कलिवर्ज्यविधानस्य सुतराम् अर्वाचीनत्वं बहुभिः प्रमाणैः साधयितुं शक्यते।

"ब्राह्मणप्रचारादनन्तरं उपनिषत्सूत्रस्य वेदान्तिमतस्य प्रचारात् पूर्वं धर्मज्ञैर्धर्मव्यवस्थापनं कृतम्। अर्वाचीनवेदान्तिमतप्रचारकाणां शङ्करभगवत्पादादीनां व्यवस्थापनादर्वाग् न किमपि धर्मशास्त्रसंस्करणं प्रवृत्तमिति" यत् केचनाधुनिकाः पण्डितमुख्या मन्यन्ते, तदपि न विचारं सहते इति मन्महे। प्रथमतस्तावत् कोऽयं ब्राह्मणवेदान्तयोरन्तरालस्थः काल इति निर्द्धारयितुं न शक्यते। कलिवर्ज्यव्यवस्थापनं समग्रमेव स्वल्पकालाभ्यन्तरे समम् उदभवत् इति नैव सम्भावनीयम्। परन्तु कालवशात् क्रमेणैते निषेधाः प्रवर्त्तिता इत्युपरिष्टात् प्रतिपादयिष्यते। श्रीमच्छङ्करपादेभ्योऽप्यर्वाक् केचन निषेधा मनीषिभिः कृता इति च निबन्धग्रन्थपरीक्षणाद् निर्णीयते। तथा ब्राह्मणग्रन्थेष्वेव केषाञ्चनाऽऽचाराणां निषेधः सूचितपूर्व इति स्पष्टम्। अश्वमेधस्य उत्सन्नयागत्वं तैत्तिरीयसंहितायां (५-४-१२-६) शतपथब्राह्मणे (१३-३-३-६) चाऽऽम्नातम्। ऋङ्मन्त्रेष्वेव गौरघ्न्येति षोडशकृत्वोऽभिहितम्। श्रूयते च गोवृषभयोरनाद्यत्वं शतपथब्राह्मणे (३।१।२१)। मांस-द्यूतयोः साकं सुराप्यसकृन्निन्दिता। सौत्रामण्यां सुरापानार्थं राजन्यवैश्ययोः प्रतिनिधिकल्पनं समाम्नातं शतपथब्राह्मणे (१२।८।१।६)। तथा ब्राह्मणेतरेषां सुरापानेऽनुमतेऽप्यनिष्टफलकत्वम्। कमण्डलुचर्यां प्रकृत्य बौधायनेन कृतायाः—

"ततः शौचं ततः पानं सन्ध्योपासनमेव च।
निर्विशङ्केन चित्तेन य इच्छेच्छुभमात्मनः॥"
कुर्याच्छुद्धेन मनसा न चित्तं दूषयेद् बुधः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति कारिकाया एतदाचारस्य शुद्धिविषये अतिप्राचीनादेव कालाच्छिष्टानाम् अन्तरे शङ्काया अस्तित्वम् अवगम्यते ।

अर्वाचीनानां स्मृतीनां पुराणानाञ्च निर्मितिकालो दुर्निरूप इति सत्यम्—तथापि तेषां पौर्वापर्यनिर्णये निबन्धकृद्भिरुद्धृतानां श्लोकानां परीक्षणमेव फलोपधायितया सर्वथा समुपयुज्यत इति सुविदितम् । इसवीय-नवम-शतके विश्वरूपेण रचितायां बालक्रीडाभिधयाज्ञवल्क्यटीकायां कलिवर्ज्यानि नोल्लिखितानि । अधुनोपलभ्यानां निबन्धानां मध्ये द्वादशशतके सङ्कलितेषु ग्रन्थेष्वेव तानि क्रमेणोदभवन्निति प्रेक्षावद्भिरवधेयम् । मिताक्षरायां

"यथा नियोगधर्मो नो नानुबन्ध्यावधोऽपि वा ।
तथोद्धारविभागोऽपि नैव संप्रति वर्त्तते ॥"

इत्येकमेव वचनम् । एवम् अपरार्ककृतटीकायां चत्वारि वचनानि—तत्रैव क्रतुवचनबलाद् भिक्षुनिषेधः प्रथमं परिदृश्यते । क्रतुवचनान्तराण्युद्धृतवतापि विज्ञानेश्वरेण नैतस्य वचनस्य कृतः समुल्लेख इति चित्रम् । एतन्निषेधस्य भगवच्छङ्करपादेभ्योऽर्वाचीनत्वं सुतराम् अङ्गीकार्यम् । जम्बुद्वीपस्य चतुष्कोणेषु वैदिकधर्मोत्तम्भने स्तम्भसमानानां चतुर्णां मठानां तथा स्वाधिष्ठानपवित्रस्य काञ्चीकामकोटिपीठस्य प्रतिष्ठापकैरक्षय्यकीर्त्तिभिस्तैः बौद्धयुगादथ परिक्षीणप्रभावेण श्रौतधर्मेण साकं दशनामिसम्प्रदायपरिरक्षितः संन्यासाश्रमः पुनर्दृढीकृत इति सुविदितम् इतिवृत्तविदाम् । एतत्सम्प्रदाये क्वचित् क्षत्रियवैश्या अपि गृहीतसंन्यासाः स्थानं लभन्ते इत्यवगतमेव विदितवेदितव्यानाम् ।

कलिवर्ज्यनिषेधाः क्रमेणाऽऽपतिता इत्युक्तम् । कथमिति चेत्—दिङ्मात्रमत्र प्रदर्श्यते । केचन निषेधाः सूक्ष्मतया मन्त्रब्राह्मणयोः धर्मसूत्रेषु च सूचिता इति पूर्वमेवोपन्यस्तम् । परन्तु एतेषु ग्रन्थेषु कलियुगावच्छेदेन निषेधा कल्पिता इति नैव सम्भावयितुं शक्यते । न हि कालविभागपरः कलिशब्दो मन्त्रात्मकश्रुतिषु दृश्यते । वाजसनेयिसंहितायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतपथब्राह्मणे च प्रयुक्तोऽपि अक्षदेवनाङ्गमेव गमयति। षड्विंशब्राह्मणे च पुष्य-द्वापर-खर्वकृत-शब्दा युगविशेषान बोधयन्ति।

कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चलन्॥

इति यद् ऐतरेयब्राह्मणे तच्च मनुष्यप्रयत्नाधीनव्यापारान अभिप्रैति इत्याहुर्वेदार्थविदः। मानवसंहितायां महाभारते च बहुत्र दृष्टोऽयं श्लोकः, परिवर्त्तितोऽप्यंशतः, राजा कालस्य कारणमित्यर्थं प्रतिपादयति। पूर्वतनापेक्षया अर्वाक्तनजनानाम् अपकृष्टत्वं धर्मसूत्रेषु बहुधा विवृतमास्ते। "तस्मादवरेषु ऋषयो न जायन्ते नियमातिक्रमात्"इत्यापस्तम्बः। "दृष्टो धर्मव्यतिक्रमः साहसञ्च महताम् न तु दृष्टार्थेऽवरदौर्बल्यात्" इति गौतमः। "दृष्टो धर्मव्यतिक्रमः साहसञ्च पूर्वेषाम् तेषां तेजोविशेषेण प्रत्यवायो न विद्यते। तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः" इत्यापस्तम्बः। तथा बौधायनकृतकारिकायाम्—

अनुष्ठितन्तु यद्देवैर्मुनिभिर्यदनुष्ठितम्।
नानुष्ठेयं मनुष्यैस्तदुक्तं कर्म समाचरेत्॥

एवं नियोगं प्रकृत्य—"तदिन्द्रियदौर्बल्याद् विप्रतिपन्नम्" इति आपस्तम्बः। तथैव स्मृतिचन्द्रिकाधृता बौधायनकारिका—

विधिर्योऽनुष्ठितः पूर्वं क्रियते नेह साम्प्रतम्।
पुराकल्पः स विज्ञेयो विधवाया नियोजनम्॥

अधुनालभ्या मानवधर्मशास्त्रस्य भार्गवी संहिता सोमविक्रेतुः समुद्रयातुश्च अपाङ्क्तेयत्वं विदधती तथा नियोगं विधवाविवाहञ्च गर्हयन्त्यपि, युगावच्छेदेन कलिवर्ज्यानि नैव उल्लिखतीति विदुषां गोचरमेव। प्रचलत्यस्मिन् युगे श्रौतकर्मादीनां विपर्यासो भविष्यद्वर्णनामुखेन महाभारतादिपुराणे बहुत्र प्रदर्शितः। तथाहि वनपर्वणि

वेदाचाराः प्रशाम्यन्ति धर्मयज्ञक्रियास्तथा।
निवृत्तयज्ञस्वाध्याया दण्डाजिनविवर्जिताः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निर्त्रेता त्रयीविद्या यज्ञाश्च सहदक्षिणाः ।
सर्व एव प्रमाद्यन्ति यदा राजा प्रमाद्यति ॥

एवं मात्स्येऽपि—

आश्रमाणां विपर्यासः कलौ संपरिवर्तते ।

एवं वायवीये कौर्मेऽपि। एतादृशं भविष्यद्वर्णनम् पौराणिकीं शैलीमेव प्रकटयति, वस्तुतस्तु भूतवर्णनमेवैतदिति मन्यन्ते आधुनिका ऐतिहासिकाः। इसवीयाब्दसाहस्र्यां प्रायशोऽधुनालभ्यानि पुराणानि व्यरचयन्त इत्यपि तैरनुमीयते। एतस्मिन् कालाभ्यन्तरे पुरुषप्रवृत्तिविपर्ययाद् बौद्धमतप्रसाराच्च हेतोः, श्रौताचाराणाम् अपचयः समपद्यतेति सुपरिज्ञातम्। इमामवस्थां निराकर्त्तुं भट्टकुमारिलो भुवि प्रादुरासीत्। तथाहि माधवीये शङ्करदिग्विजये—

श्रुत्यर्थकर्मविमुखान् सुगतान् निहन्तुं
जातं गुहं भुवि भवन्तमहं नु जाने ॥

अनेन महात्मना तथा शङ्करावतारेण भगवताचार्यपादेन वेदोदिताग्निहोत्रादिकर्मप्रवर्त्तने यतिधर्मव्यवस्थापने च कृतेऽपि लोकातिगे प्रयत्ने, दुरतिक्रमतया कालप्रभावस्य, उत्तरोत्तरं प्रसाराच्च म्लेच्छाधिकारस्य श्रौताचाराः पुनरपि सङ्कोचमापुरित्यनायासेनानुमीयते। राजसूयाश्वमेधनिषेधपर्यालोचनमपि द्रढयत्यदोऽनुमानम्। म्लेच्छाधिकारात् पूर्वं काले काले प्रादुर्भवत्सु चक्रवर्त्तिगुणोपेतेषु नानादेशविजेतृषु भूपेषु अश्वमेधानुष्ठानं परम्परया प्रावर्त्ततेत्यैतिह्यवादाः प्रमाणम्। इसवीयचतुर्थशतके चिरोत्सन्नाश्वमेधस्याऽऽहर्त्ता समुद्रगुप्तः, पञ्चमशतके विक्रमादित्यपुत्रः प्रथमकुमारगुप्तः, षष्ठशतके कीर्त्तिवर्मा पुलकेशी च अश्वमेधानुष्ठातारोऽभवन् राजानः प्रथितनामानः इति शिलालिपिप्रभृतितो ज्ञायते। द्वादशशतके पृथ्वीराजप्रतिबलेन जयचन्द्रभूपेनापि अश्वमेधोऽनुष्ठित इति राजस्थानेतिवृत्ततोऽवगम्यते। विज्ञानेश्वरेणानुद्धृतम् अश्वमेधनिषेधकं ब्रह्मपुराणीयवचनम् अपरार्केण उद्धृतं सदेतत्समय एव प्रचारमापेत्यनुमीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥
संन्यासश्च न कर्त्तव्यो ब्राह्मणेन विजानता ॥

इति व्यासवचनञ्च इसवीयद्वादशशतकस्यान्तिममेव श्रौताचारविच्छेद-कालत्वेन सूचयति।

कलिवर्ज्यप्रामाण्यविमर्शः।

कलिवर्ज्यविधानस्य कुतस्त्यं प्रामाण्यमिति प्रश्ने प्राधान्येन धर्मज्ञानां समय एवेत्युत्तरं सङ्गच्छते। तथाहि इसवीयद्वादशशतकस्यान्तिमे भागे श्रीधरेण संकलिते स्मृत्यर्थसाराख्ये निबन्धे कलिवर्ज्योपोद्घाते—

समयाचरिता धर्मा जातिदेशकुलोद्भवाः।
ग्रामाचाराः परिग्राह्या ये च विध्यविरोधिनः ॥
युगधर्माः परिग्राह्याः सर्वत्रैव यथोदितम् ॥

उपसंहारे च तत्रैव—

कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः।

स्मृतिचन्द्रिकाकारेणापि "तथान्येऽपि धर्मज्ञसमयप्रमाणमाहु"रित्युपक्रम्य—

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्त्तितानि कर्माणि प्रतिज्ञापूर्वकं बुधैः ॥
समयश्चापि साधूनां प्रमाणं वेदवद् भवेत्।

इत्येतैश्चरणैरुपसंहृतं कलिवर्ज्यवचनकदम्बकम्। एतदुभयत्र स्मृतिपुराणानामनुल्लेखो विशेषतोऽवधानमर्हति।

"अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः" इति प्रतिज्ञाय "धर्मज्ञसमयः प्रमाणं वेदाश्च" इति सूत्रितम् आपस्तम्बेन। वसिष्ठोऽपि "देशजातिकुलधर्माञ्श्रुत्यभावादब्रवीन्मनु" रित्याह। एतेन मानवधर्मस्यापि सामयिकं मूलमनुमीयते। कात्यायनोऽप्याह—"विद्वन्मतमुपादाय ममाप्येतद्धृदि स्थितम्"। "न धर्माधर्मौ चरत आवां स्व इति। यम् आर्याः क्रियमाणं प्रशंसन्ति स धर्मः, यं वा गर्हन्ति सोऽधर्म इत्यन्यत्रापि आपस्तम्ब-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मसूत्रेषु। सूत्रसंहितादिभिर्विधिनिषेधेषु सुनिर्णीतेष्वर्वाचीने काले समयधर्म प्रामाण्यं दुर्बलम् अभवदित्यनुमीयते, प्रायशो भार्गवसंहितादिष्वनुल्लेखात्।

"कलौ पाराशरः स्मृतः" इति वचनाद् एतद्युगे पराशरस्यैव धर्मव्यवस्थापकत्वम् अङ्गीकार्यम्। पञ्चस्वापत्सु नारीणां पत्यन्तरविधानम्, चतुर्विधपुत्रव्यवस्थापनञ्च तेन कृतम् इति शास्त्रविदां विदितमेव। परन्तु कथमेतद्व्यवस्थापनं प्रतिरुद्धप्रसरमभूदिति प्रश्ने समयधर्मेणैव इत्युत्तरं सङ्गच्छते। श्रीधरदेवन्नभट्टाभ्यां अर्वाक्तनैर्निबन्धकारैः समयधर्मप्रामाण्यम् अपर्याप्त मन्वानैर्बृहन्नारदीयादित्यपुराणप्रभृतिवचनानि प्रमाणत्वेन स्वीकृतानि। एतेषाम् उपपुराणवचनानां पदविन्यासे परीक्षिते स्मृत्यर्थसारस्मृतिचन्द्रिकाधृतानि समयधर्मविवरणानि वचनान्येव तन्मूलानि प्रतिभान्ति। अपरञ्च—श्रौतस्मार्त्तविधीनां सङ्कोचे पुराणवचनानां प्रभुता वर्त्तते न वा तदपि विचारमपेक्षते। उक्तं हि व्यासेन—

श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते।
तत्र श्रौतं प्रमाणन्तु तयोर्द्वैधे स्मृतिर्वरा॥

मित्रमिश्रेण तावत् स्पष्टमेव सिद्धान्तितम् "क्वचिद् दुर्बलेनापि सबलं बाध्यते। यथा सौत्रामण्यां सुराग्रहान् गृह्णातीति श्रुतिः कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः" इति वचनेन, अन्यथा निर्विषयत्वापत्तेः"।

वस्तुतस्तु एते निषेधाः यथाश्रुतं विभिन्नप्रदेशीयशिष्टसम्प्रदायैर्नैव परिगृहीता इति परिस्थितिपर्यालोचनेन स्पष्टमेव परिलक्ष्यते। ततश्च "आचारः परमो धर्मः" इति तत्त्वमेव सर्वोपरि वरीवर्ति। उक्तं च—

यस्मिन् देशे य आचारः पारम्पर्यं कुलस्थितिः।
स शास्त्रार्थबलान्नैव लङ्घनीयः कदाचन॥

प्रकृष्टोदाहरणमत्र दाक्षिणात्यानां मातुलकन्यापरिणयनम्। पञ्चधा विप्रतिपत्तिरित्युपक्रम्य बौधायनेन मातुलकन्यापितृस्वसृदुहितृगमनमुदाहृतम्। अर्वाचीनैर्बहुभिः स्मृतिकारैर्निबन्धकारैश्च बहुधा निषिद्धोऽयमाचारस्तत्तद्देशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव दोषाय कल्पते इति सुविदितम्। प्रादेशिकनिबन्धकारैः स्मृतिपुराणवचनान्युद्धृत्य परिस्थितिरेव समर्थिता, कलिवर्ज्यविषयश्च बहुधा सङ्कोचम् आपादिताः। यथा संन्यासाग्निहोत्रनिषेधे "चत्वार्यब्दसहस्राणि" इति व्यासवचनम्—

> यावद् वर्णविभागोऽस्ति यावद्वेदः प्रवर्त्तते।
> संन्यासश्चाग्निहोत्रश्च तावत् कुर्यात् कलौ युगे॥

—इति देवलवचनेन प्रतिप्रसूतम्।

एवं स्थिते कलिवर्ज्यव्यवस्थापनेन किं तावत् प्रतिपादितमिति विचारपथमधिरोहति। एते च निषेधा इति वार्त्तिकानुसारिणः, निबन्धानुसारिणस्तु धर्मविप्लवापत्तेरेते पर्युदासा एवेति मन्यन्ते। एकतरकल्पाश्रयणेन सर्व एव निषेधाः सुष्ठु न व्याख्यातुं शक्यन्ते। क्वचित् प्रसज्यप्रतिषेध एव यथा मद्यमित्यत्र। क्वचिच्च पर्युदास एव यथा ज्येष्ठांशविषये दत्तौरसेतरपुत्रस्वीकारविषये वा। क्वचित् कल्पद्वयमेव प्रसज्येत, यथा नियोगेऽसवर्णविवाहे च। परन्तु मातुलकन्यापरिणयनिषेधे पितापुत्रविरोधे साक्षिदण्डनिषेधे वा कतरस्तावत् कल्पः सङ्गच्छते तच्चिन्त्यम्।

यत्तु कैश्चित् सूक्ष्ममतिभिराधुनिकैः पण्डितप्रवरैः कल्पितम् एतैर्निषेधैः काम्यानि तथा नित्यनैमित्तिकेषु वैकल्पिकानि च कर्माणि निवर्त्तितानि न तु कुत्राप्यवश्यकर्तव्यानीति तदपि विचार्यम्। अग्निहोत्रस्य स्नातकस्य कमण्डलुचर्याया वा अवश्यकर्त्तव्यत्वे नास्ति विप्रतिपत्तिरिति मन्यामहे। कलिवर्ज्यवचनानि केवलं कठोरतराचारप्रवर्त्तकानि न तु शिथिलतराचारप्रणोदकानीति यदुच्यते, तदपि विचारमपेक्षते—संसर्गदोषस्य अयोनिसंगृहीतगुरुस्त्रीपरित्यागस्य च निरासदर्शनात्।

महामहोपाध्याय-रघुनन्दन-भट्टाचार्यादिभिः प्रामाणिकनिबन्धधिया बहुत्र समुद्धृते विद्याकरवाजपेयिकृते नित्याचारपद्धतिग्रन्थे कलिवर्ज्यप्रामाण्यमधिकृत्य यत् सिद्धान्तितं तदपि निपुणम् अवधीयतां धीमद्भिः। स्पष्टमेव लिख्यतेऽस्मिन्नुतकलीयनिबन्धे—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्तु कलियुगे कमण्डलुधारणनिषेधः स प्राप्तप्रतिषिद्धत्वाद् विकल्पः स्यादिति न्यायेन विकल्पपर एव न्याय्य इति। एवं सुराग्रहहोमोऽग्नि-वेदापेक्षाशौचसङ्कोचवर्जनोक्तिश्च विकल्पार्थः। यत्तु देवरेण सुतोत्पादनं दत्तकन्यायाः पुनः श्रेयसे दानम्, यज्ञ-मधुपर्कयोर्गोवधः असवर्णस्त्री-विवाहो दत्तौरसेतरपुत्रग्रहः' इत्येते कलौ वर्ज्या इत्युक्तम् तदतिप्रसक्ति-वारणार्थमेव, विहितप्रतिषेधायोगात्। तेन तत्करणे न दोषः। एवं वान-प्रस्थाश्रमदीर्घकालब्रह्मचर्य-मरणान्तिकप्रायश्चित्तानां यद् वर्जनं तदल्प-सत्त्वत्वान्मनुष्याणां तेषामसम्भवादर्थवादमात्रमित्युक्तम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुरूपोक्तयः

[पूर्वानुवृत्ताः]

[निबन्धकः—श्रीद्विजेन्द्रनाथगुहचतुर्धुरीणः]

"आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयो भूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति ॥"
(उत्तरचरिते, ४।१८) ।

'सक्तुमिव तितउना पुनन्तो
यत्र धीरा मनसा वाचमक्रत ।
अत्रासखायः सख्यानि जानते
भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥"
ऋग्वेदे, १०।७१।२) ।

"वत्सायाश्च रघूद्वहस्य च
शिशावस्मिन्नभिव्यज्यते ।
सम्पूर्णप्रतिबिम्बितेव
निखिला सैवाऽऽकृतिः सा द्युतिः ॥"
(तत्रैव, ४।२२) ।

"रूपं तदोजस्वि तदेव वीर्यं
तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वाद् बिभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥"
(रघुवंशे ५।३७) ।

"यदृच्छासंवादः किमु किमु गुणानामतिशयः
पुराणो वा जन्मान्तरनिविडबन्धः परिचयः ।
निजो वा सम्बन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥"
(तत्रैव, ५।१६) ।

"रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकी भवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥"
(अभिज्ञानशकुन्तले, ५।२) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मनोरथस्य यद् बीजं
तद् दैवेनाऽऽदितो हतम् ।
लतायां पूर्वलूनायां
प्रसूनस्याऽऽगमः कुतः ॥"
(उत्तरचरिते, ५।२०) ।

"मनोरथाय नाऽऽशंसे किं बाहो
स्पन्दसे वृथा ।
पूर्वावधीरितं श्रेयो दुःखं हि परि-
वर्त्तते ॥"
(अभिज्ञानशकुन्तले, ७।१३) ।

"यथेन्दावानन्दं व्रजति समुपोढे
कुमुदिनी ।"
(तत्रैव, ५।२६) ।

"अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ॥"
(तत्रैव, ४।२) ।

"अकिञ्चिदपि कुर्वाणः
सौख्यैर्दुःख्यान्यपोहति ।
तत्तस्य किमपि द्रव्यं
यो हि यस्य प्रियो जनः ॥"
(तत्रैव, ६।५ ; २।१९) ।

"सत्ता सदसतोर्नास्ति
रागः पश्यति रम्यताम् ।
स तस्य ललितो लोके
यो यस्य दयितो जनः ॥"
(अवदानकल्पलतायां १०।६९) ।

"व्यतिषजति पदार्थानान्तरः
कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः
संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥"
(तत्रैव, ६।१२) ।

"परिणतकठोरपुष्करगर्भच्छदपीन-
मसृणसुकुमारः ।

"अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दयति चन्द्रचन्दननिष्यन्दजडस्तव
स्पर्शः ॥"
(उत्तरचरिते, ६।१३)

"न तेजस्तेजस्वी प्रसृतमपरेषां
प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वाद-
कृतकः ।
मयूखैरश्रान्तं तपति यदि देवो दिन-
करः
किमाग्नेयो ग्रावा निकृत इव तेजांसि
वमति ॥"
(तत्रैव, ६।१४)।

कां निर्वृतिं चेतसि तस्य कुर्याद्
यस्यायमङ्कात् कृतिनः प्ररूढः ॥'
(अभिज्ञानशकुन्तले ७।१९)।

"स्पर्शानुकूला इव सूर्यकान्ता
स्तदन्यतेजोभिभवाद् वमन्ति ॥'
(तत्रैव, २।७)।

......

"अङ्गादङ्गात स्रुत इव निजः स्नेहजो
देहसारः ।
प्रादुर्भूय स्थित इव बहिश्चेतनाधातु-
रेव ॥"
(तत्रैव, ६।२२)।

"अङ्गादङ्गात् सम्भवसि हृदयादभि-
जायसे ।
आत्मा वै पुत्रनामाऽसि स जीव शरदः
शतम् ॥"
(निरुक्ते ३।४ ; सामवेदीय-
गोभिलगृह्यसूत्रे २।८।२१ : महा-
भारते १।७३।६३)।

गुणाः पूजास्थानं
गुणिषु न च लिङ्गं
न च वयः ॥४॥

"तामगौरवभेदेन
मुनींश्चापश्यदीश्वरः ।
स्त्री पुमानित्यनास्थैषा
वृत्तं हि महितं सताम् ॥"
(कुमारसम्भवे ६।१२)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ददतु तरवः पुष्पैरर्घ्यं फलैश्च
मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु
वनानिलाः।
कलमविरलं रत्युत्कण्ठाः क्वणन्तु
शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वन-
मागतः ॥"

(उत्तरचरिते, ३।२४)।

"वज्रादपि......विज्ञातुमर्हति ॥"
(तत्रैव, २।७)।

"लताप्रतानोद्ग्रथितैः स केशै-
रधिज्यधन्वा विचचार दावम्।
रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान विनेष्यन्निव दुष्टसत्त्वान् ॥"
(रघुवंशे २।८, अपिच २।९-१३)

"संपत्सु महतां चित्तं भवत्युत्पल-
कोमलम्
आपत्सु च महाशैलशिलासंघात-
कर्कशम् ॥"
(नीतिशतकम् ६६)

"दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरयं मम चेयमृद्धिः।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तार-
यन्ति ॥"

(तत्रैव, २।११)।

"वरं हि पण्डितः शत्रुर्न मूर्खो हित-
कारकः।"
यद्वा, "हीयते हि मतिस्तात हीनैः
सह समागमात्।
समैश्च समतामेति विशिष्टैश्च
विशिष्टताम् ॥"
(हितोपदेशः)।

"समुन्नयन भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः ॥"
(किरातार्जुनीये १।८)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्-
सवं
सततमपि ते स्वेच्छादृश्यो नवं नव-
मेव यः।
विकलकरणः पाण्डुः सोऽयं शुचा
परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशां
प्रियः ॥"
: (उत्तरचरिते ३।२२) ।

"जनकः । * * *

अन्यतामिस्रा हि असूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते ये आत्मघातिन इत्येवमृषयो मन्यन्ते, अनेकसंवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावनास्पष्टनिर्भासः प्रत्यग्र इव दारुणो न मे दुःखसंवेगः प्रशाम्यति।"

(तत्रैव, चतुर्थेऽङ्के)

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं
तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृती-
नाम् ॥"

(अभिज्ञानशकुन्तले, १।१७)*

*('१४।८७' एव परस्तात् प्रयोज्यम्)

.........To die,— to sleep :—
No more; and, by sleep, to say we end
The heart-ache, and the thousand natural shocks
That flesh is heir to,—'tis a consummation
Devoutly to be wish'd. To die,— to sleep :—
To sleep! perchance to dream—ay, there's the rub.
For in that sleep of death — what dreams may come
When we have shuffled off this mortal coil,
Must give us pause : there's the respect
That makes calamity of so long life;
For who would bear the whips and scorns of time,
* * * * *

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

When he himself might his
quietus make
With a bare bodkin?.........
But that the dread of some-
thing after death,
The undiscover'd country,
from whose bourn
No traveller returns, puzzles
the will,
And makes us rather bear
those ills we have,
Than fly to others that we
know not of ?

(Shakespeare's Hamlet,
Act III, scene I)

यद्वा,

"सर्वास्ववस्थासु रमणीयत्वम्
आकृतिविशेषाणाम् ।"

(अभिज्ञानशकुन्तले षष्ठाऽङ्के
प्रवेशके कञ्चुकिवार्तायाम्) ।

यद्वा, (रघुवंशे १४।९) ।

"सीता । [सोच्छ्वासं सास्रम्]—
आर्यपुत्र इदानीमसि त्वम् ।
अहो ! उत्खातमिदानीं मे परि-
त्यागलज्जाशल्यमार्यपुत्रेण * *"

[तत्रैव, तृतीयेऽङ्के] ।

"सीतां हित्वा दशमुखरिपुर्नोपयेमे
यदन्यां
तस्या एव प्रतिकृतिसखो यत
क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन
भर्तुः सा दुर्वारं कथमपि परित्याग-
दुःखं विषेहे ॥"

(रघुवंशे १४।८७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अरुन्धती । भिद्येत किं सद्वृत्त-
मीदृशस्य निर्माणस्य ।"
[उत्तरचरिते चतुर्थेऽङ्के]

यत्राऽऽकृतिस्तत्र गुणा वसन्ति ।"
(इति न्यायात्) ।
यद्वा, "यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।"
(कुमारसम्भवे ५।३३) ।

"पातालोदरकुञ्जपुञ्जिततमःश्यामै-
र्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योति-
र्ज्वलद्दीप्तिभिः ।

"अद्रेः शृङ्गं हरति पवनः
किं स्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं
मुग्धसिद्धाङ्गनाभिः ।"
(मेघदूते. पूर्वमेघे १४) ।
('पूर्वमेघे १४' एव परस्तात् प्रयोज्यम्)

पुराणो वा जन्मान्तरनिविडबन्धः
परिचयः ।"
(तत्रैव ५।१६) ।

यद्वा,
"मनो हि जन्मान्तरसंगतिज्ञम् ।"

"Hence in a season of calm weather
Though inland far we be,
Our souls have sight of that immortal sea
Which brought us hither,
Can in a moment travel thither,
And see the children sport upon the shore,
And hear the mighty water rolling ever more.
(Wordsworth's *Ode*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोके महान्तो हि ते ।",
(तत्रैव, ५।३६) ।

कल्पाक्षेपकठोरभैरवमरुद्व्यस्तै-
रवाकीर्यते
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रि-
कूटरिव ॥"
(उत्तरचरिते ५।१३) ।

* * * * * *
Here, under leave of Brutus
and the rest,—
For Brutus is an honourable
man;
So are they all, all honour-
able men,—
Come I to speak in Cæsar's
funeral."
(Shakespeare's *Julius Caesar*,
Act III, scene II).

"न तेजस्तेजस्वी......वमति ।"
(तत्रैव, ६।१४) ।

यद्वा,

"किमपेक्ष्य फलं पयोधरान्
ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥"
"यदचेतनोऽपि पादैः स्पृष्टः
प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृत-
निकृतिं कथं सहते ॥"
(नीतिशतकम् ३७) ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीश्रीदशमहाविद्यास्तोत्रम्

आद्यां कङ्कालमालां कलिकलुषहरां कामदां कामरूपां,
कामाख्यां कालकूटाशनजगलशितेः कामिनीं मुक्तकेशीम् ।
कालिन्दीनीरकान्तिं कलितकलकलामन्तकस्यान्तकर्त्रीं
भक्तानां मुक्तिदात्रीं नरकरकटिकां कालिकां संनमामः ॥१॥
तारां त्रैलोक्यसारां त्रिभुवनजननीं खर्वरूपां त्रिनेत्रां,
सिद्धाराध्यां शरण्यां शवशिवशरणां सिद्धिदां सिद्धविद्याम् ।
उस्त्राणां ग्रासयन्तीह सततमसतामुग्रतामुग्रतारां,
भक्तानां भक्तिलभ्यां भवसलिलनिधेस्तारिणीं संभजामः ॥२॥
या श्रीर्बालार्ककोटीकररुचिरुचिरा कम्बुकण्ठी त्रिनेत्रा,
रक्तं वासो वसाना शशधरवदना कुण्डलाक्रान्तकर्णा ।
शृङ्गाराशेषवेशा जगदपि करुणाधारया प्लावयन्ती,
भक्तानां भुक्तिमुक्तिप्रनयणनिरतां षोडशीन्तां प्रवन्दे ॥३॥
सृष्टौ या ब्रह्मरूपा जगदवनविधौ या स्वयं विष्णुमूर्त्तिः,
संहारे या शिवाख्या त्रितयगुणयुता कोटितिग्मांशुकान्तिः ।
या देवी स्मेरवक्त्रा शशधरमुकुटा भोगमोक्षैकदात्री,
भक्तेभ्यो याऽष्टसिद्धीर्वितरति भुवनाधीश्वरी स्तूयते सा ॥४॥
यस्या ब्रह्मादिदेवा गुणगणगणनां नैव कर्त्तुं समर्था,
आदौ कल्पस्य नित्या सृजति जगदिदं पञ्चभूतात्मकं या ।
हस्ताब्जैः शुद्धविद्याऽभयजपवटिका धारयन्ती वरं या,
भव्यां भूतेशभावां भवभयदलनीं भैरवीं भावये ताम् ॥५॥
या देवी चण्डलीला निजमपि रुधिरं निर्गतं संपिबन्ती,
रत्या सार्द्धञ्च कामं पदयुगदलनाच्छासती मुक्तकेशी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तैः प्रीतिं नयन्ती स्वगलविगलितैर्वर्णिनीं डाकिनीं या,
भक्ताभक्तौ प्रकुर्वत्यभयभययुजौ छिन्नमस्तां भजे ताम् ॥६॥
नान्तं यस्या महिम्नां भवविधिहरयो जातु यातुं समर्था,
बाला प्रौढाऽपि वृद्धा प्रकलितविधवावेशरूक्षाङ्गयष्टिः ।
या देवी धूम्रवर्णा रिपुहननरता सेवकानां प्रसन्ना,
भक्त्या धूमावतीन्तां त्रितयगुणमयीं नौमि सिद्धिप्रदात्रीम् ॥७॥
सिंहस्कन्धाधिरूढा धृतरिपुरसनामुद्गरा पाणियुग्मे,
या प्रीता पीतपुष्पैर्भवति शशिमुखी पीतवस्त्रा सुकेशी ।
यस्या आराधनात् स्याद्रिपुमुखजडता वाग्मिता सेवकानां,
तां देवीं पीतवर्णामहमिह वगलामिष्टसिद्धयै समीडे ॥८॥
मातङ्गीं श्यामवर्णामृषिसुरमनुजैः सेव्यमानाङ्घ्रिपद्मां,
वेदैरेकप्रवेद्यां जनिभयशमनीं शुद्धसत्त्वस्वरूपां ।
खेटं पाशाङ्कुशासीन करविधृतवतीं रत्नसिंहासनस्थां,
भक्तानामार्त्तिहन्त्रीं शशधरशिखरां मातरं नौमि नित्याम् ॥९॥
यस्याः सेवाविधानाद्भवति बहुधनं सर्वसौभाग्यसम्पद्,
या तप्तस्वर्णवर्णा सरसिजशरणा सर्वदा सर्वसेव्या ।
याऽम्बा पीयूषकुम्भै रजतसितगजैः सिच्यमाना चतुर्भि-
स्तां देवीं योगगम्यां मुहुरपि कमलां भक्तियुक्तोऽभिवन्दे ॥१०॥
इदं दशमहाविद्यास्तोत्रं भक्त्या च यः पठेत् ।
आयुरारोग्यमैश्वर्यं जयं पुत्रं लभेत सः ॥११॥

इति श्रीहट्टप्रदेशान्तर्गतनर्त्तनग्रामवास्तव्येन श्रीमत्कैलासचन्द्र-काव्य-व्याकरण-स्मृतितीर्थ-भट्टाचार्येण विरचितं श्रीश्रीदश-महाविद्यास्तोत्रं सम्पूर्णम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्ता

षष्ठः परिच्छेदः

दिघडायां स्वर्गतस्य जगदीशमहाशयस्य भवनं सरस्वत्याः परपारे। ग्रामान्तरीयमपीदं नदीतीरवर्तिनां कियतां वेणुस्तम्बानां कृत एव वनमालिमहाशयस्य प्रासादशिखरान्नावलोक्यते। तदा शरदा समं क्षीणायाः सरस्वत्या वर्षावर्धितं जलमपि निःशेषतामधिगच्छदासीत्। तीरवर्ती कर्षकाणां गमनागमनयोः पन्थाश्च पादचारेणाऽऽश्यानकर्दम आसीत्। अद्यापराह्णवेलायामनेन पथा विजया वृद्धं दौवारिकं सह कृत्वा भ्रमणाय बहिरयासीत्। तीरुन्तरगतानां वंशखर्जूरादिवृक्षगुल्मानां पत्रान्तरादुपगता अस्तं यियासोः सूर्यस्याऽऽरक्ताभा अन्तरान्तरा तस्या मुखोपरि पतन्त्यासीत्। अन्यत्रमनसा दृष्ट्या एतच्चान्यच्च पश्यन्त्या उत्तरस्यां दिशि चलन्त्यास्तस्या हठात् कचिन्निपपात दृष्टिः। द्वित्रान् वेणून् संहत्य पारापारयोः कृते नदीगर्भे कृतः सेतुः। तमिमं निपुणं द्रष्टुं विजया तोयोपान्तमासाद्य दण्डायमानैवापश्यत्, नातिदूरे स्थितः कश्चिज्जनः परमनिविष्टेन चेतसा मत्स्यान् संगृह्णाति। विजयां प्रत्यभिज्ञाय स मुखमुन्नमय्य नमश्चकार। तस्मिन्नेव काले विजयाया आननोपरि सूर्यरश्मिरुपायान्न वेति न जाने, परं मिलन्त्यामेव दृष्ट्यां गौरच्छवि तस्या वदनमण्डलम् एकपदे शोणमासीत्। मत्स्यग्राही तावत् पूर्णमहाशयस्य स भागिनेयः, यस्तदानीं मातुलगृह्यः सन् तस्याः समीपे तत्त्वावधारणार्थमागतवान्। प्रतिनमस्कारं कुर्वत्यामेव विजयायां स समीपमुपेत्य स्मितमुखेनावदत्, अपराह्णे किञ्चिद् भ्रमणाय नदीतीरं न तावदशोभनं स्थानम् इति सत्यम्, परमीदृशे काले म्यालेरियाया भयमपि नाल्पमित्यत्र मन्ये न केनापि सावहिता कृताऽत्रभवती ?

विजया सशिरःकम्पमुक्तवती, नहि ; परं परस्मिन् क्षण एवाऽऽत्मानं पर्यवस्थापयन्ती स्मितं कृत्वावदत्, न तावन् म्यालेरिया जनमभिज्ञायाक्रामति। मया वरमजानत्यैवागतम्, किमिति भवताऽपि जानता शृण्वता च जलसमीपेऽवस्थीयते। दृश्यतां तावन्मया कीदृशो मत्स्यः संगृहीतः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनो हसन्नवदत्, सफरी मत्स्यः। परं घटिकाद्वितयेन द्वावेवासादितौ। नेदं श्रमसहम्। परमुच्यतां किं करणीयम् ? भवतीवाहमपि विदेशीति वक्तुं युक्तम्, बहिरेव दिनान्यतीतानि ; प्रायः कैरपि सह तथा परिचयो नास्ति, परमपराह्णस्तु यथा तथाऽतिवाह्य एव ।

विजया सशिरःकम्पं सहासं प्रावदत्, ममापि प्रायेणायं वृत्तान्तः। भवतां गृहं मन्ये पूर्णमहोदयस्य भवनसमीप एव ।

जनः प्राह, नहि। हस्तेन नद्याः परं पारं दर्शयन्नाह, अस्माकं गृहम् अमूष्यां दिवडायाम्। अनेन वैणवसेतुना गन्तव्यम् ।

ग्रामस्य नाम श्रुत्वा विजयया प्रोक्तम्, एवं तर्हि मन्ये जगदीशमहोदयस्य पुत्रं नरेन्द्रमहोदयं भवान् जानीते ?

तस्य जनस्य शिरःसञ्चालनमात्रत एव विजया परमेण कौतूहलेन वशीकृता सहसाऽपृच्छत्, अपि नाम शक्नोति भवान् वक्तुम्, स भवान् कीदृशो जन इति ?

परमुक्त्वाऽऽत्मनोऽशिष्टेन प्रश्नेन साऽतितरामेवापत्रपत। सेयं लज्जा तस्य जनस्य दृष्टिविषयं नातिचक्राम। स हसन्नाह, तस्य भवनन्तु भवत्या ऋणदायात् क्रयेण स्वीकृतम् ; इदानीं पुनस्तस्यानुसन्धानेन किं नाम फलम् ? परं येन सदुद्देश्येन स्वीकृतम्, तदप्येतद्दिग्भागिनः सर्व एव जानन्ति ।

विजयया पृष्टम्, एकान्ततः साङ्गमभूत् स्वीकरणम्—इत्येव मन्येऽस्यां दिशि प्रचारोऽभवत् ? तेनोक्तम्, भवितव्यमेव। जगदीशमहोदयस्य सर्वस्वं भवत्याः पितुः समीपे विक्रयपत्रेण बद्धमासीत्। तत्तनयस्तावतीर्मुद्रा निर्यातयितुमक्षमः—प्रतिश्रुतः कालोऽप्युत्तीर्णः—वृत्तान्तं सर्वे जानन्त्येव ।

कीदृशं भवनम् ?

नासाधु, बृहत्तरमेव भवनम्। यदर्थं स्वीक्रियते, तत्र साध्वेव भविष्यति। आगम्यतां किञ्चित् पुरः प्रस्थित एव दर्शनं लप्स्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलन्ती विजया प्राह, यतो भवान् ग्रामीणस्ततो नूनं सर्वमेव जानाति। भवतु, श्रुतम्, नरेन्द्रमहोदय इंलण्डतः सम्यक्तयैव पाश्चात्यभैषज्यपरीक्षामुत्तीर्य समागतवान्। क्वचनोत्तमे देशे चिकित्सकतां प्रारभ्य भूयोऽपि कियन्तं कालम् [ऋणनिर्यातनस्य] अवकाशं स्वीकृत्यापि किं पितुर्ऋणं निर्यातयितुं नार्हति ?

स जनो ग्रीवां चालयन्नाह, न सम्भवति। श्रुतं चिकित्सकतैव न नाम तस्याभिमता।

विजया विस्मिता प्राह, एवं तर्हि को वा तस्याभिप्रायः श्रूयताम् ? एतावन्तम् अर्थव्ययं विधाय इंलण्डं गत्वा क्लेशेन चिकित्सकताशिक्षायाः फलं वा किं भवतु ? स खल्वेकान्ततोऽद्रव्यमिति प्रतिभाति।

भद्रो जनः किञ्चिद् विहस्याब्रवीत्, नासम्भवमिदम्, परं श्रुतं चिकित्सया निरामयत्वविधानमपेक्ष्य नरेन्द्रमहोदयः स्वयमेवं किञ्चनाऽऽविष्कर्त्तुमिच्छति, येनाधिकाधिको जनानामुपकारो भवेत्। श्रूयते, विविधं यन्त्रादिकमधिकृत्य रात्रिन्दिवं सुतरां श्राम्यति च।

विजया चकिताऽवदत्, स तु महानेव विषयः। परं तस्य गृहभवनादौ विनष्टे कथमेतत् सर्वं निष्पादयिष्यति ! तदा तूपार्जनं कर्त्तव्यम्। भवतु, नूनं भवान् वक्तुमर्हति, इंलण्डगमनेनैतद्देशीया जनास्तमपांक्तेयमकुर्वन्न वा ?

भद्रमहोदयेनोक्तम्, तत्तु ध्रुवम्। मम मातुलः पूर्णमहोदयस्तस्यापि प्रकारतः स्वजन एव, तथापि पूजावसरे स्वगृहे निमन्त्रयितुं नोदसहत। परं तेन तस्य न किमप्यायाति याति वा। स्वीयं कर्म कुर्वन्नास्ते, अवसरे सति चित्रं चित्रयति—गृहाद् बहिरेव न निर्याति। अदस्तस्य भवनम्—इत्युक्त्वाऽङ्गुल्या वृक्षगुल्मादिवेष्टितं महान्तमेकं प्रासादमदर्शयत्।

समयेऽस्मिन् वृद्धो दौवारिको मिश्रया वङ्गभाषया पृष्ठतो व्यज्ञापयत्, यद् बहुदूरम् आगतम्, गृहे प्रत्यावर्त्तने सन्ध्या भविष्यति।

स जनः प्रत्यावृत्य दण्डायमानः प्रावदत्, कथानुकथिकया भूयांसं पन्थानमतिक्रान्तवत्यत्रभवती।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनापि तेन वंशसेतुनैव ग्रामान्तः प्रवेष्टव्यम्, अतः प्रत्यावर्त्तनकालेऽपि सहैव प्राचलत्। विजया क्षणं मनसि किमपि विचिन्त्योक्तवती, एवं तर्हि कस्यचनाऽऽत्मीयस्य गृहेऽपि तस्याऽऽश्रयप्राप्तेः प्रत्याशा नास्तीति कथ्यताम्।

जनेन कथितम्, एकान्तत एव न।

विजया भूयोऽपि कियन्तं कालं तूष्णीं चलन्ती प्राह, यत्सत्यं स भवान् कस्यापि समीपे गन्तुं नेच्छतीति। अन्यथा, मासस्यास्य चरमत एव स गृहत्यागाय विज्ञापितः। अपरश्चेदभविष्यद् अन्ततोऽस्माभिः सह सकृत साक्षात् कर्त्तुमप्ययतिष्यत।

जनोऽवदत्, तस्य प्रयोजनं वा नास्ति, किं वा [दर्शनेन] फलमिति वा चिन्तयति। न पुनर्वस्तुत एवात्रभवती तं गृहेऽवस्थापयितुं शक्नुयात।

विजया प्राह, असामर्थ्येऽपि कञ्चनापि कालं स्थापयितुं शक्येतैव। सहस्रेऽपि ऋणदाये कञ्चन जनं तस्य गृहाद् विताडयितुं सर्व एव क्लेशमनुभवन्ति। परं भवतः कथोपकथनस्य भङ्ग्या प्रतीयते यत्तेन सहास्ति भवतः सविशेषः परिचयः। किमुच्यते, अपि नाम नावितथमिदम् ?

स केवलमहसत, न किमपि प्रत्युत्तरमकरोत। सेतोः समीप एव ते समागताः। स क्षुद्रं मत्स्यवेधनयन्त्रं भूमित आदायावदत, अयमस्माकं ग्रामान्तर्गमनस्य पन्थाः। नमस्कारः। इत्युक्त्वा हस्तद्वयमुत्तोल्य नमस्कृत्य तेन वंशनिर्मितेन सेतुना स्खलितगतिः कथमप्युत्तीर्णः सङ्कीर्णेन वन्यपथेन अदृश्यतामगमत।

बहुदिवसीयो वृद्धभृत्यः कानाइसिंहो विजयां शैशवे क्रोडे पृष्ठे च कृत्वा समवर्धयत, तेन च हेतुना स दौवारिकस्य न्याय्यमधिकारमपि सुदूरमत्यक्रामत। स सन्निकटमागत्यापृच्छत, मातृके, कोऽयं भद्रमहोदयः ?

परं विजयैतावदेव विमनायमानासीद् यद् वृद्धस्य प्रश्नस्तस्याः कर्ण एव न प्राविशत्। सा तस्य प्रायान्धकारस्य नदीतटस्य सर्वं नीरवं माधुर्यं सर्वथोपेक्ष्य स्वप्नाविष्टेव केवलमिदमेव चिन्तयन्ती पन्थानमतिक्रामन्त्यासीत्, कोऽयम्, भूयः कदा वा दर्शनं लप्स्ये इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुञ्जविहारितर्कसिद्धान्तमहाप्रयाणम्

[निबन्धकः—श्रीकालिदासचतुर्धुरीणः काव्यतीर्थः एम्, ए,]

महामहोपाध्यायो नैयायिकाग्रगण्यः कुञ्जविहारितर्कसिद्धान्तमहोदयः सौरज्यैष्ठस्य सप्तदशदिवसे सुरलोकं गतः। विद्वद्वरस्यास्य महात्मन आकालिकोपरतेर्न्यायशास्त्रस्य महती क्षतिः सञ्जाता। वङ्गानां च नैयायिकगौरवं म्लानिमुपगतम्। सत्स्वपि तर्कतीर्थोपाधिधारिषु बहुषु न्यायशास्त्रव्युत्पन्नानां तादृशां गभीरज्ञानानां विदुषां लक्ष्यते विरलत्वम् अभावो वा। असौ तर्कसिद्धान्तमहोदयो विक्रमपुरान्तर्गतमेदिनीमण्डल-ग्रामवास्तव्यः स्वजनुषा जन्मभूमिम् अलमकरोत्। अस्य सर्वेषु शास्त्रेषु पाण्डित्यमासीत्। न केवलम् तर्केऽस्य प्राधान्यं साहित्ये दर्शनान्तरेषु च सुगभीराऽस्य व्युत्पत्तिः समजनि। तर्कशास्त्रेऽस्य व्युत्पत्तिरेता-दृशी आसीत् यदयं उपाधाननिहितशीर्षोऽपि तर्कस्यानुमानखण्डोपाधि-परीक्षार्थिनश्छात्रान लीलया अध्यापयत्। अयं विद्वद्वरो महामहोपाध्या-यानां रासमोहनसार्वभौमाणां कैलासशिरोमणीनां तथा काशीस्थवामाचरण-न्यायाचार्यमहोदयानां छात्रमुकुटमणिरासीत्। न्यायशास्त्रस्यानुगमेऽस्य एतादृशी शक्तिर्जाता यत् मौखिकोपाधिपरीक्षादानकालेऽपि न्यायशास्त्रस्य अनुगममुक्त्वा परीक्षकमहोदयान महामहोपाध्यायान् श्रीयुक्तकामाख्यानाथ-तर्कवागीशान् नितरां प्रीणयामास। अस्य अध्यापनाकौशलम् एतावत्-प्रसिद्धिं गतम् यदन्ध्रदेशादपि छात्रास्तर्कशास्त्राध्ययनार्थम् अत्र समागताः। अन्ध्रविश्वविद्यालयादपि अस्य आह्वानम् आगतम्, तत्रत्यसभ्यपदस्यालङ्कृतये। अस्य स्वर्गमनाद् या क्षतिः सञ्जाता सा कथमपि न पूरणीयेति अस्य महाप्रयाणजनितशोकोच्छ्वासो वक्ष्यमाणकविताष्टकेन किञ्चिद् विज्ञाप्यते मया हतभाग्येन तदीयान्तेवासिना।

निपात्य पुत्रौ जननीं जरार्तां
तथैव बन्धून् सुबहूंश्च शिष्यान।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकाब्धिमध्ये नु कथं गतः स्व-
गुरो बुधानां सततं वरिष्ठ ॥१॥
कथाप्रसङ्गेन यदा त्वदम्बा-
वज्रेण तुल्यां तव मृत्युवार्ताम् ।
निशम्य शोकेन विलुप्तसंज्ञा
जनिष्यते कः प्रशमं विधाता ॥२॥
पुत्रो द्वितीयस्तव बालको हि
मात्रा विहीनस्तव यत्नयुक्तः ।
वृद्धिं गतोऽसून स कथं धरेद्धि
तव प्रयाणाद् रहितः पितृभ्याम् ॥३॥
देवी च वाणी मरणात्तवैव
सुपुत्रशून्या भृशखेदयुक्ता ।
नाकर्ण्य वाक्यं तव तर्कयुद्धे
शोशुच्यमाना समयं हि नेता ॥४॥
वयं हि दीनास्तव शिष्यवर्गा
आकालिकात्ते गमनाद् द्युलोके ।
परं निखातैर्हृदि शोकशल्यै-
र्विचारमूढाः पठनादिकेषु ॥५॥
वङ्गाः प्रसिद्धा विदुषां वरिष्ठै-
र्नैयायिकैरेव भवादृशैस्तु ।
सा च प्रसिद्धिस्तव नाकलाभान्-
म्लानिं गता चैव न संशयोऽस्ति ॥६॥
भाग्येन हीनास्तव शिष्यवृन्दा-
स्तवोपदेशप्रतियोगिकाद्धि ।
नितान्तखिन्ना अधुना ह्यभावाद्
याचामहे त्वां गतमिन्द्रलोकम् ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षीणे च पुण्ये ननु मर्त्यलोक-
माविश्य भूयो यदि लब्धजन्मा ।
वङ्गेषु शिष्याननुकल्प्य देव
नैयायिकत्वं पुनरेव गच्छेः ॥८॥

अहो सर्वज्ञता वेदस्य

[निबन्धकः—पि. वि. वरदराजशर्मा]

अखिलो वेदस्तद्विदां स्मृतिशीले तेषामेव चाऽऽचारः प्रमाणं श्रेयस्साधनं चेत्ययं साधारणस्साधुजनवादः, वेदस्यैव केवलस्यानपेक्षं प्रामाण्यं तदविरोधि पूर्वपुरुषस्मृत्याचारयोस्तत्सापेक्षं च प्रामाण्यं चाऽऽवेदयति । तमेवार्थं स्मर्तारः स्मरन्ति यमनन्तो वेदः प्रत्यपादयदिति चास्माकमनुपहतो विश्रम्भः सम्प्रदायशरणानाम् ।

कोऽसौ वेदः, किन्नामा, कतिविधः, कोऽस्य कर्ता, कदा, व्यररचत्, कथमस्य प्रामाण्यमित्यादि बहुविचारितं निशितमतिभिर्विचार्यते विचारयिष्यते चेत्यलमस्माकं नैकाक्रान्तसरणेरनुधावनेन। धन्यतया तु मान्यानामास्तिकमूर्धन्यानां नास्ति तादृशः कश्चिद्यः प्रतिपद्यते वेदमस्मत्कर्तृकमविद्यमानं वा । सकर्तृकत्ववादिनो विमर्शपदव्येकपथिका अपि द्विसहस्रहायनतामस्याभ्युपयन्तो धन्यवादानेवार्हन्ति यतस्तेऽपौरुषेयत्वमैश्वरत्वञ्चास्यापास्यन्तः प्रामाण्यं चिरन्तनत्वरूपं तन्न साकल्येनापजिहीर्षन्ति । नैतन्मतं प्रत्नं सर्वं प्रमाणमिति । परं पश्यामः, पांसुलपादादासत्यलोकपालं प्रतिपत्तिविशेषं प्रवयसां वचनेषु । यतोऽयमुत्सर्गो जागर्ति यत्प्रवयाः परोक्षमपरोक्षं वाऽनुभूतमर्थं यवीयस उपदिशति । नाज्ञातं नाप्यसम्यग्ज्ञातम् । न ह्येकहायनोऽवगन्तृत्वेनोपलब्धो यावतोऽर्थान् द्विहायनस्त्रिहायनो वाऽवगच्छन् दृष्टः । न च नास्त्यपवाद उत्सर्गस्य । तथाप्युत्सर्गाभ्युपपत्तिरौत्सर्गिकी लोकस्य । यथा पिता पालको वा प्रवया बालिशं बालमुत्सङ्गे निधायो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदिशति 'वत्स कापथे पदं मा धाः। मा च दधिष्ठाः पापेऽभिनिवेशम्। अनर्हं मा प्राक्षीः। अनलं मा स्प्राक्षीः। चापलं मा कार्षीः। मा हार्षीः परस्वम्। बलिना मास्म युध्यथा इत्यादि। इत्थं चिरन्तनोऽयं त्रयीपुरुषः अधिकारानुगुणं हितकाङ्क्षया किमपि कस्यापि कर्तव्यमपरमन्यस्याकर्तव्यं च विदधाति। गुरूपदेशो हि नामाग्राम्यं कर्णाभरणम्, विशेषतश्चानुपसेवितवृद्धस्य।

सति चैवं कोऽपि दुर्ललितो यद्यवधीरयति गुरूपदेशं कापथं च प्रतिपद्यते अनलं वा स्पृशति किमस्य फलम्। महती ह्यनिष्टप्राप्तिः। बलिना युध्यमानो दुर्बलो भिन्नमस्तकश्छिन्नदन्तश्चाशरणो रुदन्विपद्यते। प्रतिपद्यते चायमज्ञः प्राचां प्रज्ञानां प्रज्ञाविज्ञानम्। एवं यमर्थं वेदो विदधाति कर्तव्यं यमपि प्रतिषेधत्यकर्तव्यं तयोरकरणे करणे च यदीदृक्षमेव दृष्टमिष्टमनिष्टं वा फलमावेदयति, मन्दोऽपि नियतं जानीयादेनममन्दमहिमानम्। परं तु न वेदो गोपालो गाश्चारयन् उत्पथप्रतिपन्ना गा दण्डेनेव वारयति। येन मूर्खोऽपि दण्डभिया नोत्पथं प्रतिपद्यते। नवा न वारयति येन सर्वः स्वैरमुच्छृङ्खलं प्रवर्तमानोऽपि न प्रत्यवेयात्। कदाचित्कमपि वारयति शारीरेणापि दण्डेन। सन्ति विहिताः परस्सहस्रम्। प्रतिषिद्धाश्चान्यूनाः। "न प्रावृत्य शिरोऽहनि पर्यटेत्, प्रावृत्य रात्रौ। मूत्रोच्चारे च। न हिंस्यात्सर्वा भूतानि। यो हिंसाभिरुचिर्भवति स ततो निवर्त्यते न हिंस्यादिति वाक्येन। यश्चोच्चारप्रकारमाकाङ्क्षति स उपदिश्यते शिरः प्रावृत्येति। नोपलभामहे विधि-प्रतिषेधवाक्ययोः फलमुद्दिष्टम्। कर्तव्यं नेति च श्रूयते। हिंसा चामित्रसाधारणी न केवलं वेदस्यानभिमता। साधारणश्चायं धर्मोऽहिंसा नाम। बाह्या अपि हि धर्मेष्वीदृशेष्वस्माकमुपकण्ठभाजोऽकुण्ठमैककण्ठ्यमावहन्ति। न पश्यामशिष्टानामनुष्ठानमात्मनस्तुष्टिं वा। किमु वक्तव्यमनुकम्पनीयानां तिरश्चाम्। विशेषतश्चाभ्यर्हितानाम्। सारमेयाः खलु भारतीयानामस्माकमनुकम्पनीयाः। त एव पश्चिमानामपश्चिमामर्हणामर्हन्ति। तेषां ह्येते कदापि प्रतीहारिणः अन्यदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहचराः। क्रीडासु स्निग्धाः। नौविपत्यादिकृच्छ्रेषु सुहृदः। किं बहुना सन्ति बहवो भषकाः ये सप्रीतिं सजग्धिं चानुभूय सुखमासते इति किलाश्रौष्म।

एवं सन्ततप्रवाहिण्यामनेहस्तटिन्यामेकान्त समन्तात्सम्पतन्तः पतिताः पतिष्यन्तश्चान्ततः केनापि व्यपदेशेनान्तकस्यान्तिकमचिन्तितमापतन्ति।

जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः।
निमित्तं किञ्चिदासाद्य देही प्राणैर्वियुज्यते॥

इत्येतदनुरोधेन कालदष्टेष्वन्यतमो हूणः कश्चिच्छुनाऽदश्यत। सारमेय-दष्टोसावन्तस्सारविधुरः अद्यश्वीनं श्वानमेतमात्मनो निधनहेतुं मेने। तेन च तद्वधेऽतिस्थिरामास्थां बबन्ध। अहो मौर्ख्यस्य परा काष्ठा। कथमयमनु-कम्पनीयो व्रणितः पुच्छविकलश्चालर्क एनं हन्यात्। कीदृशी वास्य प्रभविष्णुता परेषां प्राणापहरणे। स्वयमासन्नमृत्युस्तत्प्रतीकारमजानानः कथमन्यस्मै मृत्युं यच्छतु। स्वयं तरितुमक्षमः कथमसौ परांस्तारयेत्। विस्मृत्यैतत्सर्वमसौ यथाजात उत्ससर्ज तज्जातीयानामेव विनाशाय कामपि व्यवस्थाम्। अतिससर्जापरिमितं पारितोषिकं य एतान्मारयति। ससर्ज कुत्सितमिदं कलेवरम्। कासावयासोदिति न वयं विद्मो दविष्ठास्तदीयां पदवीम्। "भक्षितेऽपि लशुने न शान्तो व्याधिरिति तावतापि नास्ति शुनामुल्लाघता। अद्यापि चरन्ति कृत्स्नमेव वसुधातलं कार्ष्णायस-सवर्णा रज्जुहस्ता दण्डधराः प्रेतपतिपर्यायभूताः पुरुषाः। नैके श्वानो गृह्यन्ते निगृह्यन्ते च।

कर्हिचित्कुम्भघोणे कश्चिदकिञ्चनः कुड्यान्तरितो महति प्रत्यूषे गुवन्न-वर्तत। नैष "प्रावृत्य रात्रौ पर्यटेत, मूत्रोच्चारे च" इति विधिमजानात्। जान-न्नेवोदास्त। किमस्य विध्यवधीरणस्य फलम्। सन्निकृष्टवर्तिनो वयमस्य कष्टमतिनिकृष्टं फलमश्रौष्म। यावदसौ तपस्वी अवाक्शिराः पौरानप-वाहयन् सचकितं कूर्म इवाङ्गानि संहृत्यावर्तत तावदभ्यापतत् पातकी कृतान्त इव साक्षादन्तकः सारमेयकुलस्य। एषोऽपि शुनां दर्शनमपवाहयन् स्तम्भदर्शं कुड्यदर्शं च न्यलीयत। काममपि छायां समया भित्तिमगृह्णात्। निन्दित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मासौ मन्दमन्दमुपससार। आत्मानमदर्शनं निनीषुरिवावनौ प्रपदेनातिष्ठत। उग्रं पश्येनेक्षणेनानुक्षणमैक्षत। श्वानमेनं मेने। आत्मनो भागधेयं फलितममंस्त। संस्तभ्य प्राणानाहरन्मुष्टिं। प्राहरद्यष्टिम्। व्याहरद्धतोऽसीति। अपाहरत्प्राणान्। कष्टमष्टिहीनस्यानावेष्टितशिरसः कपालं यष्टिधारया लोष्टवद् बभञ्ज। यावदसौ सारमेयकुलपलालकालानलः सत्वरमन्तिकमभिदुद्राव हन्तापश्यद्विद्रुतप्राणं पुमांसं कमपि मांसशोणितदिग्धं भुवस्तलमधिशयानम्। किं कुर्याद्वराकः। भृशमखिद्यत। असमीक्ष्यकारिणमात्मानं पुनः पुनर्निनिन्द। चक्रन्द पापनिष्कृतये। अभिननन्द हिंसापराङ्मुखान। पाशं सुदूरमपास। पातकिनं दण्ड्यमात्मानं बाहुदण्डधार्यमाणस्य दण्डस्य लक्ष्यमकरोत्। तत्याज तां विगर्हितां गतिं। स्वजनमपि श्वगणनिसूदनान्निवर्त्य सुजनगणनीयमतनोत्। अहो महनीयमहिमा दीर्घदर्शी महर्षिर्वेदः। यद्यसौ तपस्वी यथाविधि शिरः प्रावेष्टयिष्यत् नैव पञ्चत्वमगमिष्यत। यतः शुक्लवसनावेष्टितशिरसमवलोक्य नियतमज्ञास्यन्नायं श्वेति। न च वा प्राहरिष्यत्। अहह दारुणो विध्युल्लङ्घनस्य परिणामः सकृदापतितस्य। यस्त्वसकृदतिवर्तते वेदशासनं तस्य दण्डे दण्डधरः स्वयं प्रमाणम्। नमस्तस्मा अपूर्वकवये निगमाय। को नाम कविर्मनसाप्युदलिखदीदृशं शुनां विनाशम्, सचेतनः कोऽपि तदर्थं भूरिपारितोषिकं च दास्यतीति। सर्वथाप्यचिन्तितोऽयं व्यतिकरः यच्छ्वसु व्यापाद्यमानेषु मनुजोऽपि तन्मध्ये पतिष्यतीति। वेदस्तु चिरायाचकलत्। करालो हि कलिः। तस्मिन्हिंसाभिरुचयो भविष्यन्ति जनाः। शुनामुत्सादने कापि व्यवस्थात्मानं लप्स्यते। मनुजा अपि केचन व्यापाद्येरन। सर्वमेतदमानुष्येणेक्षणेनाध्यक्षीकृत्य तावताप्यपरितुष्यन तत्परिहारोपायं च शिरसो वेष्टनं प्रागेव व्यधत्तेत्यहो सर्वज्ञता वेदस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवेदनम्

आर्यमिश्राः,

इयं संस्कृत-साहित्य-परिषत् केषाञ्चिद् दरिद्राणां पण्डितानाम् उद्योगेन कलिकातामहानगर्य्याम् प्रतिष्ठापिता विंशे वर्षे पदमर्पयन्ती वर्तते। ये तावदस्याः समितेः प्रवर्त्तका आसन्, तेषां प्रयत्नस्य किञ्चित् साफल्यमवलोक्य क्रमशो विशिष्टानां जनानां शुभदृष्टिरस्यां निपतिताऽभवत्। तथा हि, प्रथमवर्षस्यावसाने अस्याः सदस्य-संख्या शतद्वयम् आसीत्, द्वितीयवर्षस्यान्ते सार्द्धशतत्रयम्, तृतीयवर्षान्ते च सप्तशती, इदानीं प्रायेण सहस्रं वर्त्तते। सभ्यानां सकाशाद् वृत्तिरूपेण समासादितानि क्रमप्रचीयमानानि रूप्यकाणि कालक्रमेण त्रिसहस्रसंख्याकत्वमनुभूतान्यपि साम्प्रतिक्यामर्थकृच्छ्रतायां पुनर्द्विसहस्रात्मना परिणतानीत्यसौकर्यमनयाऽनुभूयते।

अनुष्ठानानि—(१) मासिकसभासु सदस्यानां मेलनं भवति, तत्र सर्वाण्येव कार्य्याणि देवभाषया निष्पाद्यन्ते, (२) पाठशाला वर्त्तते, तत्र दर्शनकाव्यप्रभृतीनां पाठना भवति, (३) छात्रेभ्यो वृत्तयः प्रदीयन्ते, (४) प्रतिमासं संस्कृतपत्रिका निर्गच्छति, (५) प्रायेण विंशतिरप्रकाशितपूर्वा ग्रन्था मुद्रापिताः, (६) मान्यैः पण्डितैः शास्त्रव्याख्यानादिकं क्रियते, (७) पुस्तकानि संगृह्यन्ते,—अद्य यावत् ४९०० नवशतोत्तरचतुःसहस्रसंख्यकानि मुद्रितानि ३२०० द्विशतोत्तरत्रिसहस्रसंख्यकानि च हस्तलिखितपुस्तकानि संगृहीतानि, (८) संस्कृतनाटकानां प्रतिवर्षम् अभिनयो भवति—अद्य यावत् षड्विंशते रूपकाणामभिनयो जात इति।

अतीव आनन्दकरमेतद् यदियं परिषदिदानीं भारतवर्षस्य सर्वेभ्य एव प्रदेशेभ्यो विदुषां तथा विद्योत्साहिनां जनानां साहाय्यं लभते। अस्माकमभावो महान्। पुस्तकानां संग्रहार्थमप्रकाशितग्रन्थानां प्रकाशार्थम्, छात्राणां वृत्तिपुरस्काराद्यर्थम्, देशे देशे परिषदुद्देश्यादिप्रचारार्थं च भूयान् अर्थोऽपेक्ष्यते। आशास्महे यत्तत्रभवन्तोऽचिरेणैवास्यां सदस्यश्रेण्यामन्तर्भूय अन्यथा च यथाशक्ति साहायकं विधास्यन्तीति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Rates of advertisement

in the

Sanskrit Sahitya Parishat Patrika

[Best medium for advertisement to Sanskrit Scholars and the orthodox Hindus]

Cover 2nd or 3rd (full) page	... ...	Rs 8/-	monthly
,, ,, (half) ,,	... ...	Rs 4-8-0	monthly
,, ,, (quarter) ,,	... ...	Rs 2-8-0	monthly
,, 4th (full) ,,	... ...	Rs 10/-	monthly

Special rates for long term advertisements.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

Vol. XIX, No. 3] [July, 1936.

१८५८ शकीये आषाढे १९श-वर्षस्य ३य-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती भातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्

श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषद्ग्रन्थमाला

मुद्रापित-ग्रन्थाः *

			मूल्यम् साधारणानाम्		सदस्यानाम्
२।	कालीतन्त्रम्—सटीकानुवादम्	,,	॥≈०)	,,	॥०
†३।	शङ्करीसङ्गीतम्	,,	१)	,,	१)
†४।	मुक्तिवादः—गदाधर-भट्टाचार्यविरचितः, टीकाद्वय-भाष्यानुवादसहितः	,,	५)	,,	५)
५।	দুর্গাপূজাতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্ শারদীয়দুর্গোৎসবপ্রমাণপ্রয়োগতত্ত্বরূপম্	,,	১।০	,,	১
६।	पितृदयिता—अनिरुद्धभट्टकृता, सामवेदीय-सन्ध्या-श्राद्धादिपद्धतिरूपा	,,	१।०)	,,	१)
७।	দুর্গোৎসবনিবন্ধকদম্বম্—দুর্গোৎসববিবেকাদি-গ্রন্থপঞ্চকাত্মকম্	,,	।।০	,,	।৶০
८।	कारकोल्लासः—भरत-मल्लिककृतः, सोदाहरण-कारकनिर्णयरूपः	,,	≈०)	,,	≈०)
९।	ऋग्वेदभाष्योपक्रमणिका—सायणकृता, आङ्गलभाषाटिप्पणीसमेता	,,	॥।०)	,,	॥≈०
१०।	গ্রহযাগতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্	,,	।৶০	,,	৷/০
११।	प्रभाकरविजयम्—नन्दीश्वरविरचित-प्रभाकर-सम्प्रदायानुसारि-मीमांसाग्रन्थः	,,	१।०)	,,	१)
१२।	তীর্থতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্	,,	।৶০	,,	৷/০
१३।	पवनदूतम्—लक्ष्मण-सेन-सभाकवि-धोयीकविकृतम्		॥।०)	,,	॥≈०)
१४।	नलदमयन्तीयम् (सप्ताङ्कनाटकम्)—श्रीकालीपद-तर्काचार्य्यकृतम्	,,	१।०)	,,	१)
१५।	प्रशस्तपादभाष्यम्—जगदीश-सूक्तिसहितम्, नवीनया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्		२)	,,	१॥०)
१६।	যাত্রাতত্ত্বম্—শ্রীরঘুনন্দনভট্টাচার্য্য-কৃতম্, বিষ্ণো রথযাত্রাদি-দ্বাদশযাত্রাপদ্ধতিরূপম্	,,	১৲	,,	৸০
१७।	ऋक्प्रातिशाख्यम्—उवट-भाष्यानुसारिण्या व्याख्यया समेतम्	,,	२॥०	,,	२)
१८।	प्रमेयरत्नावली—बलदेव-विद्याभूषणकृतो वैष्णवदर्शनग्रन्थः	,,	१।०)	,,	१)
१९।	छान्दोग्यमन्त्रभाष्यम्—गुणविष्णु-विरचितम्	,,	३॥०)	,,	३)
२०।	भाषारत्नम्—कणाद-तर्कवागीशकृतम्	,,	३॥०)	,,	३)

* देवनागराक्षरमुद्रितनामानि पुस्तकानि देवनागराक्षरेण तथा वङ्गाक्षरमुद्रितनामानि वङ्गाक्षरेण मुद्रापितानीति बोद्धव्यम् ।

† निःशेषितप्राययोरेतयोर्ग्रन्थयोर्मूल्यवृद्धिर्लक्षणीया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

July, 1936.	१८५८-शकीये आषाढे १९श-वर्षस्य ३य-संख्या	Vol. XIX No. 3

अभिसारः

निबन्धकः—श्रीअमरेन्द्रमोहन-तर्कतीर्थ-भट्टाचार्यः

(रवीन्द्रसरणिः)

नष्टालोके पथि घनघटालुप्ततारेऽन्तरिक्षे
रुद्धद्वारे नगरभवने श्रावणीये निशीथे ।
प्राकाराङ्के क्वचन मथुराधाम्नि नामोपगुप्तः
शान्तस्वान्तो भुजमुपदधद् भिक्षुरासीत् प्रसुप्तः ॥१॥

पादः कस्या अपि तदुरसि द्राक् पपात प्रशिञ्ज
तेनैवासौ सपदि चकितः सम्भ्रमेण प्रबुद्धः ।
दूरं यातः स्वपनजडिमा क्षान्तिशान्ते तदीये
नेत्रे तीव्रः कुवलय इव प्राविशद् दीपरश्मिः ॥२॥

तस्मिन् काले नवतरुणिमोद्दामकामोज्ज्वलश्रीः
शिञ्जानालङ्करणसुभगा चारुनीलोत्तरीया ।
क्षिप्रं दत्ता नगरगणिका कान्तगेहाय यान्ती
भिक्षोरङ्के निपतितपदा सम्भ्रमाद् द्रागतिष्ठत् ॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं नाम स्यादिदमिति तदा सोऽन्नमय्य प्रदीपं
तत्रापश्यत् तरुणवयसं कान्तकान्तिं शयानम् ।
तस्य स्मेरं वदनममलं लोचने च प्रसन्ने
स्निग्धज्योतिः स्फुरितमभवच्चापि भालेन्दुखण्डे ॥४॥
तं ह्रीभारानमितनयना चारुकण्ठं बभाषे—
बद्धोऽयं ते ननु तरुणराजाञ्जलिर्मां क्षमस्व ।
पादस्पर्शाद् भवनमपि मे पूयतां ते दया चेद्
युक्ता शय्या क्षितितलमिदं न त्वदीया कठोरम् ॥५॥
सन्न्यासी तां सुमधुरगिरोपस्तुवन्नेतदूचे—
नायं कालस्त्वदुदवसितं साम्प्रतं मे प्रयातुम् ।
तद् याहि त्वं यदभिलषितं तत्र लावण्यसारे
प्राप्ते काले स्वयमुपगमिष्यामि ते वासकुञ्जम् ॥६॥
झञ्झावायुः सपदि विकटं व्याददाद् विद्युदास्यं
मेघध्वानोपधिरुदभवद् घोररुद्राट्टहासः ।
भूतक्षोभं समपिशुनयच्चोत्थितो धूलिराशि-
र्वज्रज्वालाप्रलयशिखिना चापि दत्ता चकम्पे ॥७॥
सा सन्ध्यासीन्मधुसमयजासन्नशेषं च वर्षं
प्रावान्मन्दं सुरभिमरुदुत्कण्ठयन् पान्थयूनः ।
चूते चूते पथमुभयतो मञ्जरी लुब्धभृङ्गा
राजोद्यानेष्वपि विकसिताः पाटला रात्रिगन्धाः ॥८॥
आगाद् वंशीस्वरलहरिका वायुयोगेन दूरात्
पौरेष्वाराद् बहिरुपवनान्युत्सवार्थं गतेषु ।
दृष्ट्वा चैवं रहसि नगरीं लोकविक्षोभशून्यां
पूर्णश्चन्द्रो नभसि विमले नीरवं संजहास ॥९॥
ज्योत्स्नालोके कुसुमसुरभौ लोकसञ्चारशून्ये
भिक्षुर्मार्गे समभवदसावेककस्तत्र यात्री ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किंस्वित् पार्श्वद्रुमपिकगणाः सूचयामासुरुच्चैः
कूजन्तोऽस्मै रजनिमभिसारस्य लब्धां चिरेण ॥१०॥

त्यक्त्वा सीमां वहिरथ पुरः प्राप्य दण्डी क्रमेण
प्राकाराङ्के नगरपरिखातीरभूमौ स तस्थौ ।
पुष्प्यच्चूतद्रुमगणवनच्छायजातान्धकारे
कैपा योषिच्छिथिलकरणा पादमूले स्थिताऽस्याः ॥११॥

सर्पद्भिः साऽन्तरविरहितं स्फोटकैराचिताङ्गी
घोरं रोगं सकल इह सञ्चारयेदेव सद्यः ।
पौरा भीता इति परिहरन्तश्च सङ्गं तदीयं
दूरे पुर्याः कथमपि वहिः स्थापयामासुरेनाम् ॥१२॥

स्रस्तं तस्याः शिर उपविशन् भिक्षुरादाय चाङ्के
शुष्के वक्त्रे सलिलमददान्मूर्ध्नि मन्त्रं जजाप ।
स्पर्शक्लिष्टां तनुमथ तथा पूतिगन्धि तदीयां
भैषज्येनालिपत च करेण स्वयं चन्दनेन ॥१३॥

ज्योत्स्नाशुभ्रा रजनिरभवत् प्रावृतत् पुष्पवृष्टि-
श्चूते चूते विरुवति पिके तं तदा स्माह नारी ।
कस्त्वं कारुण्यमय समुपायात ऊचे च भिक्षुः
प्राप्तः सोऽयं समय इह तेनागतोऽस्म्यद्य दत्ते ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखिनी-विलापः

[निबन्धकः—श्रीवेणुधरतर्कतीर्थः ।]

अहमेका वराकी। निशमयत यूयं सदय-मानसा वृथा कालक्षतिमुपे माणा मम शोचनीयाञ्च विचित्राञ्च जीवनकथाम्। अत्युच्चैः कु जन्म लब्धवत्याऽपि मया दग्धभाग्यया शैशवादेव पित्रोः स्नेहसम्पर्क वञ्चितया एकैकशो हि बहवः पतयो यविष्ठा वर्षिष्ठाश्च कृतिनो बालिशा नीरुजा रुजार्त्ताश्च सुरूपा विरूपाश्च साधवोऽसाधवश्च समाश्रिताः। न पु विज्ञायते प्राक्तनः कीदृशो नाम मे दारुणतरः कर्मविपाको येन नातिस्थू नातिकृशा मधुरभाषिणी सततं भर्तृहितरता सुरूपाऽप्यहं तैस्तैः पति रन्येभ्यः कियतश्चित् कालादेवानन्तरं जातिवर्णनिर्विशेषं प्रत्यपाद्य ममान्यासां स्वसॄणामपीयमेव स्थितिः।

सुमहदिदं मे कष्टं हृदि शल्यायते, यदविवेका हि मे स्वामिनः क्लेशभू लब्धामपि मामतितुच्छेन सुवर्णायमानपित्तलभूषणेन, रायबाहादुरेत्याद्युपना लोभेन, वङ्गीयसम्भूयकारिकितवानामंशपत्रेण, लक्षमुद्रामितपुरस्कारप्रदायक द्यूतक्रीडाप्रवेशकपत्रेण, तर्कशास्त्रीयसामान्यलक्षणाग्रन्थोपज्ञर्त्विक्प्रदेय त्रिचतुरादितन्तुकपटखण्डेन, सपादपञ्चपाणकलभ्यसकलमनोऽभीष्टसाधक ताडितशक्तिमत्कवचेन, कदाचिद् गरखण्डेनापि वा विनिमयन्त इति।

ततश्चापरं मे सुमहद् विषादकारणं यत्, स्वयं रक्षणासमर्थाः केचित्ते सरलहृदयाः पतयो विनागमपत्रं सुहृद्वरेषु धनाढ्येषु मां न्यस्यन्तश्चोरादि भीतिविमुक्तचेतसः पश्चात्तैर्न्यासमपजानानैः सुहृत्पाशैः प्रायेण प्रवञ्चित नग्नम्भविष्णवश्चिरायादृष्टमनुशोचन्ति।

अन्ये च केचिदहो दयार्द्रमनसः संसारस्थित्यनिष्णाता हतश्रीक विपद्ग्राहग्रस्तानां सुहृदां हितं चिकीर्षवस्तेषां प्रतिभूभूयं भजमाना यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालं कृतान्तकल्पैरुत्तमर्णैर्भृशं ताडिता निरागसं मां जहति, दुःखपारावारे दुस्तरे चात्मानं दायादानपि भर्तव्यान् निमज्जयन्ति।

नचैतावता प्रबन्धेन चारित्र्यकलुषं वितर्कयद्भिर्युष्माभिर्ममेतिहासश्रुता-वनवधानपरैर्भवितव्यम्। नवोना हि स्वामिनो रूपेणाकारेण गरिम्णा ध्वनिनाप्तजनवचसा च बहुधा विशुद्धात्मतां सुपरीक्ष्यैव मां पाणौ कुर्वते। नारीणामिदानीं बहुविवाहमसवर्णविवाहं विवाहच्छेदञ्च लीलाप्रपञ्चं बहुमन्यमानाश्च यूयमार्या मयि वैमुख्यं भजेध्वमिति न मया कथमपि विश्वसितुं शक्यते।

सुखिनो यूयं दुःखोदधावपारे आजन्म निमग्नाया मे विषादमयीमेता-दृशीं जीवनकथां विस्तरेणाकर्णयितुमनुत्सुका भवेत; ततश्चेदानीमहं स्वनाम-धेयं कीर्त्तयामि, येन युष्माभिरनन्यासक्तचेतोभिः स्मेरमुखैर्विस्मृतक्षुत्-पिपासैरतृप्तश्रुतिभिरहमहमिकया मदन्तिकमाजिगमिषुभिः किमतः परं किमतः परमित्यहं पृच्छयेय।

नाम मे टङ्का इति। समवायेन रजतानुयोगिकाऽहं कूर्म-मुद्रादिव-द्देवानामपि सन्तोषातिशयजननी, ततश्च राजती मुद्रेति मेऽभिधानमन्यत्। वैदेशिकाः केचिन्मां रूपिया रूपीति वा अभिदधति, तदपि च नामद्वयं रूपवतीति सार्थकस्यैव नाम्न आदरातिशयजन्योच्चारणस्खलनदोष-समुत्थमित्यलमुक्त्या।

विशालतमेऽप्यस्मिञ्जगति को नाम पुमान मम कथां श्रोतुमभि-लाषुको न स्यात्। मादृशात् कृतविदेशपर्यटनाज्जले स्थले वियति च सर्वत्र पवनप्रचारमव्याहतप्रचारादशेषमनुजचरित्रवेदनविदग्धादुग्रम्पश्यरक्षिकपुरुषा-वरुद्धद्वारस्यापि भूपतेरसूर्यम्पश्यानां दाराणामनायासदृष्टाननादगणित-नालिकास्त्रमुखोद्गीर्णतप्तायोगोलकनिकरवर्षणसमाकुलेऽपि सर्वजीवभीषणतरे रणाजिरे सखेलमीक्षितभूपभाग्यपतनसमुत्थानाज्जनाद् ये नाम नाकर्णयन्ति वाचं वृथैव ते खलु विहितश्रवणा जनाः।

अयञ्चावसरो वः प्रशस्ततामवगाहते मदाननात् कथाश्रवणैषिणां काल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानाम् । यथेदानीं सुवर्णादितराणि सकलान्येव द्रव्याणि क्रमेण मूल्य-कृशिमानमुपयातानि उपयान्ति च, तथैव कालस्य जङ्गम्यमानतायां ताम्र-खण्डैः सवराटकैरेव सिद्धाशेषपणायानां युष्माकमहं नाममात्रशेषतामेव गमिष्यामीत्यसंशयं वचः । विपणौ कपर्दकैस्त्रिचतुरैरलावूनां पञ्चषैर्मूल-कानामदूरदर्शैश्च तैलताम्बूललवणादीनां क्रेयत्वकाले समायाते कलिकातास्थ-राजकीयप्रदर्शनीशालामनिविशमानाः के वा समुत्सुका मदाननं स्वेन चक्षुषाऽवलोक्य कृतकृत्या न भवेयुः ?

कथं वा मम साक्षात्कारः सुलभतामियात् ! तथाहीदानीमेव भूमेः क्रयविक्रयशब्दौ कदाचिदेव श्रुतिपथमारोहतः, राज्ञे यथाकालं षष्ठांशस्य षष्ठांशदानमपि कृषीवलैर्विस्मृतप्रायम्, सहस्रं धारयन्तोऽधमर्णा उत्तमर्णैः वृद्धिमनीप्सुभिः सप्रणयमभ्यर्थिताश्च शतमपि न निर्यातयन्ति । आङ्गल-शिक्षाशेखरमाक्रामतां बहूनां यूनां नैष्कर्म्यजनितां दुःस्थितिमीक्षमाणौ सर्दामहोदयैश्च वैवाहिकवयोवर्द्धकैरात्तकल्याणौ दुहितुः पितरौ वरशुल्क-तया सहस्राणि गेहान्न निःसारयन्ति । बाष्पयानपरिचालकसमित्या नव-नवोद्भावितप्ररोचनापरिपूर्णैराघोषणपत्रैः प्रतिपत्रं सुप्रचारमासादितैराका-रितेभ्योऽपि तीर्थयात्रिजनेभ्यो न यथापूर्वं भाटकमुपलभ्यते । बहुवित्त-व्ययायाससाध्याश्च यागादयो "हरेर्नामैव केवल"मित्यार्षवचनस्य प्रामाण्यं सम्पादयितुमनस इव शनैरन्तर्दधति । तत्पुरुषा इत्थं सर्वत एवाव्ययी-भावपक्षपातिनि भूलोके द्रागेव मे विनाशमात्यन्तिकं समूहमानैर्युष्माभिः सादरं श्रोतव्येयं विचित्रा कथा ।

अथ कदाचित् सूतिकावासाद् विनिष्क्रमय्य मामन्याभिः स्वसृभिः सह गोणीगर्भे धान्यादिबन्धं निरवकाशबद्धां बाष्पीयशकटमारोप्य कुत्रचित् पौरकोषे कतिपये राजपुरुषाः शस्त्रपाणयो झणझणाकृत्य बलेन निपातया-मासुः । अहो ! मर्त्यलोक एवासौ कोषागारो दारुणतमः कुम्भीपाकः । दिवा दशमहोरातश्चतुर्थहोरां यावद् वयं कस्यचित्तत्रत्यस्याधिकारिणो-ऽन्येषाञ्च कार्यव्यपेक्षया समागतानां मुखमन्तरान्तराऽवलोकयितुं प्राभ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाम। ततः परन्तु कुलिशकठोरस्य कवाटनिमीलनरवस्यावसानेऽन्धकारस्य पृष्ठतोऽन्धकारस्ततोऽप्यन्धकारः समन्तात् पुञ्जीभूयास्मानन्धा इवाकरोत्।

कदा नु नरकादेतस्माद् भगवतः करुणामवाप्य विमुक्तिं लभेयेति चिन्तयन्ती द्वित्रदिनानन्तरत एव नवीनाङ्गलमासप्रवृत्तौ केनचिद्राजकीय-कर्मशालालिपिकरेण प्रतिमासं भृतीनां शतभाजा सादरमहं पाणौ गृहीता पुनर्जीवलोकं प्राविशम।

अथासौ प्रथमः स्वामी कीदृशं मह्यमाचरिष्यतीति संशयाकुलित-मतिर्यावदहं तेन वासगृहमभिगच्छता सह प्रचलिताऽभवम्, तावत् स पथि काञ्चपि विपणिं "मूल्यं दिधारयिषवे न हि कस्मा अपि विक्रेतव्यम्" इति काचसंवीतसमुज्ज्वलाक्षरलिपिफलकविशोभितां निविशमान आपणिकाय पणीभूता दश मुद्राः सर्वा एव धारयमाणो विचित्रां दशहस्तमात्रां क्षौमशाटी-मेकामक्रीणात्। शाटिकाया एतादृश्या वसानामनोऽरञ्जकत्वेऽन्यादृश्याः परिवृत्त्या ग्रहणीयत्वमनुरुध्यैव मूल्यमद्य कञ्चुककोषस्थमप्यनिर्यातित-मित्यपि स प्राकाशयत्।

अद्यास्य प्रेष्ठामावासमधितिष्ठन्तीं सादरपरिहितनवशाटिकां सायं विकसदिन्दीवरायमाणविलोचनां पत्युः प्रियाकुर्वतीमवलोक्यानन्दसन्दोह-ममन्दमनुभविष्यामीति विचिन्तयन्तीं नगरोपकण्ठे कुत्रचित् प्रशस्ततमे सौधप्रकोष्ठे मामसावनैषीत्।

अथ मया तत्र कश्चिद् वर्षत्रयकुक्षिमारूढोऽर्भकस्तिस्रो रमण्यश्च विलो-किताः। तासु चैका गृहिणी, अपरा चावासकर्मकरीति नेपथ्यविधानतो-ऽसूच्यमानाऽपि सिन्दूरबिन्दुसद्भावाभावाभ्यामेव मया झटिति विविक्ततया प्राभुत्साताम्। तृतीया च गृहिण्या विधवा मातेति पश्चान्मया निरणायि। नीतिकोविदस्य विष्णुशर्मसूरिणो "यस्यार्थाः स हि पण्डितः" इति सुप्रसिद्धावितथोक्तेस्तात्पर्यमवगच्छद्भिः पाण्डित्यमूलीभूतायां मय्यपि पाण्डित्य-मवश्यं निश्चिन्वद्भिरत्रभवद्भिर्न खलु सामाजिकरीत्यनिष्णातायाः ममैवं सिन्दूरबिन्दुलिङ्गेन नार्याः पतिमत्त्वानुमानवैदग्ध्यं कथमपि संशय्येत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहं निविशमानञ्च पतिमीक्षमाणा सा सुवदना ससम्भ्रममुत्थाय पाद्यमुपानीयोन्मुक्तपादुकौ तस्य पादौ सुप्रक्षाल्य काष्ठासनविशेषसंन्यस्ते त्यक्तकञ्चुके वपुषि व्यजनं कञ्चित् कालं व्यापारयामास। अथाद्य जामात्रा मासिकवर्त्तनावाप्तिदिवसे शिशवे तनयाय किमपि क्रीडनकं मधुरखण्डकं वानेतव्यमिति कृतनिश्चयया मातामह्या प्रेषितोऽर्भकः सानन्दं पितरमुपागच्छन्नाशाविप्रलब्धः पराङ्मुखो न्यवर्त्तत। सपदि च स्वगेह एवोपकल्पितं पयःशर्कराविमिश्रं कदुष्णं "चा"पत्रक्वाथं सायन्तनाशनीयप्रभेदञ्च रसनासन्तर्पणं भर्त्रे सयत्नमुपपादयन्त्यसौ रमणीमणिः पत्रदानादानकार्यालयतो मध्यन्दिने लब्धं पत्रमेकं प्रमोचितावरणं प्रदाय तेनानुज्ञाऽवाचयत्, यत्र खलु स्वदेशस्थिता पोष्यवर्गसहिता वर्षिष्ठा जननी वसनाशनादिदैन्यं करुणमुपवर्ण्यादूरपञ्चविंशानां मुद्राणां प्रेषणाय पुत्रकं सनिर्बन्धातिशयं लिलेख।

पत्रार्थमवगच्छतस्तस्याननयने न्यधायि पदमरुणिम्ना, कण्ठस्वरे च गरिम्णा। ततश्चानयोर्दम्पत्योरेवमुक्तिप्रत्युक्ती अभूताम्—

पतिः। असह्यतामुपयाति ननु क्रमेणायं मातुराचारः। अन्तरान्तरा मत्तः किञ्चित् किञ्चित् प्राप्नुवत्यै संशूनलोभायै नाहमस्यै भूयः कपर्दकमात्रमपि प्रेषयिष्यामि। किं वा त्वं मन्यसे ?

पत्नी। अर्थविधुरा तत्रभवती तीव्रं क्लेशमाप्नोतितराम्। कथं वाऽसौ सुसहः सुखायमानाभ्यामावाभ्याम्। आर्यायास्त्वमेव तावदाशाभूमिः। कं वाऽपरं सा याचेत ?

पतिः। मया किं रूप्यकाणां प्रसवित्री कल्पलतैका स्वर्गभूमेरानीय गेहाङ्गने संरोपिता ? नाहमिदानीं पूर्ववद् वर्त्तनातिरिक्तं किमप्यर्थिप्रत्यर्थिभ्यो लभे। भृतिश्च प्रतिशतं दशभिर्हीयते।

पत्नी। यथा तथा वा भवतु, तथापि मासान्ते कस्यचनानल्पस्य धनस्यावाप्तिस्ते ध्रुवैव वर्त्तते। सन्ति च नो ग्राम्यगेहे कुलदेवता कालिका, अनूढैका ननान्दा, द्वौ चार्जनाशक्तावधीयानौ देवरौ, भृत्यश्चैको मासि मासि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजतमुद्राणां पञ्चार्हः, एते आर्याया आत्मपोषं पोष्यवर्गाः। शस्यक्षेत्राणि चैषमो वर्षासु प्रबलजलौघप्रतीघातप्रातिकूल्याद् वन्ध्यतामयासिषुः। तदस्माकं धनप्रेषणेनास्त्येव प्रयोजनम्।

पतिः। नाहं शुश्रूषे तवैवं युक्तिपरम्पराम्। जीवनान्ते सवृद्धिमूलावाप्त्यसंशयविधायकसमितौ कियतश्चित् कालान्न मया मासिकवलिप्रेषणविधिर्यथारीति निर्वर्त्तयितुं शक्यते। स्थानीयानां नियमेन घृततैलतण्डुलदधिदुग्धादिकमुपनयतामृणञ्च मन्नाम्ना तेषामायव्ययपत्रेषु क्रमादुपचीयते। भिद्यते हि धनस्योपभोगोऽर्जनादित्यवेहि।

पत्नी। तर्हि किमिदानीं करणीयमार्यया भवाननुमन्यते?

पतिः। नाहं जानामि तत् किमपि, न वा ज्ञातुमभिलषामि। कुलदेवतायाः पूजा किमिति न प्रतिरुध्यते? द्वौ च ते देवरौ किमामरणं मया प्रतिपाल्याविति स्मार्त्तानां नित्यो विधिः? या च खलु परमन्नमयाचमाना स्वोदरमेव पूरयितुमनीशा, तस्या भृत्यतो वरिवस्यालिप्सा न मह्यमविकृतमस्तिष्काय मनागपि रोचते।

पत्नी। किमेतदुच्यते ज्ञानिनाऽपि हीनजनवत्त्वया। त्वञ्चेत परो भवसि मातुस्तर्हि हन्त कस्तस्याः परेतरो भवेत्? काममहमत्रत्यानि गृहकर्माणि साकल्येनाद्यारभ्य स्वहस्तेन निर्वर्त्तयामि, अलमनया कर्मकर्या। ततश्च किञ्चिन्न उद्वर्तेत वित्तम्। तथापि आर्याया दुःखमपनोदनीयम्।

पतिः। तिष्ठत्विदानीमियमालोचना। अवसरे चान्यस्मिन् विवेचयिष्यते। परमियं सुनिपुणा दासी बहोरनुसन्धानाद् दिष्ट्या मया प्रापि, कथमपि न त्यक्ष्यते। गच्छ स्वकरणीयेष्ववहिता। अहमप्येष कस्यचिद् बन्धुजनस्यावासाय कृत्येषु साधयामि।

अथानयोर्दम्पत्योरेवं संवादपरम्परामाकर्ण्य कुटिलतरेण मानवचरित्रेण प्रथमावाप्तपरिचयाऽप्यहमस्य मयि स्नेहबन्धनमतिदृढमाकलय्य परां प्रीतिमेवागमम्। यूयं वा किं मन्यध्वे?

हा हतविधे! सा च प्रीतिर्मे दुःखिन्या हृदयात् क्षणादेव तिरोदधे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असौ वासोविन्यासविशेषेण देहेषु सौष्ठवं कङ्कतिकाप्रेषणेन सुरभिरसप्रसेकेन च केशेषु संस्कारं सातिशयमापादयन् दर्पणे मुखं पुनः पुनरवलोक्य गृहादुद्विग्नमना इव निरियाय। कञ्चुककोषे निगूढां तां शाटीं तस्याः शुभायतौ जातसंशयामन्याभिः स्वसृभिः सह दशमीञ्च मामनैषीत्।

कियद्दूरमतीत्य राजपथं क्वचिद् विपणावयं प्रविश्य दृढबद्धमुखं तरलपदार्थविशेषगर्भं काचपात्रमेकं मुद्रात्रयेणाक्रीणात्। आङ्गलभाषया तदुपरि लिखिताक्षराणां ज्ञानहीनयाऽपि तत्रापणौ क्रयकृते समुपागतानां भद्रवेशानां चिक्रीषूणां सर्वेषामेवैकविधं ससङ्कोचमिङ्गितमीक्षमाणया मया सुरापात्रमेतन्न वेति मुहुः समशायि। षटुकरणा अत्रभवन्त एव निर्णये प्रमाणम्।

यद्ययं युवा मां मूल्यरूपेण तत्रैवापणावहास्यत्तदा वरमेवाभविष्यत्। वराक्या अदृष्टलिपौ तत्तु नालेखि विधात्रा। अतः परं स कस्यचिदप्रशस्तस्य पूतिगन्धिमार्गस्य पार्श्वस्थं भवनाङ्गनमेकं प्रविश्य द्वारदेशे सङ्केतं विदधान एव द्वारमुन्मोच्य कयाचिद् युवत्या एह्येहीति सादरं करे धृत्वा गृहाभ्यन्तरं प्रवेशितः।

किमतः परं वृत्तमिति दिष्ट्या नान्वभावि सम्यङ् मया। काचपात्रस्यामुष्योन्मोचितमुखावरणस्योग्रतरेण गन्धेनाचिरान्मुकुलितलोचनायाः सम्मोहिताया मे व्यतीतो निशावशेषः। प्रातस्तु पुनरागते प्रबोधे तेनाहं प्रथमेन स्वामिना परित्यक्ता परिहिततच्छाटिकायाः स्वामिन्या वशमागतेति स्फुटमबुध्ये। विचिन्त्य चास्य हतभाग्यस्य दशां दीर्घं निःश्वसितं मया।

समाप्तो मे जीवननाटकस्य प्रथमोऽङ्कः। विश्राम्यत यूयम्। मदखिन्ना चाहं शुष्यत्कण्ठा क्षणं विश्रामं लभे।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्ता

सप्तमः परिच्छेदः

रासविहारिणोक्तम्—अस्माभिर्दत्तं विज्ञापनं यद्यस्माभिरेव प्रत्याह्रियेत, तदा तदन्यासां प्रजानां सविधे कथमिव प्रतिभास्यतीति सकृदवधीयतां त्वया मातः।

विजयया कथितम्, एवंविधेन मर्मणोपेतमेकं पत्रं कथं न तत्समीपे प्रेष्यतां भवता। मया दृढमनुमीयते, तत्रभवान् केवलमपमानमाशङ्क्यै-वात्रोपस्थातुं नोत्सहते।

रासविहारिणा पृष्टम्—अपमानः किंहेतुकः ?

विजया प्रोक्तवती, तत्रभवान ध्रुवममन्यत, तस्य प्रार्थना नास्माभि-रनुमोदिष्यते। रासविहारी प्रहासभङ्ग्या प्राह, दृश्यते महामानो जनः! अत एवास्माभिरेवापमानं पुरस्कृत्य याचमानैः सद्भिः सोऽवस्थापयितव्यः ?

विजया दीना सती प्राह, तत्रापि दोषो नास्ति पितृव्यपादाः, अयाचित-दयाविधाने नास्ति कापि लज्जा।

रासविहारी प्राह, भवतु, मा नामास्तु लज्जा ; परं कथयास्माभिः समाजप्रतिष्ठाया यः सङ्कल्पः कृतस्तस्य किं स्यात् ?

विजयया प्रोक्तम्, तस्य व्यवस्थान्तरमप्यस्माभिः कर्त्तुं शक्यते।

रासविहारी मनसि परं विरक्तः प्रकाशमीषद्धसन प्राह, तातस्तव प्रभूत-मर्थं रक्षितवान, त्वं व्यवस्थान्तरमपि कर्त्तुमर्हसीत्यहं जानामि, परमिममेकं विषयं मां बोधय मातः, यमद्य यावच्चक्षुषाऽपि नावलोकितवती, अस्माकं सर्वेषामनुरोधमतिक्रम्य तदर्थमपि वा कथं तवैतावती व्यथेति। ईश्वर-करुणया तवान्या अपि पञ्च प्रजाः सन्ति, अन्येऽपि दशाधमर्णा वर्तन्ते, तेषां सर्वेषामेव कृते किमिमां व्यवस्थां कर्त्तुं समर्था भविष्यसि, समर्थाया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मपि वा किं तत् कल्याणाय कल्पिष्यते ? मह्यमस्य प्रत्युत्तरं प्रतिपादय विजये।

विजयया प्रोक्तम्, उक्तन्तु भवते, यदयं तातपादानामन्तिमो निर्बन्धः। अन्यच्च, मया श्रुतम्—

किं श्रुतम् ?

प्रहासशङ्कया तस्य चिकित्सासम्बन्धिनस्तत्त्वानुसन्धानस्य वार्तां विजया न कथितवती। केवलमिदमाह, मया श्रुतम् सोऽपाङ्क्तेयः। गृहहीनतां लम्भितस्य तस्याऽऽत्मीयकुटुम्बानां केषामपि गृह एवाऽऽश्रयलाभस्य पन्था नास्ति। अपरञ्च, 'गृहहीन' इति वचसि मनसि जागरूक एव मम परं दुःखमाविर्भवति खुल्लतातमहाशय।

रासविहारी कण्ठं करुणया गद्गदं विधायावोचत्, तवेयति वयसि यद्येवं दुःखं स्यात्, ममैतावति वयसि तद् दुःखं कियन्महद् भवितु-मर्हतीति सञ्चिन्तय। अन्यच्च विजये, मम दीर्घे जीवने किमिदं-प्रथमतयाऽप्रियस्य कर्त्तव्यस्य सम्मुखवर्तिना मया भूयते ? नहि, तन्न, कर्त्तव्यं चिरमेव ममान्तिके कर्त्तव्यम्। तेन सह हृदयवृत्तेः कोऽपि सम्बन्धो नास्ति। वनमालिना योऽयं कठोरः कर्मभारो मयि न्यस्तः, स मया जीवनस्यान्तिमं मुहूर्त्तं यावद् वोढव्यः। तेन यावद् दुःखकष्टं मया भोक्तव्यमस्तु वा। दीयतां वा मह्यमस्मान्निखिलात् कर्मभारात् सम्पूर्णा निष्कृतिः, नान्यथा कथमपि मया तवायमनुचितोऽनुनयो रक्ष्येत।

विजयाऽवनतेन मूर्ध्ना नीरवाऽवातिष्ठत। पितुरपराधेन तस्य निरपराधस्य पुत्रस्य गृहान्निष्काशनसङ्कल्पस्तस्या हृदये यावतीं व्यथा-मसृजत, वयसस्तारतम्यं सङ्कलय्य वृद्धोऽयं यत्तस्या अष्टगुणाधिकां व्यथां सहमानोऽपि कर्त्तव्यस्य पालने बद्धपरिकरोऽभवदिति तु सा यथायथं मनसा ग्रहीतुं नाशकत। परमिदमेकं निरुपायं भाग्यहीनं प्रति प्रबलस्य सुतरां हृदयहीना निष्ठुरतेव तामपीडयत्। परं बलात् स्वेच्छायाः परिचालनस्य साहसमपि तस्या नास्ति। किञ्च, नैतदपि तस्या अविदितम्, यत् पल्लीग्रामे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साडम्बरं ब्राह्ममन्दिरप्रतिष्ठानिबन्धनस्य यशोलाभस्योच्चाकाङ्क्षयैव वृद्धस्य पितुः पृष्ठतः स्थितेन विलासविहारिणैवायमाग्रहो बलप्रकाशश्च क्रियेते।

रासविहारिणा नान्यत् किञ्चनोचे। विजययाऽपि कियत्कालं तूष्णीं स्थितया सम्मतिर्दत्तैव, परम् अन्तस्तस्याः परदुःखकातरं स्नेहकोमलं नारी-हृदयम् इमं वृद्धं तत्पुत्रञ्चोद्दिश्य जुगुप्सया परिपूर्णमासीत्।

रासविहारी विषयी जनः; न किलाविदितासीत्तस्येयं वार्त्ता, यत् स्वामिनं तर्केण सम्पूर्णं पराजित्यापि ततो ग्रहणवेलायाम् अर्धादधिकाय न स्पृहयेत्। यतः सा प्राप्तिरन्तपर्यन्तं दृढं नावतिष्ठते। अतो दाक्षिण्य-प्रकाशेन लाभवत्त्वलाभस्य कोऽपि समयो वर्तेत चेदयमेव सः। विजयाया मुखं प्रति दृष्टिं निपात्य स्मयमान आह, मातः, तव द्रव्यम्, त्वं दास्यसि, कथमहं प्रतिबध्नीयाम्। मम तावदेतावदेव प्रतिपाद्यमासीद् यत्, विलासेन यत् कर्तुमभिलषितमासीन्न तत् स्वार्थहेतोर्न वा कोपहेतोः, केवलं कर्त्तव्यमिति कृत्वैवाभिवाञ्छितं तेन। एकदा मम सम्पत् तव पितुः सम्पच्चैकीभूय युवयोरुभयोरेव करे पतिष्यति; तदा बुद्धिदानायेमं वृद्धमपि विचित्य नाधिगमिष्यसि। मा नाम तदानीं युवयोर्मतानैक्यं स्यात्, यथा च तदानीं तव पत्युः प्रत्येकं कर्माभ्रान्तमिति कृत्वा श्रद्धातुम् अर्हेर्विश्वसितुमर्हेः— केवलमिदमेव मयाऽकाम्यत। अन्यथा दातुं दयितुं च सोऽपि जानात्यहमपि जानामि। परं तत्र दानेऽपात्रगते सति कथमपि न निर्वर्तस्यति कर्मेति केवलमेतदेव मे त्वयि प्रमाणयितव्यम्। इदानीमवगतं मातः, कथमस्माभि-र्जगदीशस्य पुत्राय बिन्दुमात्रमपि दयितुं नाभिलष्यते, कथञ्च सा दया सर्वथाऽसम्भाविनीति?

एवमुक्त्वा वृद्धः सस्नेहहास्यं विजयाया मुखं प्रति दृष्टिमुन्मीलयन्नासीत्। एतेषां परमसारगर्भाणामखण्डनीयानां युक्तियुक्तानाञ्चोपदेशानां प्रतिकूल-स्तर्को नैव युज्यते,—विजया नीरवैवास्थात्। पुनश्च रासविहारिणोक्तम्, इदानीमवगतं त्वया मातर्विजये, बालोऽपि विलासो भविष्यद्विषयं कियद् विचिन्त्य कर्म करोतीति? उक्तपूर्वमेव मया तुभ्यम्, मया त्वनेनैव कर्मणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केशः शुक्लीकृतः, परं भूसम्पदः कर्मणि अस्य कौशलं बोद्धुं मयाऽपि कश्चित् स्तम्भितेन चिन्तयितव्यं भवेत्।

विजया ग्रीवासञ्चालनमात्रेण सम्मतिमसूचयत, वाक्यं न प्रत्यपद्यत।

सार्धचतुर्घटिका वेलेत्युक्त्वा रासविहारी यष्टिं करे कृत्वा दण्डायमान आह, अस्याः समाजप्रतिष्ठायाश्चिन्तया विलासो यथोद्ग्रीवः संवृत्तस्तत् प्रकाशानर्हम्। तस्य ध्यानं ज्ञानं धारणा सर्वमेवेदानीमिदमेव। इदानीमीश्वरचरणे केवलमियमेव मे प्रार्थना, यथा तच्छुभदिनमहं नेत्राभ्यामवलोक्य प्रस्थातुमर्हेयम्। इत्युक्त्वा स हस्तद्वयं योजयित्वा ब्रह्मोद्दिश्यासक्तन्नमश्चकार। द्वारोपान्तमुपेत्य स सहसाऽवस्थाय प्रोवाच, बालो यदि कदाचिन्ममान्तिकमागमिष्यत्, एवमपि यथाकथञ्चित् किमपि विवेचयितुं प्रायतिष्ये। परं तन्न कदापि—नितरां हतभागधेयो नितरां हतभागधेयः! पितुः स्वभावः सर्वथा षोडशकलयाऽधिगत इति पश्यामि। इति ब्रुवन् स बहिरगात्।

तत्र समभावेनोपविश्य विजयया किं नाम चिन्तितमित्यज्ञेयमासीत्। हठाद् बहिर्दृष्टिपातेन यदैवापश्यद् अवसन्ना वेलेति, तदैव नदीतीरस्यास्वास्थ्यकरो वायुस्तां सबलमाकृष्येवासनात् प्रच्याव्योत्थापयत्, सा चाद्यापि वृद्धं दौवारिकमाहूय वायुसेवनं व्याजीकृत्य बहिरपतत्।

तदेव स्थानमध्युष्याद्यापि स जनो मत्स्यं संगृह्णन्नासीत्। बहुदूरात्तदवलोकयन्त्यपि विजया समीपमुपेत्यापश्यन्तीव गन्तुं प्रवृत्ता,—सहसा कानाइसिंहः पृष्ठतः समाह्वयन्नासीत्—नमो महाशय, वेध्यमधिगतम्?

श्रुतमात्र एवास्मिन् वचसि विजयायाः कर्णस्य मूलपर्यन्तमारक्तमभूत्। ये मन्यन्ते दृढसौहृदं नियमेन बहून् दिवसान् बहून् आलापांश्चापेक्षते, तेऽत्र स्मारयितव्या यन्नहि, न तदत्यावश्यकम्। विवृत्तपार्श्वमात्रायां विजयायां जनो मत्स्यवेधनीमवस्थाप्य नमस्कृत्य च समीपमुपातिष्ठत् सहासमवदच्च, बाढम्, स्वदेशं प्रति भवत्यास्तात्त्विकं प्रेम वर्तत एव। किमन्यत्, तस्य ज्वरमप्यनासाद्य भवती न विरमिष्यतीति पश्यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजया स्मितमुखी प्राह, भवत आसादनं समाप्तं मन्ये ? परमाकृत्या तन्न प्रतीयते ।

जनः प्राह, चिकित्सकैः किञ्चिद् विलम्बेन ग्रहीतव्यम्, तथा निर्लुण्ठनम्— ।

असमाप्त एव वचसि विजयाऽवदत्, अपि नाम भवांश्चिकित्सकः ?

अप्रतिभः सन् स जनः सहसोत्तरयितुं नाशक्नत् । परं परक्षण एवाऽऽत्मानं पर्यवस्थापयन् परिहासभङ्ग्या प्राह, ततः किमन्यत् । कियन्-महतः कस्यचन चिकित्सकस्य प्रतिवासिनो वयम् ! सर्वेभ्यो दानादिकं विधाय तत एवास्माकम्—किमुच्यते ?

विजया तत्क्षणं किमपि वचनं नादत्त ; क्षणं तूष्णीं स्थित्वा ततः प्राह, न केवलं प्रतिवासी, स भवत एको बन्धुरित्यहमन्वमिनवम् । कच्चिन्मां तस्य कथितवानसि ?

जनो हसन्नाह, भवती तमेकम् अद्रव्यं हतभागधेयं मन्यते, सेयं पुरातनी वार्ता—सर्व एव मन्यन्ते । तदिदं नवीकृत्य वक्तुं किं प्रयोजनम् ? तथापि स एकदा भवत्या सह साक्षात्कर्तुमागमिष्यतीति शङ्के ।

विजया सातिशयमन्तर्लज्जमाना प्राह, मया सह साक्षात्कारे तस्य को लाभः ? परं तमधिकृत्यैवंविधा वाणी न मया भवते कथिता ।

अकथनेऽपि कथनमेव समुचितमासीत् ।

कथं समुचितमासीत् ?

यस्य गृहादिकं विक्रीयते, तं सर्व एव हतभाग्यं ब्रुवन्ति । वयमपि ब्रूमः । साक्षाद् वक्तुमसमर्था अप्यन्तरालेऽप्यन्ततो वयमपि वक्तुमर्हम ।

विजया प्राहसत्, उवाच, एवं तर्हि भवांस्तस्य साधीयान् बन्धुरेव ।

जनो ग्रीवां कम्पयन्नाह, सत्यमिदम्, किमन्यत्, तदीयो भूत्वाहं स्वयमेव भवतीमन्वनेष्यम् यदि नाज्ञास्यम् भवती सदुद्देश्येनैव तस्य भवनं गृह्णातीति ।

विजया सकृदेव मुखमुन्नमय्यापश्यत्, परं विषयमिममवलम्ब्य किमपि नावदत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथाप्रसङ्गेन तेऽद्य पूर्वदिनापेक्षयापि किञ्चिदधिकदूरं यावदग्रसरा अभवन्। तीरान्तरे श्रेणीबद्धः कश्चिज्जनसंघो नरेन्द्रमहाशयस्य भवनं प्रति प्रातिष्ठतेत्यदृश्यत। तत्र सङ्घे पञ्चाशतमारभ्य पञ्चदश यावद्वयः-क्रमो जन आसीत्। जनो दर्शयन्नाह, अमी क्व गच्छन्तीति ज्ञायते? नरेन्द्रमहोदयस्य पाठशालायामध्येतुम्।

विजयया चित्रीयमाणया पृष्टम्, अपि नाम स इमामपि वृत्तिमाश्रयते? परं यावद् बुध्यते, धनवर्जम्। सत्यं न वा?

जनः सहासमाह, तं याथातथ्येनाभिज्ञातवत्यसि। अद्रव्यस्य क्वाप्यात्म-गुप्तिर्न सम्भवति। ततश्चापेक्षिकं गाम्भीर्यमवलम्ब्योवाच, नरेन्द्रः कथयति, अस्मद्देशे वस्तुतः कर्षको नास्ति। कर्षणं पैतृकी वृत्तिरिति काले वा अकाले वा वारद्वयं लाङ्गलं चालयन् बीजं प्रक्षिप्य ऊर्ध्वमुख आकाशे दृष्टिं निबध्य निर्व्यापारस्तिष्ठति। नेदं कर्षणमामनन्ति, गुटिकापातक्रीडामिद-मामनन्ति। कस्मिन् क्षेत्रे कदा सारो निक्षेप्तव्यः, कः सारः, किञ्च तात्त्विकं कर्षणमिति न जानात्यपि। आङ्गलभूमाववस्थानकाले चिकित्साविद्या-ध्ययनेन समम् इमामपि विद्यां सोऽध्यगच्छत्। साधु, कदाचिद् गमिष्यति भवती तस्य विद्यालयं द्रष्टुम्? क्षेत्रस्य मध्यभागे वृक्षमूले पितापुत्रपिता-महानां मिलितानां यत्र पाठशाला भवति, तत्र?

विजया तदैव गन्तुमुद्यममकरोत्, परं परक्षण एव कौतूहलं दमयित्वा केवलमवोचत्, नहि, तिष्ठतु। अपृच्छच्च, भवतु, तथा महति भवने स्थिते स वृक्षमूले कथं पाठशालां प्रारभते?

जनोऽवदत्, सेयं शिक्षा केवलं मुखस्य वाण्या पुस्तकस्य कण्ठस्थी-कारेण वा न दातुं शक्यते। ते कर्मणा कर्षणं कारयित्वा दर्शयितव्या यदस्मिन् यथारीति कृते द्विगुणं चतुःपञ्चगुणं वा शस्यं लभ्येत। तदर्थं क्षेत्रं कर्षणञ्चापेक्ष्येते। नापेक्ष्यते पुनर्ललाटं प्रमाणीकृत्य नीरदं प्रति नेत्रे निधाय करं प्रसार्यावस्थानम्। इदानीमवबुद्धं भवत्या, कथं तस्य पाठशाला वृक्षमूले पदं करोति? तस्य पाठशालीयस्य क्षेत्रस्य शस्यं यदि पश्येदत्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवत्या नेत्रे नूनं निर्वृते भविष्यतः। इदानीमपि वेला वर्तते, कथं नाद्यैव गम्यते ? एतद् दृश्यत एव।

विजयाया मुखाकृतिः क्रमेण गम्भीरा कठिना चाजायत। तयोक्तम्, नहि, अद्य तिष्ठतु।

जनोऽनायासेनावदत्, एवं तर्हि तिष्ठतु। आगच्छतु, कियन्तं पन्थानं भवतीं पुरः प्रस्थापयन् प्रतिनिवर्तिष्ये—इत्युक्त्वा तया सह प्राचलत्। पञ्चषान् क्षणान् विजया कामपि वाचं नोदसृजत्। अन्तस्तस्या लज्जेवाभूत्, परं लज्जाया हेतुमपि सा चिन्तयन्त्यपि नाध्यगच्छत्। जनः पुनराह, यतो भवती धर्मार्थमेव तस्य गृहम् आदत्ते—यतश्चैतानि कियद्'विघा'परिमितानि क्षेत्राणि सत्कर्मण्येवोपयुज्यन्ते,—तत एतद् भवत्यक्लेशेनैव हातुमर्हति ? इत्युक्त्वा स स्मितमकरोत्।

परं प्रत्युत्तरेण विजया गम्भीरा सत्याह, एतस्मिन्ननुनयकर्मणि तत्पक्षतो भवतः कोऽप्यधिकारो वर्तते ? इत्युक्त्वा वक्रदृष्ट्याऽपश्यत्—तस्य जनस्य स्मितमुखस्य कोऽपि व्यत्ययो नासीत्।

स प्राह, नायमधिकारो दानमपेक्षते, आदानमेवायमपेक्षते। यन्नाम साधु कर्म, तस्याधिकारो मानवः सहैव [जन्मना] भगवतः समीपादधिकुरुते, मानवसमीपे करं प्रसार्य न तावन्नेतव्यो भवति। यस्यानुग्रहस्य प्रार्थनया भवतो मनसि विरक्तिा सञ्जाता, सोऽधिगतश्चेत् कैरवाप्स्यतेत्यपिनाम ज्ञायते ? देशस्य निरन्नैः कर्षकैः। अस्माकं शास्त्रे वर्तते, दरिद्रः खलु भगवतो मूर्त्तिविशेषः, तत्सेवाया अधिकारस्तु सर्वेषामेव वर्तते। सोऽधिकारः कथं नरेन्द्रात् प्रार्थ्यतामिति ब्रवीतु ? इत्युक्त्वा सोऽहसत्।

चलन्ती विजया प्राह, भवतो बन्धुस्तु केवलमेतदर्थमत्र स्थातुं न शक्ष्यति।

जनः प्राह, नहि। परं स किल मय्यपीमं भारं न्यस्य गन्तुमर्हति।

विजयाया ओष्ठाधरयोर्गूढा काचिद् हास्यरेखा प्रावर्त्तत, परमत्यन्तगम्भीरेण स्वरेणावोचत्, तदिदं मयाऽनुमितपूर्वम्।

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनः प्राह, विषय एवायमनुमानस्य। एतानि तावदादौ भूस्वामिनः कर्त्तव्यान्यासन्। तत्र ह्यत्राकर्त्तव्यमासीत्। इदानीं स दायो बाढं नास्ति, परं तस्यानुवृत्तिर्न विलुप्ता। अत एव त्रिचतुरा "विघाः" कस्मिंश्चिज्जने छलेन ग्रहीतुमुद्युञ्जान एव ते पूर्वसंस्कारवशादनुभवन्ति। इत्युक्त्वा स पुनरप्यहसत्।

विजया स्वयमप्यस्मिन् हास्यकर्मणि योक्तुमैहत, परं नाशक्नोत्। निष्कपटोऽयं परिहासस्तस्या अन्तः क्वचन विद्ध इवावातिष्ठत। कियन्त क्षणं निःशब्दं गत्वा सहसाऽपृच्छत। भवान् स्वयमपि भवद्बन्धोराश्रये भवितुमर्हति ?

न खलु मयाऽत्र स्थीयते, सम्भाव्यते, सप्ताहावसान एव प्रस्थास्ये।

विजया अन्तश्चकितेवाभवत् ; प्राह, यतोऽत्र गृहं ततो नूनमनारतं गतागते कर्त्तव्ये ?

जनो मूर्धानं चालयन्नाह, नहि, न मया पुनरत्रागन्तव्यमिति मन्ये।

विजयाया वक्षोऽन्तरा उत्थानपतने प्रावर्त्तताम्। सा मनस्याकलयत, विषयेऽस्मिन् अयथाभूतः प्रश्नो भूयः कथमपि नोपयुज्येत। परं कथमपि कौतूहलं वारयितुं नाशक्नोत्। शनैरवोचत, नूनमत्र भवतो गृहजनस्य योगक्षेमवाही जनो वर्तते, परम्—

जनो हसन्नाह, नहि, तथाविधः कोऽपि जनो नास्ति।

तर्हि भवतः पितरौ—

मम पिता माता भ्राता भगिनी कोऽपि नास्ति ;—एते वयं भवत्या भवनसान्निध्यं प्राप्तवन्तः। नमस्कारः, अहं प्रतिष्ठे—इत्युक्त्वा स गतिभेदं कृत्वाऽवातिष्ठत।

विजया भूयस्तन्मुखमीक्षितुं नाशक्नोत् परं मृदुना कण्ठेनावदत, अभ्यन्तरं नागमिष्यति ?

नहि; प्रत्यावर्तमानस्य मे अन्धकारः प्रादुर्भविष्यति। नमस्कारः।

विजया करावुद्यम्य प्रतिनमस्कृत्य परं ससङ्कोचं शनैः प्राह,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतो बन्धुं सकृद् रासविहारिमहोदयस्य समोपगमनाय वक्तुं नार्हति भवान् ?

जनः सविस्मयमाह, तत्समीपे कथम् ?

स एव तातस्य सर्वाः सम्पदः पश्यति ।

तदहं जानामि । परं तत्समोपे गमनाय कथमुच्यते भवत्या ?

विजयाऽस्य प्रश्नस्य किमप्युत्तरं दातुं नार्हत । जनः क्षणं स्थिरभावेन दण्डायमानो मन्ये प्रत्यैक्षत । ततश्चाह, प्रत्यावर्त्तमानस्य मे रात्रिर्भविष्यति—अहं गच्छामि । इत्युक्त्वा द्रुतचरणः प्रातिष्ठत ।

मेघनादवधम्

ऊनत्रिंशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदः]

उदयशैलमगाद्दिवसेश्वरः कमलपर्णसुषुप्त इवाब्जभूः ।
नयनतामरसे रुचिरे मुदा विकसिते कृतवान् पृथिवीं प्रति ॥१॥
कुसुमशेखरमौक्तिकमालया धरनिरद्य जहास सुनन्दिता ।
मधुरनाद उदैद् व्रततीगृहे शिवमहे शुभतूर्यमिवालये ॥२॥
विमलवारिणि सारसमस्फुटद्दशमुखस्नुषया च शिवे जले
विहितमज्जनया रचिता तनुः शिरसि वेणिरतीव मनोहरा ॥३॥
सुभगमौक्तिकपङ्क्तिरशोभत चिकुरमध्यगता शशिनः कला ।
लघुघनान्तरितेव शरन्निशि विपिनजातसुवर्णलतेव वा ॥४॥
मणिमयं वलयं विषदोषणि धृतमतो जनिता गुरुयातना ।
कनकहारवरः कृतवेदनो मृदुगले हितमप्यहितं गतम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहचरीं निजगाद सुविस्मिता स्वजनि भूषणमद्य किमार्त्तिदम् ।
रुदितराव उदेति कुतोऽशिवो न्ववनपसव्यमिदं स्फुरतीक्षणम् ॥६॥
स्वजनि रोदिति जीवितमद्य मे व्रज पतिं यजनालयसंस्थितम् ।
धृतपदं विनिवेदितमद्गिरं कुरु तथा रमणं विरतं रणात् ॥७॥
मधुरभाषणमन्तमुपागतं पुनरुवाच सखी शृणु रोदनम् ।
लघु लघु व्रज शम्भुनिकेतनं यजत ईशमितो महिषी परम् ॥८॥
रणमदाद् वलते विपुलं बलं रथवराश्वगजाकुलमुद्धतम् ।
कथमहं वद यामि सखि प्रियं तत्र यतः समराय स नह्यते ॥९॥
विरसवक्त्रधरे चलिते उभे विचलमानसके शिवसद्मनि ।
निशिचरेशवधूर्यजते यतोऽवितुमनास्तनयं मदनान्तकम् ॥१०॥
पशुपतिः सविषादमवोचत गिरिसुते तव तृप्तिरभूद्धृदः ।
मघवजिद् गतजीवित आहवे यजनवेश्मनि लक्ष्मणमायया ॥११॥
निशिचराधिपतिर्मम सेवकः शशिमुखि प्रथितोऽस्ति भुवस्तले ।
भवति मे हृदयं गुरुवेदनं स यदि दुःखलवाद् व्यथितो भवेत् ॥१२॥
तनयशोकसमुत्थितवेदना मम तु शूलहतेरपि दुःसहा ।
नहि विलुम्पति तां समयो बली सकलसत्त्वहरोऽपि दुरत्ययः ॥१३॥
विदितवीरसुतात्ययरावणो वदति किं स्तुति मां वरदायकम् ।
निजबलेन न तं बलिनं यदि विदध आशु भवेद्ध गतजीवितः ॥१४॥
सुरपतिं मुदितं कृतवानहं तव कृते दयिते भवमोहिनि ।
अनुमतिं वितराद्रिसुतेऽधुना दशमुखं करवै सुहितं मनाक् ॥१५॥
कुरु यथारुचि शङ्कर शङ्करी न्ववददीश मम त्वयि याचना ।
सुरपतेः फलितः सकलाशयस्तव कृपाबलतः प्रणताश्रय ॥१६॥
अनुगतो मम दाशरथिश्चिरमिति हृदीश तवास्तु निरन्तरम् ।
भुवनमङ्गलपादसरोजयोर्भव न मेऽधिकयाचितमित्यतः ॥१७॥
कृतसुहासभवः स्मृतवांस्तदा गणवरं स च सङ्गत आगमत् ।
चरणयोः परभक्तिसमन्वितः पुनरनङ्गधगित्यवदद् गिरम् ॥१८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समिति वासवजिद् यजनालये मृतिमितो बलिलक्ष्मणबाणतः ।
दितिसुता भयविक्लवमानसा इति निवेद्य वीरदशाननम् ॥१९॥
निहत एष कथं बलिराक्षसः समिति तेन न केन च विद्यते ।
जगति दैवगतिश्चिरबन्धुरा व्रज निशाचररूपधृगाशु तम् ॥२०॥
गगनवर्त्मनि भीमकलेवरः शिवचरः प्रययौ प्रणतः सुरैः ।
वियति भीतिहतैर्बहलैरलं गतकरो मिहिरो विधुरेव वा ॥२१॥
जलधिरर्चितवाञ्छितसेवकं स सुखघोपमरं पुरमाविशत् ।
स च रथी पदभारत आकुलं व्यथित पत्तनमातुरसत्त्वकम् ॥२२॥
यजनवेश्म समेत्य गणेश्वरो भुवि गतं नृपनन्दनमुज्ज्वलम् ।
सह शुचा विनिरीक्ष्य परां व्यथां हृदि दधार सुरोऽपि मरार्त्तितः ॥२३॥
तत इयाय यतो दशकन्धरः कनकपीठवरे स्थित उच्चकैः ।
बलिवरः स हि भूतगणेश्वरस्तिमितवीर्यधनञ्जयसन्निभः ॥२४॥
प्रणतिकैतवतो विहिताशिषः पुरत आस्त स तस्य कृताञ्जलिः ।
नृपतिनाथ गणेश्वर उक्तगीर्गलितदृष्टिरभूदतिविस्मयम् ॥२५॥
कुत इहागत आत्थ चरेश्वर तव कथं रसना विरता गिरः ।
मनुजदाशरथिस्तवनं(?) प्रभुः कथमिदं मलिनाननमीक्ष्यते ॥२६॥
सामतये सुरदानवघातको व्रजति राक्षसवंशविभावसुः ।
अकुशलां कथयिष्यसि कां गिरं कथय रामवधं मम तोषदम् ॥२७॥
कपटवेश उवाच मृदुस्वरमकुशलं कथमेष निवेदयेत् ।
यदि ददास्यभयं कृपणाय मे गदितुमेष तदा प्रभुरस्मि तत् ॥२८॥
त्वरितमाह बली चरनायकं नहि भयं तव मद्भवमत्र भोः ।
कथय तूर्णमभूदशुभं शुभं सकलमत्र घटेत विधीहितम् ॥२९॥
गिरिशदूत उवाच महानृप युधि गतासुरभूज्जितवासवः ।
सपदि भूप इति श्रुतवाक्पविर्भुवि पपात यथाहतकेशरी ॥३०॥
परिवृतः सचिवैः पतितो नृपो विविधवस्तुचयैरुपसेवितः ।
गिरिशवीर्यगुणेन च चेतनां पुनरवाप महेशचराद्दतः ॥३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनलचूर्ण इवाश्रयभोजिभाग् रथिवरः सहसैव समुत्थितः ।
गणवरं समचष्ट च सत्वरं वद सुतं निजघान मृधेऽङ्ग कः ॥३२॥
कितवदूत उवाच स लक्ष्मणो विधृतकैतववेश उपागतः ।
यजनवेश्मनि भूमिप नन्दनं तव जघान जघन्यनयाश्रितः ॥३३॥
स्फुटितकिंशुककल्पमहारथी तव सुतो निहतो धरणीगतः ।
ददृश आजिमुखे रुदता मया त्यज शुचं कुरु कर्म यथोचितम् ॥३४॥
प्रशमयाऽऽर्त्तकुलस्त्रिय आत्मना जहि च दुर्मतिपुत्रनिसूदनम् ।
प्रहरणेन वरेण निपात्य तं पुरजनान् सुखितान् कुरु भूपते ॥३५॥
सपदि दृष्टिपथादचलद् गणः समितिरास्त च सौरभनिर्भरा ।
निशिचरेश्वर ऐक्षत भीषणा धरणिपृष्ठगता महतीर्जटाः ॥३६॥
प्रणत आह शिवार्चक ईश्वर स्मरसि किं रहितं सुकृतेर्जनम् ।
कथमहं तव वेद्मि महेश भो अगणितां छलनां तव शक्तिजाम् ॥३७॥
विदितसर्वविभो प्रथमं तव कृतनिदेश उपेक्षितवैभव ।
अथ पदे नतभद्रदुघे पुनर्हृदि गतं सकलं विनिवेदये ॥३८॥
कुपित आह निशाचरराडहो मम भटास्त्वरितं समराङ्गनम् ।
परिवृतं कुरुताश्वगजादिभी रणरणेन शुचं यदि संक्षिपे ॥३९॥
समरतूर्यनिनादभृता सभा प्रलयकाल इवाहतशृङ्गकाः ।
निपुणवादकसंहतयस्ततो गणगणोऽपि विनिर्गत उन्मदः ॥४०॥
निशिचराश्चलिता रणभैरवा नृपपुरी ववृते भटसङ्कुटा ।
ज्वलनवर्णरथा वरवारणाः पवनवेगजितो हरयो ययुः ॥४१॥
उदपतज्जयकेतनकं बहु विजयतूर्यमभूच्च सुवादितम् ।
अगणितासरनायकचालितो विपुलराक्षससैनिक ऐत् पुरः ॥४२॥
बहिरिता बहुशः पृतना क्रुधा दनुजघातकरी सुरवीर्यजा ।
अमरशस्त्रधरीव महेश्वरी पदभरेण मुहुश्चलिता मही ॥४३॥
चकित आह विभाकरसन्तति-तिलक आत्महिते रतमानतम् ।
प्रियसुहृन्नगरी परिवेपते क्षितिरिवातिचला परिदृश्यताम् ॥४४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपिदधाति रविं घनधूमका घन इवाद्य विभा दिवि दीप्यते ।
शृणु निनादमुदन्वत उद्गतं ग्रसितुमिच्छत एवमिदं जगत् ॥४५॥
भयविपाण्डुगलं वचनं दधे सुहृदियं चलति क्षितिरर्दिता ।
पदभरेण रणोद्धतरक्षसां न तु धराचलनेन रघूत्तम ॥४६॥
न च विभां प्रलयज्वलनोद्गतां नभसि वीक्षितवान् रघुनन्दनः ।
कनकवर्णभृतां ककुभां गणः प्रहरणांशुवृतः परिशोभते ॥४७॥
न जलधेरयमारव उत्थितः श्रुतिपथं विदधाति तिरोहितम् ।
रसति राक्षसवीरगणः स्वयं नृपतिरार्त्तिहतश्च सुसज्जते ॥४८॥
वद कथं तुमुले रणसङ्कटे भटगणं सहलक्ष्मणमाकुलम् ।
अविपदं रणदुर्मदरावणाद् रघुकुलाब्जदिनेश करिष्यसि ॥४९॥
मृदु मृदूच इति प्रभुरङ्ग मे लघु लघु व्रज मित्र समानय ।
मम चमूरहमीशपदानतः सुरकुलेन विधास्य इतोऽभयः ॥५०॥
सवयसा कथिता रणभैरवाः पवनसूनुनलाङ्गदसङ्गताः ।
अमरमूर्त्तय आजिरसोन्मदा निरगुरूर्मय एवमपांपतेः ॥५१॥
रघुकुलेन्दुरुवाच युयुत्सवः शृणुत पुत्रशुगाहतरावणः ।
बहुलयोधसमन्वित इद्धरुट् सरति संहरणाय बलस्य मे ॥५२॥
टलति पूर्भटपादविमर्दिता विजितवीरवरा मम सैनिकाः ।
भवत संहतचेतस उद्यता विपदि मग्नमिमं परिरक्षत ॥५३॥
अघटि सेतुरुदन्वति वो मया करुणया निहतश्च स इन्द्रजित् ।
स्वजनबान्धवयुक्त उपद्रुतः सकलमेति निरर्थकतां भटाः ॥५४॥
रघुसुतो विजितः प्रणयैः पणैर्विपदि रक्षत बन्धव आशु तम् ।
इति निगद्य सबाष्पविलोचनो रघुकुलारुण आस्त निरुक्तिकः ॥५५॥
कपिनृपो जलदस्वनमब्रवीद् दशमुखं निहतं करवै रणे ।
निहत एष भविष्यति वा ततः प्रतिशृणोमि भवच्चरणाम्बुजे ॥५६॥
करुणया तव राज्यमितं मया त्वमसि मे धनमानसुखाकरः ।
भृतक एष पदाश्रितकिङ्करः किमधिकं कथयामि तवान्तिके ॥५७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मम भटेषु तवेष्टसुसिद्धये न भयमेति जनो रिपुपक्षतः ।
भवतु सज्जित आसरसैनिको वयमपीश रणाय समुद्यताः ॥५८॥
कुपितसैन्यगणा विदधुः स्वनं ककुभ आसत तेन निरन्तराः ।
बलचयाश्च जयध्वनिमुज्जगुर्धरणिरास्त सुखैरिव कम्पिता ॥५९॥
निशिचरेशबलानि निशम्य तं गुरुरवं विदधुः प्रतिगर्जनम् ।
दनुजशासनकार्यरणोन्मदा भगवतीव पुरा सुरहुङ्कृतेः ॥६०॥
कमलपीठसुखस्थितमाधवी निशिचरेश्वरभाग्यविधायिनी ।
श्रुतचमूनिनदाऽभवदाकुला कमलमासनमाशु च सञ्जहौ ॥६१॥
कुपितराक्षसवृन्दमलोकयद् जलधिजा वियति ध्वज उत्थितः ।
ध्वनितमासरतूर्यमतिस्वनमुपससार दिवं त्वरिता रमा ॥६२॥
विविधवाद्ययुते त्रिदशालये मधुरगीतवराभृतसद्मनि ।
कनकपीठवरे गृहिणीसखः सुरपतिर्वसति स्म मुदाऽन्वितः ॥६३॥
सुरनृपः सहसा कमलालयामुपगतां विनिवीक्ष्य नतोऽवदत् ।
पदरजो वितराम्ब तवाश्रितो जितभयोऽद्य मृतो रिपुरावणिः ॥६४॥
करुणया तव देवि सुखं दिवि चिरमहं भुनजै कमलालये ।
तव कृपा पततीह यतो जने भवति स प्रथितो भुवि भाग्यवान् ॥६५॥
सहसितं प्रबभाष इतीन्दिरा तव रिपुः पतितोऽद्य महामृधे ।
निहतवीरसुतार्त्तिशुगाहतः सबल आकुल एति दशाननः ॥६६॥
अकृत लक्ष्मण एष तवेप्सितं स सततं भवता परिरक्ष्यताम् ।
उपकृतो नहि जातु कृतज्ञतां त्यजति शक्र इहाभिजनः क्वचित् ॥६७॥
किमधिकं कथयामि शतक्रतोरविदितो नहि ते रिपुविक्रमः ।
अवितुमिन्द्र रघूत्तममुत्तमं किमपि साधनमाशु विभावय ॥६८॥
अमरनायक आह जगत्प्रसु वियति पश्य सुरान् रणतत्परान् ।
यदि समेष्यति रावण आजये नहि बिभेमि सुतार्त्तिनिपीडितः ॥६९॥
मघवसैन्यमदर्शदपीन्दिरा चकितमुत्तरतस्त्रिदशालयात् ।
इभतुरङ्गमसादिनिषादिभी रथिभिरन्यभटैश्च समन्वितम् ॥७०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्वलति पुष्करमुग्रदवानलप्रतिममत्र चकास्ति गजावली ।
निविडधूमचयश्चपला यथा ध्वजवरः कवचश्च सुचित्रितः ॥७१॥
अवददब्धिसुता वद वासव पवनसूर्यमुखा अमराः कुतः ।
त्रिदशसैन्यगणाः कथमक्षमा विगतजीवनयोनय आसते ॥७२॥
वलनिसूदन आह हरिप्रिये अवितुमात्मदिशो विबुधा गताः ।
त्रिदशकौणपभीममहामृधे धरणिरद्य लयं ननु वा व्रजेत् ॥७३॥

रुचिरचिकुरशीर्षा कृष्णकान्ता प्रसन्ना
विजयमधुरवाचः साशिषः सम्प्रयुज्य ।
कनकजलदरूढा मन्दिरं स्वं प्रविष्टा
विकचकमल आसीद्राक्षसाभीलखिन्ना ॥७५॥

इति श्रीमेघनादवधे महाकाव्ये कमलावासवसंलापो नाम ऊनविंशः सर्गः ।

नलिनीवसन्तम्

(पूर्वानुवृत्तिः)

[निबन्धकः—श्रीशिवशङ्कर-शास्त्री]

'वसन्तनलिन्योर्विवाहबन्धनं ह्यन्वययोरनयोः सुचिरव्यापिविवादप्रशमनस्य कश्चित् सदुपायो भविते"ति स मनसि चिन्तयामास। असौ धार्मिकतपोधनो विवाहहेतोर्दुर्मना आसीत्। यतः स हि द्वयोरेवान्वययोर्मित्रमासीत्। प्रायेण स विवादप्रशमनाय ईहाञ्चक्रे। परन्तु तस्य प्रयत्ना विफला जाताः। अंशतः सुविवेकचालितोऽशतश्च वसन्तं प्रति स्नेहचालितो निर्वाहयितुमैच्छदसौ जरत्तापसस्तयोर्विवाहम्।

इदानीं वसन्तः खलु सुखमनुभवति। नलिनी यथाप्रतिज्ञं वसन्ताय विसृज्य ज्ञाततदाशया जाता। तपोधनस्य तूर्णमाश्रममागम्यान्योन्यं द्वावेवोपयेमाते। असौ सुकृती तापसो भगवन्तं यूनोः प्रसादाय तथा द्वयो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रन्वययोर्विवादप्रशमनाय च प्रार्थयामास। परिणयान्ते नलिनी त्वरितं गृहमागत्य कथञ्चिद्धैर्यमवलम्ब्य यामिन्या आगमनं प्रतीक्ष्यमाणा तस्थौ। यतो वसन्तेन तस्या इत्येवं प्रतिज्ञातम् "यस्मिन्नुद्याने विगततमस्विन्यां तयोः साक्षात्कारो जातोऽस्यामेव रात्रौ तस्मिन्नेवोद्याने समागमो भवितेति। सा हि समग्रवासरं परेद्यवि प्रत्यूषसि नववेशभूषणपरिधानायोत्सुकायमानः कस्यचिन्महोत्सवस्य पूर्वरात्रे बालिकेवोत्सुका जाता।

आरोहति च हरितहये मध्यं तदह्नो वसन्तस्य सुहृदो हेमन्तस्य राजपथेन गच्छतो वीरसेनान्वयजजनसङ्घेन सार्द्धं साक्षात्कारो जातः। अहंयुर्वीरविक्रमस्तेन पृष्टोऽभूत्। अयमेवासौ वीरविक्रमो यो जरद्वीरसेनविरचितमहाक्षणे वसन्तेन सह युयुत्सते स्म। वसन्तस्य मित्रत्वादुदीरितो वीरविक्रमेण हेमन्तस्य कठोरो मन्दवादः। हेमन्तोऽपि वीरविक्रमवदोजायमानः कोपनशीलश्चासीत्। स परुषया गिरा वीरविक्रमस्य प्रत्युत्तरं प्रतिपेदे। पार्श्वगता नराः संरम्भं प्रशमयितुं बहूनि वचांस्यवोचन्। परन्तु सर्वमेव विफलं जातम्। यदा तौ परस्परवधोद्यतावास्तां तदा भीमो वीरविक्रमो वसन्तमनेनैव पथा गच्छन्तमभिप्रत्यावृत्याकृष्य दृष्टिं हेमन्तात्तं 'दुरात्मन्' इत्युक्त्वाभ्यगामीमनत्। वसन्तस्तु नलिन्याः स्वत्वात्तथा प्रीतिपात्रत्वाच्च वीरविक्रमेण समं विवादं परितित्यक्षुरासीत्। असौ विक्रमात्मजो न जातु ज्ञानसुशीलत्वात् स्वयमेव विवदन्ते स्म। विक्रमसेनवंशोद्भवनरस्याधुना नामधेयं शृण्वतोऽस्य वसन्तस्य संरम्भोद्भवस्थाने रागोपशमोऽजनिष्ट। अथ स वीरविक्रमं बोधयितुं यतमानस्तं 'साधु' इत्युक्त्वा सप्रश्रयं प्रणम्य वीरसेनवंशोद्भवस्य कस्यचिन्नरस्य नामोच्चारणे कमपि गूढहर्षमन्वभवत्। परन्तु वीरविक्रमो विक्रमसेनवंशोद्भवान् निरयमिवाज्ञासीत्। वीरविक्रमस्तु वसन्तस्य वाचमविगणय्य असिलतां निष्कोषामकार्षीत्। हेमन्तो वसन्तस्य वीरविक्रमेण समं सद्भावकारणं नाज्ञासीत्। वसन्तस्य प्रसमीक्ष्य सहिष्णुतां, ताञ्च सहनशीलतामपमानशंसिनम्रताया रूपान्तरमिव मन्यमानः स्वेन प्रथमं कलहं जिजनयिषुरुपालभत तम्। ततस्तौ सम्प्रहारं प्रचक्रतुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च पार्श्वगताः नरा विच्छिन्नमन्योऽन्यं कर्त्तुमलमासन्। परिशेषतो हेमन्तो भीषणमाहतो भूमौ पपात। अतः परं वसन्त आत्मानं संवरीतुमशक्नुवन् वीरविक्रम इव तं 'दुरात्मन्नित्युक्त्वोपालब्ध; तदाऽनयोर्युद्धं समजनि। तस्मिन्नायोधने वीरविक्रमो वसन्तेन निहतोऽभूत्। तस्य भीषणाहवस्य वार्त्ता सर्वत्र प्रसृताऽभूत्। तत्र तूर्णं काञ्चनपुरनृपतिर्हेमन्तस्य ज्ञातिः स्वयमेवाऽऽजगाम। ईदृग्विवादेन तद्राज्यस्य प्रायेण शान्तिभङ्गोऽभूत्। अतो यो हि दोषदुष्टो भविताऽस्मिन् विवादे स यथानियमं यथोचितश्च शासनीय इति सङ्कल्प आसीन्नरपतेः। चन्द्रशेखरेण स्वचक्षुर्भ्यां दृष्टोऽयं विवादः। अतो नृमणिरस्य कारणं वर्णयितुं तमादिदेश। स तु वसन्तस्य क्षेमकरां गिरमवितथामुवाच।

अस्मिन् वृत्ते वसन्तेनानुष्ठितं कार्यं हि क्षम्यमित्युवाच। वीरसेनस्य सहधर्मिणी सुतस्य वीरविक्रमस्य मरणदुःखिता नितरां प्रतिहिंसापरायणा वीरविक्रमप्राणापहारिणे यथोचितं दण्डप्रदानाय सनिर्बन्धमनुरुद्धवती। विक्रमसेनान्वयजतया वसन्तमित्रत्वाच्च चन्द्रशेखरस्य वचसि विश्वासो न स्थापनीयो यतो माध्यस्थ्यं गृहीत्वा तेन नोच्यते वच इति व्याजहार। इत्थं सा नवजामातुर्विरुद्धं प्राक्रमत वक्तुम्। वसन्तो हि तस्या जामाता, नलिन्या भर्त्ता चेति तया न ह्येतद्विदितमासीत्। वसन्तस्य माता तु स्वपुत्रजीवितरक्षणाय राजानमन्वरानसीत्। हेमन्तप्राणापहारिणो वध्यस्य वीरविक्रमस्य मारणाद्वसन्तेन दण्डार्होऽपराधो न कृत इत्युवाच। आसां स्त्रीणां वचांसि नाकरोत् कर्णे राजा। स हि सविशेषं विचार्य दण्डाज्ञया वसन्तं निर्वासितमकार्षीत्।

अस्पार्क्षीदयमेव दारुणसंवादो नलिनीं तरुणीम्। प्राक् कतिपयहोरायाः सा परिणीतासीत्। अधुना सा स्वामिविरहविधुरा नलिनी वियोगोऽयं चिराय इत्यबोधीत्। सन्देशोऽयं यदा तस्याः श्रुतिपथं प्रथममयासीत्तदा सा तमभ्यक्रुध्यत। यतस्तेन तस्याः स्वभ्राता निहतः। सा तं विविधविरोधिनाम्ना भर्त्सयाञ्चक्रे। अन्ततस्तस्य प्रेम्ण एव जयोऽभूत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्वामिजिघांसुं वीरविक्रमवधीद्वसन्त इति विभाव्य स्वभ्रातुर्निधनाश्रुपात आनन्दाश्रुत्वेन परिणतोऽभूत्। अतो वसन्तनिर्वासनजनितप्रत्यग्रजललवेक्षणा जाता नलिनी। वीरविक्रमसहस्रेभ्योऽपि सन्देशोऽस्याः प्रतिभाययते स्म।

संख्यात् परं वसन्तस्तपोवनाश्रममाशिश्रियत। तत्र भट्टारकदण्डाज्ञा-मन्तरेण परिगृहीतार्थः कृतस्तपोधनः। असौ संवादो मरणादप्यतिभीषणा-यते स्म। काञ्चनपुरप्राकाराद्बहिर्नासीत् काचिन्मही तथा नलिन्यां चक्षु-र्विषयमतिक्रान्तायाञ्च जीवनधारणमसम्भवमित्यमंस्त।

स्वर्गायते खलु तत् स्थानं न्युष्यते यन्नलिन्या।

निरयायते ननु तत् स्थानं नलिन्या यद्विनाकृतम् (?)॥

असौ धार्मिकस्तापसो दर्शनशास्त्रादुपदेशगर्भस्थानान्युद्धृत्य तमशिश्रवत्। परन्तु नाकरोत् कर्णेऽसावुन्मत्तयुवोपदेशान्। स क्षिप्तनर इव स्वकेशान् लुलुञ्च भूमौ च पपात। वसन्तः किमात्मानं निहत्य स्वप्रणयिनीजीवित-मपि जिहीर्षुरिति पप्रच्छ वसन्तम्। वीरविक्रममारणात्तस्य हननस्थाने निर्वासनस्याज्ञां ददता भट्टारकेण तस्मै दर्शितं कारुण्यमिति वसन्तः प्रोवाच। स त्वेतदपि तमुवाच—"त्वन्मारणव्यवसायी खलु त्वया निहत इति मां सुखयति। "मनसामप्यगोचरजीवन्नलिन्या त्वं परिणीत" इति कृत्वा त्वया सुखिना भवितव्यम्। परन्तु वसन्तोऽसन्तुष्टाशिष्ट-चारिणीव किञ्चिद्वस्तुजिघृक्षु नारीव तपोधनप्रमाणितसुखविषयान् ग्रहीतु-मियेष। भग्नहृदयमानवेनानुभूयते दुःखजनकमरणमिति तेन सावधानेन भवितव्यमिति वसन्तोऽभाणि तापसेन। अथ कथञ्चित् प्रकृतिमापन्ने वसन्ते तापसस्तमित्थमुपादिशत्—'वसन्तेन नलिनीमामन्त्र्य निर्वासनस्यानिर्दिष्ट-स्थानाय प्रस्थातव्यम्। यावत्तयोर्विवादप्रशामि-विवाहविषयो लोके न प्रकाशीभवति तावत्तेन तत्र स्थेयम्।

यदा प्रकाशतां गन्ताऽयं व्यापारस्तदा निःसन्देहं नरपतिरनुरोद्धव्यः। नूनं सञ्जातकृपस्तं क्षमिष्यत इति। तदा त्वं नगरपरित्यागदुःखात् समधिक-सुखमनुभवन्नत्रागन्तेति। तापसवचःप्रतीतो वसन्तः प्रणयिनीमभिप्रयाणाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमापृच्छते स्म। तस्यामेव यामिन्यां नलिन्या अन्तिकं स्थित्वा महत्येव प्रत्यूषसि तत्प्रव्राजननिर्दिष्ट-स्थानमेकाकी स गन्तेति मनसि चकार। 'काञ्चनपुरसन्देशवाहिनी पत्रिका मया तुभ्यं प्रेषणीये'ति तपोधनो वसन्ताय प्रतिज्ञातवान्।

अनायि वसन्तेन समं स्वदयितया वासतेयी सा। विगततमस्विन्यां यस्मिन्नुद्याने तेन नलिनीप्रणयगर्भवचांस्यश्रोषत, तस्यामेव रात्रौ तदुद्यान-मार्गस्थं नलिनीप्रकोष्ठं रहसि प्रविवेश। तद्रात्रौ वसन्त आस्वादितनिर्मल-सम्मदेऽप्यभ्यर्णकल्पवियोगवार्त्ता तथा विगतवासरभीषणवृत्तस्मृतिश्च प्रणयिनोः कथञ्चिदन्योन्यसहवासजनितहर्षस्य ह्रासमकार्ष्टाम्। अनीप्सित ऊषाकालस्तूर्णमागत एवेति तयोः प्रतीयते स्म। भरतपक्षिणः प्राभातिक-सङ्गीतमाकर्ण्य तत्सङ्गीतं हि नैशकोकिलानामालापमिव मन्यमाना स्थिता नलिनी। परन्तु यदा सा तत् सङ्गीतं हि भरतपक्षिण एव नान्यस्यैतद-बोधीत्तदा स स्वरो नलिन्याः कर्णे कर्कशायते स्म। आवेदितान्योऽन्य-प्रणयियुगलप्रत्यासन्नवियोगकाला बालार्ककिरणा प्राचि व्यराजन्त। ततः स खिद्यमानहृदयो वसन्तः स्ववनितामापृच्छ्य 'अनुदिनं निर्वासन-स्थानान्नलिन्यै प्रतिहोरं पत्रं लेख्यमिति प्रतिशुश्राव।

यदा स नलिनीगवाक्षादवतीर्य भूमावतिष्ठत्तदा विविधाशुभचिन्ता नलिन्या मनस्युदपादि। उपरतो वसन्त इति साऽमंस्त। आसीच्चेदृश्येव चिन्ता वसन्तस्यापि चेतसि। स तु प्रस्थातुकामोऽधुना बभूव। यतः प्रातः परं काञ्चनपुरे दृष्टश्चेत्तर्हि प्राणदण्डोऽस्य भविष्यति। अयमेव प्रारम्भो दुःखस्यानयोः। वसन्तगमनात् कतिपयवासरेभ्य ऊर्ध्वं वीरसेनो नलिन्या विवाहं प्रस्तावयाञ्चकार। नलिनी प्रागेव परिणीतेति स्वप्नेऽपि स नाज्ञासीत्। तन्मनोनीतवरो हि केशवनामा कश्चिदभिजातो युवासीत्। नलिनी चेन्न जातु वसन्तमद्रक्ष्यत्तर्हि वरोऽयं तस्या अयोग्यो नाभविष्यत्।

पितृप्रस्तावेन नलिनी समुपजातशङ्का दुःखप्रतिपत्तिमूढा चाभूत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अनधिरूढविवाहवया अचिरमृतवीरविक्रममरणशोकक्षामा चाहं जाताऽधुना। एतदवस्थायां नालमहमस्मि भविता रोचिष्णुमुखी स्वामिनं सम्भावयितुम्। किञ्च वीरविक्रमश्राद्धविधेरन्तं यावन्न गम्यते तावच्चेत् परिणयक्षणो विरच्यतेऽधुना वहिर्नितरां दृश्यतेऽशोभनम् इत्यादिकं परिणयस्य विरुद्ध' यावत् कारणं दर्शयितु' शक्यते तावत्तया दर्शितम्, केवलन्तु सा विवाहिता प्रागेवासीदिति नाब्रवीदमृषोद्यम्। परन्तु तस्या युक्तिवादान्नाकरोत् कर्णे वीरसेनः। स आगामिनि गीष्पतिवासरे केशवेन सार्द्धं विवाहाय सज्जीभवनायाशिषत्। अभिजातयुवकेशवसङ्काशवरो हि काञ्चनपुर-निवासिनां तरुणीनां योषिद्वृन्दारिकयाऽपि सानन्दं ग्रहणीय इति। इत्थं पात्रनिर्द्धारणात् परमपि नलिनीकृतस्वसौभाग्यव्याघात' स सोढुं नाशक्नोत्। कृतक्रीडाविधुरया तया परिणयोऽस्वीकृत इत्येवाबोधीत् सः।

ईदृक्सङ्कटापन्ना नलिनी विपदि सदुपदेशदातुः स्वसुहृदस्तपोधन-स्यान्तिकं साहाय्यं प्रार्थयामास। 'किं त्वया कश्चिद् दुःसाहसिकोपायोऽवलम्बितुं शक्यते न वेति' पृष्टा तपोधनेन 'स्वामिनि जीवति केशवेन सार्धं विवाहाद्वरं मृत्युरि'त्युवाच। ततस्तपोधनो वक्तु' प्राक्रमत। "प्राप्तगेहा सन्दर्शितप्रफुल्लभावाऽनुमतसहकेशवपरिणया मद्दत्तौषधं विवाहात् पूर्वरात्रे पास्यसि। एतेन त्वं द्वाचत्वारिंशद्धोरा यावच्छीतलाङ्गा विगतप्राणा भविष्यसि। परेद्यवि प्रातस्तेनागमिष्यता वरेण तदुपरतविग्रहो द्रष्टव्यः। ततस्तत्पित्राकारितोऽहं त्वत्प्राणप्रत्यानयनाय पितृकाननयनमिषेण त्वां मे नेष्यास्याश्रमाभ्यासस्थोद्यानवाटिकामिति। त्वञ्चेन्नारीजनप्रकृतिसुलभ-साध्वसं परिमुच्यास्यां भीषणपरीक्षायां सम्मताऽसि तर्हि नूनं द्वाचत्वारिंश-द्धोरायाः परमौषधपानस्य त्वं प्रबुद्धा भविष्यसि। नलिन्या प्रबोधनात् प्रागेव तस्या भर्त्ता वसन्तो विदितवृत्तान्तः कार्यः। स च तत्रागत्य त्वां निजवासस्थानं नेष्यती"ति। नलिनी प्रणयानुरोधात्तथा केशवेन सार्द्धं परिणयभयाच्च ईदृक्दुःसाहसिककार्यभारं ग्रहीतुमुत्सहते स्म। तपोधनाद् गृहीतभेषजया तया यथोपदेशं कार्यकरणाय कृतोऽङ्गीकारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौम्यवासरस्य रात्रौ प्रागौषधपानादगाहिष्ट तस्या मनो बहुविधसन्देहम् । तयोर्विवाहजनितापवादस्खालनाय तस्यै विषं दत्तन्तपोधनेनेति समुपजातशङ्का नलिनी जाता । ततो भाविन्यदत्तमना निपीततद्भेषजा विसंज्ञा जाता । परेद्युः सायं सहवादित्रादिः केशवो नलिनीगेहं यदाजगाम तदा जीवन्नलिनी-स्थाने विगतजीवितायाः शवस्य विषादशंसि दृश्यमवालुलोके । हन्त ! दैवदुर्विपाकः केशवस्य । तत्र समग्रनिशान्ते भीषणः कोलाहलः समजनि । घृण्यमरणवञ्चितहततदैवकेशवस्तद्वध्वाः कृते विललाप । प्राक् विवाहात्तयो-र्वियोग उपनीतः । परन्तु नलिन्येकतानयोः पित्रोः परिदेवनं नितरां करुणं जातम् । सम्भ्रान्तधनवतान्वयेन सार्द्धं तामुद्वाह्य सुखयितुं समये प्रसह्य नीतेयं सा निर्म्ममृत्युना । परिणयमहप्रक्लृप्तद्रव्यगणैरधुना विषाद-जननी कृताऽन्त्येष्टिक्रिया । विवाहक्षणसंगृहीतभोजनद्रव्यजातानि विषाद-जनन्या और्द्ध्वदेहिकक्रियायाः संभोजनेन विपरिणतानि । उद्वाहमन्त्रा-ण्यौर्द्ध्वदेहिकक्रियाया मन्त्राणि जातानि । प्रीतिप्रदतौर्यत्रिकादेः स्थाने मर्मभेदिक्रन्दनध्वनिरभूत् । नववधूवरगमनमार्गविकीरणसंगृहीतकुसुमानि शवदेहस्योपरि विकीर्णानि । विवाहपुरोधसः स्थानेऽन्त्येष्टिक्रियायै पुरोधसः प्रयोजनं जातम् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समालोचनम्

Srimad Bhagavad Gita, Chapter II Edited with Introduction, notes, translations, explanations and the commentaries of Śrīdharasvāmin, Veṅkaṭanātha, Jñāneśvara etc. etc., by J. C. Chatterjee, B. A. Published by Sen Ray & Co., 15. College Square, Calcutta. pp. 256.

Price Rupee one only.

आलोच्ये ग्रन्थे मूलम्, श्रीधरस्वामिकृता टीका, वेङ्कटनाथटीका च सर्वत्रानुस्यूता वर्त्तते। श्रीभगवच्छङ्करपादकृतं भाष्यम् अप्यन्तरान्तरा प्रयोजनमनुरुध्य यथास्थानमस्ति सन्निवेशितम्। आङ्गलभाषामयोऽनुवादः, आङ्गलरीत्या प्रतिपदं वैयाकरणी व्याख्या चेत्याङ्गलविद्यालयेऽपेक्षितानि सर्वाणि वस्तून्यपि महता यत्नेनात्र निरूपितानि सन्त्युपलभ्यन्ते। परं नात्रैवास्य समाप्तिर्वै शिष्यस्य, अस्ति चात्रान्योऽपि कश्चन बहुमतो विषयः प्रेक्षावतामत्यादरभूमिः। सा च गीताया यौगिकी व्याख्या। उपनिषद्धेनोरुपस्नुतमिदं गीतामृतदुग्धं न केवलं व्याकरणेन्धनेन दर्शनोष्मणा च विपाच्य श्रवणपुटपेयं कर्त्तव्यम्, परं यथाऽत्रापरोक्षानुभूतिर्जायते शिष्याणां तथैव यत्नो विधेय इति प्रेक्षावन्तो मन्यन्ते। आस्थितश्चात्र सम्पादकवर्येण सातिशयो यत्न इति परां मुदमनुभवामः।

कालवशात् कृशिमानमश्नुवति मानवानामत्यन्तोपकारिणि धर्मभावे शिक्षासरण्यामप्यन्यादृश्येव दृश्यते काचित् परिवृत्तिः। नहीदानीं पुरेवाक्षरमुखमात्र एव बालके उपकल्पयन्ति गुरवोऽध्ययनार्थं सप्तशतीं गीतां वा। किं बहुना यत्र पुरा बालानां मनस्तोषमात्रफलकतया रामायण-महाभारतादीनामितिवृत्तानि पदमकुर्वंस्तत्रेदानीमनार्याणामज्ञातपरिणामानि चरितानि शिक्ष्यन्ते पितृभ्यामन्यैश्चोपदेशकैः।

एवं गते कलिकाताविश्वविद्यालयकर्त्तृभिः आइ, ए परीक्षायाः पाठ्यरूपेण श्रीमद्भगवद्गीतां निरूप्याविष्कृतमात्मनः प्राचीनवस्तुविषयकं प्रेम, परिष्कृतश्च धर्मभावप्रचारवैशेष्येण शिष्याणाममलिनमप्यासङ्गदोषेण कलुषीभवच्चेत इति सर्वथा तेऽस्माकं धन्यवादमर्हन्ति। अपि नाम दृष्टान्तमिममनुकुर्वन्तः संस्कृत-एसोसियेशनकर्त्तृपक्षाः स्वाधीनासु परीक्षासु प्रत्येकं धर्मग्रन्थमेकं पाठ्यतया निर्धारयेयुः ?

अत्राङ्गलभाषामयं वस्त्वाङ्गलाक्षरेण संस्कृतभाषोपनिबद्धं वस्तु च वङ्गाक्षरेण मुद्रितं वर्तते। शिक्षणीयं सर्वमेव वस्त्वत्र विचित्य विचित्योपनिबद्धमित्यनुगृह्णन्तु पाठकमहाभागाः, गृह्णन्तु च यथाप्रयोजनमेकैकं खण्डमित्यल्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Opinions of distinguished persons on the activities of the Parishat

——o:o:o——

His Excellency the Right Hon'ble Victor Alexander George Robert Bulwer-Lytton, Earl of Lytton, P.C., G.C.I.E. Late Governor of Bengal:—

The members of the Sanskrit Sahitya Parishat gave a most admirable performance this evening of the drama Sakuntala which gave the greatest pleasure to the audience assembled to witness it. The text of the play was necessarily greatly abbreviated in order to be compassed within $1\frac{1}{3}$ hrs.; but the selections were well-made and the general effect did not lose much by the omissions. The acting was very creditable and the whole performance was most interesting. I am very grateful to the society for the pleasure they afforded to me and my guests.

Frh. Rudt Von Collenberg, *The Hon'ble the Consul General for Germany in India and Ceylon.*

I have had, several times, the opportunity of receiving invitations to the dramatic performances of the Sanskrit Parishat, and on every occasion, it was a joy to me to witness these excellent performances. Even for those who do not have a mastery of the Sanskrit language, it is a pleasure to follow the impressive acting of the players, who, with skill and energy, do justice to their difficult task.

It seems to me to be a very happy idea through such performances as well as through other works of the Sanskrit Academy to arouse in wider spheres an interest in the time-honoured language of India, in which works have been composed, which form a part of the most valuable properties of mankind. *(Translated from the original in German.)*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Mrs. H. M. Lindsay, M.A., B.Sc. *Wife of Mr. J. H. Lindsay, M.A., I.C.S., late Secretary to the Department of Education, Government of Bengal.*

Through the kindness of the members of the Sanskrit Sahitya Parishat we were enabled to witness a presentment of the ancient play, "Madhyama-Vyayogam," on the 19th July, 1927. The staging, dressing and acting were alike excellent. Indeed so good was the acting that one could follow the play without any knowledge of Sanskrit. It is to be hoped that soon the Sanskrit Sahitya Parishat will have a habitation befitting its culture. Its collection of ancient manuscripts is worthy of a better setting.

Sir Naliniranjan Chatterjee, Kt., M.A, B.L,
Formerly Offg. Chief Justice, Calcutta High Court, and President, Calcutta Sanskrit Association.

The Sanskrit Sahitya Parishat is doing valuable work in furthering and encouraging Sanskrit culture. One of it main activities is the collection and publication of Sanskrit manuscripts and editing of a monthly Journal in Sanskrit. The *tol* attached to it reflects credit on the teachers. The Sanskrit Parishat is doing educative work of a sound type by staging Sanskrit plays. Having regard to the manner in which the work of the institution is being carried on in all its departments, I think it has a great future, and it richly deserves encouragement and support from the public and the Government.

সংস্কৃত-সাহিত্য-পরিষৎ-পত্রিকায় বিজ্ঞাপনের হার

কভার ২য় বা ৩য় পৃষ্ঠা (সম্পূর্ণ) মাসিক	...	...	...	৮৲
,, (অর্দ্ধেক) ,,	...	...	...	৪৷৹
,, (এক-চতুর্থাংশ) ,,	...	...	...	২৷৹
কভার ৪র্থ পৃষ্ঠা (সম্পূর্ণ) ,,	...	...	...	১০৲

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

Vol. XIX, No. 4] [August, 1936.

१८५८ शकीये श्रावणे १९श-वर्षस्य ४र्थ-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारते भातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्

श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलिकाता ओरियेण्टाल सिरिज

१। **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्माणम्, छत्र-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, शस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगीऽयं ग्रन्थः—२॥०)

२। **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर-ओहान फ्यान् म्यानेन-कृताङ्गलभूमिका-समेतम्—॥=०

३। **मुक्ताफलम्**—बोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेयतया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ लाहा, पि-एइच. डि. लिखितबृहदाङ्गल-भूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६)

४। **चाणक्यकथा**—रविनर्त्तकविरचिता। विशाखदत्तकृत मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनावृत्तिः)—१)

५। **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं स्वोपज्ञवृत्तिसमेतमतिप्रमाणभूत-मलङ्कारशास्त्रम्, डाः श्रीसुशीलकुमार दे, डि. लिट्. महोदयेन संशोधितम्—३॥०)

६। **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मकः शकुन्तलोपाख्यानम् पातालखण्डस्यैका-दशाध्यायात्मक-रघुवंशवर्णनञ्चात्र वङ्गदेशीयपलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्यापक-श्रीहरदत्तशर्म्मणा सुबृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्वीजभूतत्वं पद्मपुराणस्य—२)

७। **जयमङ्गला**—श्रीशङ्कराचार्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२)

८। **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रा-म्बुधिरिति शक्यते वक्तुम्—३)

৯। **ব্রহ্মসূত্রম্**—শ্রীমদ্ভাগবতভাষ্যসমেতম্। "অর্থোঽয়ং ব্রহ্মসূত্রাণাং শ্রীমদ্ভাগবতাভিধঃ" ইতি গারুড়বচনস্য যাথার্থ্যং প্রদিদর্শয়িষতা পণ্ডিত-শ্রীহরি-দাসবিদ্যাবাগীশেনাত্র শ্রীমদ্ভাগবতগ্রন্থাদুদ্ধৃতা গ্রন্থাংশব্রহ্মসূত্রভাষ্যতয়া নিরূপিতাঃ, ব্রহ্মসূত্রাণি চ বঙ্গভাষয়া বিশেষেণ ব্যাখ্যাতানি—২॥০

प्राप्तिस्थानम्—

कलकाता ओरयेण्टाल बुक एजेन्सी
९ पञ्चानन घोष लेन, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भारते भातु भारती"

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता।
१८५८ शकाब्दे
सौराश्विनस्य सप्तमदिवसः।

सबहुमानमावेदनम्—

महोदयाः, आगामिनि सौराश्विनस्य एकादशदिवसे रविवासरे सायं सप्तवादनतः परिषदो वर्त्तमानवर्षीयं मासिकाधिवेशनमेकं भविता, तत्र भवतां समुपस्थितिः साग्रहं प्रार्थ्यत इति।

विनीत—
श्रीअमरेश्वर-ठाकुर-वेदान्तशास्त्रिणः
श्रीप्रबोधचन्द्र वागची देवशर्मणश्च
सम्पादकयोः।

आलोच्यविषयाः—

१। विगताधिवेशन-कार्य्यविवरणपाठः।
२। नूतन-सभ्यनामप्रचारः।
३। १३४२ वङ्गाब्दीयायव्ययानुमोदनम्।
४। १३४३ वङ्गाब्दीय-कार्य्यनिर्व्वाहकसमितेः सदस्यानां कार्य्यपरिचालकानां च निरूपणस्यानुमोदनम्।
५। निबन्धस्य पाठः—
"यत् किञ्चित् प्राप्तकालम्" इति शीर्षकस्य
निबन्धकः—श्रीयुक्त-रामकृष्ण-चक्रवर्त्ती, एम. ए.
६। विविधाश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

August, 1936. | १८५८-शकीये श्रावणे १९श-वर्षस्य ४र्थ-संख्या | Vol. XIX No. 4

"कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्"

[निबन्धकः—श्रीयतीशचन्द्रभट्टाचार्यः]

इह हि जगति परमकारुणिकेन परमेशेन सृष्टेषु जीवनिवहेषु सर्व एव जीवा जाताः सन्ततं सुखमभीप्सवो निरवच्छिन्नं सुखं मे भूयान्न किञ्चि-द्दुःखमित्यविरतं कामयन्ते। निरवच्छिन्नं सुखं न स्वर्गसुखात्मकम्, स्वर्ग-सुखस्य पुण्यकालमात्रस्थायित्वेन "क्षीणे पुण्ये मर्त्यलोकं विशन्ती"ति प्रामाण्यदर्शनात्। यद्यपि

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम्॥"

इत्याप्तोक्तिस्तथापि तादृशी न कामना पदमादधाति क्वापि। अपि तु तच्चरम-दुःखध्वंसापरपर्यायं परममुक्त्यात्मकमेव। तादृशी च निरवच्छिन्ना सुखा-त्मिका मुक्तिस्तत्त्वज्ञानादेव सम्भवति। "तत्त्वज्ञानेन हि मिथ्याज्ञानध्वंसे तन्मूलरागद्वेषयोरभावात् तदधीनधर्माधर्मसाधने प्रवृत्त्याद्यभावेन तद्धेतुका-ग्रे तनजन्मादेरभावात्तन्निमित्तदुःखस्याप्यभावः।" महर्षिणा गौतमेना-प्येवमेवोक्तम्—"दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तद-नन्तरापायादपवर्गः" इति। मोक्षसाधनं ज्ञानमेव। "ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते" इति वचनात्। अत एवाह—"निःश्रेयसं पुनस्तत्त्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानोत्-पाद्य–मिथ्याज्ञानकारणप्रध्वंससमानाधिकरणतत्कार्यसमस्तदुःखाभाव" इति। तथा च

"तमेव विदित्वाऽतिमृत्युमेति। नान्यः पन्था विद्यतेऽयनाय" इति श्रुतिः।

"यदात्मानं विजनीयादहमस्मीति पुरुषः।
किमिच्छन् कस्य कामाय संसारमनुसंस्मरेत्॥"

इति स्मृत्या च जीवात्मनोरभेददर्शनेन तादृशं निरवच्छिन्नं सुख सम्भवेत्। तादृशाभेदभानार्थं दर्शनशास्त्रस्य अवश्यमावश्यकत्वेन दर्शन शास्त्राणां नीरसतया बहुशो मतभेदाद् दुर्बोधतया बाहुल्याच्च तेषु शास्त्रे सुकुमारमतीनां बालानां साधीयसी प्रवृत्तिर्न स्यादिति काव्यशास्त्रावतारः काव्यस्य सरसतयाऽनतिबहुलतया सुखबोध्यतया च तेषु बालानं साधीयसी प्रवृत्तिः स्यादेव। तथा रामादिवत् प्रवर्त्तितव्यं न तु रावणादि दिति कृत्याकृत्य-प्रवृत्तिनिवृत्त्युपदेशद्वारेण स्वाभिलषितसम्पादकतया अहमह मिकया तत्र श्रेयसी प्रवृत्तिरविरुद्धैव सुकुमारमतीनामपि।

काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः॥

तत्र च

"करोति कीर्त्तिं प्रीतिञ्च साधु काव्यनिषेवणम्।"

इत्यादिना विष्णुपुराणेऽपि तथा प्रतिपादितम्।

"एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके कामधुग् भवति।" इति श्रुत्या च सूच्चारितकाव्यादपि कामनापूरकत्वं प्रकीर्त्तितम्। किञ्च कटुकौषधोपशमनीयो रोगः सितशर्करोपशमनीयश्चेत् कुत्र साधीयसी प्रवृत्ती रोगिणाम्?

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मितयोपदेशयुजे॥"

इत्याद्यालङ्कारिकवचनसामर्थ्यादपि काव्यस्यानेकश्रेयःसाधनत्वञ्च प्रति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादितमेव। 'काव्येन हन्यते शास्त्रमि'ति 'काव्यालापांश्च वर्जयेदि'त्याद्यसत्काव्यविषये प्रतिषेधः, न तु सत्काव्ये। ऐहिकपारत्रिकसुखसाधनं काव्यं दृश्यश्रव्यभेदेन द्विविधमपि श्रव्यकाव्यतः केवलं श्रवणनिर्वाहाद् दृश्यकाव्यतः श्रवणदर्शनोभयनिर्वाहान्नाटकापराख्यं दृश्यकाव्यं सर्वोपरि वरीवर्त्ति। सत्स्वप्यनल्पेषु भवभूतिप्रभृतिप्रणीतेषु नाटकेषु महाकविकालिदासकृतिकृतमभिज्ञानशकुन्तलाख्यं नाटकमन्धस्य यष्टिरिव, प्रदीप इव ध्वान्तनिपतितस्य, पानीयमिव तृष्णातुरस्य, लोचनं लोचनहीनस्येव सुधीसमाजेषु सकलसुधीनां सुकुमारमतीनामपि चेतस्यपूर्वमननुभूतमानन्दं कमपि समजनयत्। रङ्गमञ्चेऽभिनयावसरे नाटकमिदमचेतनमपि रसिकमनांसि सततं समुल्लासयद् वियोगिहृदयस्थं मन्मथानलमुज्ज्वलयत् करुणहृदयं करुणरसेनाभिषेचयत् किं किमनल्पं सचेतःकार्यं नाकार्षीत् करोति च। अतः सत्यमुक्तं महाजनैः "काव्येषु नाटकं रम्यं नाटके च शकुन्तलमि"ति।

धीरोदात्तलक्षणलक्षितमप्रतिरथं प्रख्यातवंश्यं राजर्षिं दुष्यन्तं नायकं विधाय तत्रभवता कविवृन्दारकेण नवीनतमभावपद्धतिप्रदर्शनेन 'अभिज्ञायते शकुन्तलाऽनेने'ति नाटकस्यास्य यथार्थनामत्वं समपादि। नायकवरोऽसौ शकुन्तलायाः प्रथमदर्शनानन्तरं पञ्चशरशरनिकर-निकृतचेता अपि न माधव इव न दाशरथिरिव न च विक्रम इव चपलतां नापलपत्। दुष्यन्तस्य मधुरगम्भीराकृतिमालोक्य सुमधुरञ्च वचनविन्यासमाकर्ण्य शकुन्तलाया हृदि सञ्जात आश्रमविरोधी भावः। प्रियंवदानसूये च विस्मयान्विते बभूवतुः। शकुन्तलाया अलोकसामान्यं सौन्दर्यं दृष्ट्वा मोहं गतोऽपि राजा तामुपयन्तुमचिन्तयत्। तत्र तेनैव मनसि एवं चिन्तितम्—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥

इति। आशातीतं वचनमिदं श्रुत्वा को न विस्मयाभिभूतो भवति ? नूनमेव वागियमेकपदे तस्य राज्ञः सुशिक्षामलोकसामान्यचरित्रञ्चोद्घाटयति। अपि तु द्वितीयाङ्कावसाने करभककथितमातृनिदेशाविरोधेन ऋषिजनादिष्टं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षोविनाशरूपं कर्तव्यं प्रतिपालयन् नायकोऽसौ तदानीमनन्यसुलभां स्वकर्त्तव्यपरायणतामप्रथयत् ।

तत्रभवतः प्रथितयशसः कविपुङ्गवस्यानुपमममरकविप्रतिभादीपदीप्तं खलु नाटकमिदं भागद्वयेन विभक्तमिति मन्ये । तत्र च प्रथमे शकुन्तलायाः पूर्वमेलनं मर्त्यचञ्चलसौन्दर्येण विचित्रतरम्, द्वितीये परिणतिश्च स्वर्गतपोवनस्य नन्दनकाननस्य शाश्वतानन्दजनिका । नाटकेऽस्मिन् नायिकाया नारीत्वस्य प्रकटनेन समं मर्त्येन त्रिदिवस्याव्यवहितं मेलनमस्माकमनायासेन प्रत्यक्षं भवति । अङ्कसप्तकेन विभक्तस्यास्य नाटकस्य प्रथमेऽङ्के कविकुञ्जरेण उद्दामवासनया यौवनजन्यमत्ततया च साकं शकुन्तलायाः पराभव-पातने तथा चित्रिते यथेयं मृत्पुत्रिकेति बुध्यते । जन्मतस्तपोवनलालितायास्तस्या नैसर्गिकी सरलता तदीयं मर्मस्थानं सुरक्षितमकरोत् । अविदितकन्दर्पपुष्पशरप्रभावा हि सा, तत एव प्रणयपण्डितस्य तस्य राज्ञः प्रणयप्रभावेण सहसा पराजितायास्तस्याश्चारित्रोत्कर्षं स्वाभाविकं सतीत्वञ्चानायासप्रकाशमनायि । तदुपरि यन्मालिन्यमागतं तदपि तच्चित्तं न मलिनमकरोदिति । एतत्तु तस्याः सरलताया निदर्शनम् । तपोवनं यथैकतस्तस्याः सारल्यमरक्षत् तथाऽपरतोऽपरिहार्यनियमेन तामप्रगल्भां दुःखशीलां व्रतचारिणीं सतीत्वस्याऽऽदर्शरूपिणीमकरोत् । गान्धर्वविवाहे शकुन्तलायाः स्वाभाविक्युद्दामता विवाहबन्धनस्य हि मणिकाञ्चनसंयोगश्चाभवदित्येवं बन्धनाबन्धनसङ्गमभूमिमारूढं नाटकमिदमनन्यदुर्लभतामपरुषत्वञ्च लेभे । शकुन्तलाया विश्वासनिष्ठा सरलता बहुवल्लभस्य राज्ञो निष्ठुरत्वं कल्पयितुं नाशक्नोदिति सा तस्मिन् राजनि प्रत्ययमाधाय तं राजानं पतिरूपेण वव्रे । शकुन्तलायाः प्रत्याख्यानेन दुष्यन्तस्यान्तर्दाहस्तमस्थिरमकरोत् । नितरां दुःखनिपतितः सन् स राजा प्रेम्णोऽकृत्रिमतामबोधि । अग्निना सुवर्णमिवानुतापानलदग्धं तदीयं मनः स्वीयमलिनतां परिहृत्य तं शकुन्तलायाः प्रेम्णः पात्रमकरोत् । तदानीमेव दुष्यन्तशकुन्तलयोर्बहिर्मेलनमिन्द्रियलालसापूर्णमेलनं हि स्वर्गतपोवनयोराभ्यन्तरिकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेलनमिव पर्यगणयत्। नाटकेऽस्मिन् एकत्रैव स्वर्गमर्त्त्ययोर्मेलनोपलब्धिं कर्त्तुं प्रभवामः। पुष्पस्य परिणतिः फले इति यत्तथ्यं तत्तु परिलक्षितमत्र, यतः सरलताया विच्युता दुःखितेयं तपःप्रभावादेव शाश्वतं स्वर्गसुखं भुञ्जानासीदत एव सह त्रिदिवेन मर्त्त्यमेलनमभूदिति।

नायिकाया अलोकसामान्यं सौन्दर्यमनिशं साफल्यं लेभे। तरुलता-पशुपक्षिप्रभृतयो रक्षितात्मभावा मनुजैः सहाऽऽत्मीयभावेन मधुरं मिलन्त आसन्नित्येवं प्रदर्श्य जडपदार्थे मनुजगुणानारोप्य च नाटकस्यास्य चमत्कारित्वं प्रदर्शितं कविवरेण। तथा च चतुर्थाङ्के समं चेतना-चेतनाभ्यामात्मीयता सुपरिस्फुटा दृश्यते। सरलतया पुष्पस्येव तस्याः शकुन्तलायास्तपोवनेन सह सहजसम्बन्धो बभूव। पशुपक्षिसकाशाद् विदायग्रहणावसरे तदीयं मर्मस्थानं न केवलं विक्षतमभूदपि तु प्रकृतेरङ्क-लालिता सा स्वीयां स्वाभाविकीं परिणतिं मनोरमामकरोदिति यत्तदन्यत्र न सम्भवतीति नाटकस्यास्योत्कृष्टत्वे हेतुः।

"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥"

इत्यादिः शकुन्तलायाः पतिगृहगमनकाले महर्षेः कण्वस्य या मर्मभेदिनी वाणी साऽपि तत्रभवतः कालिदासस्य मनुष्यप्रकृतेर्ज्ञानं प्रकृष्टभावेन सूचयति। तथा च "शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने" ...इत्यादि प्रस्थानावसरे शकुन्तलां प्रति काश्यपस्योपदेशाशीश्च नाटकस्यास्य परमरमणीयतां सम्पादयति, अतः सत्यमुक्तं रसज्ञैः—

"काव्येषु नाटकं रम्यं नाटके च शकुन्तला।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥" इति।
"गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कृत्ययोर्भिन्नदेशत्वाद्द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ॥"

"भ्रमर इव विभाते कुन्दमन्तस्तुषारम् ।"

"ध्रुवं स नीलोत्पलपत्रधारया शमीलतां च्छेत्तमृषिर्व्यवस्यति ।"

इत्यादिकं विभाव्य मन्यामहे यत्तथ्या—"उपमा कालिदासस्ये"ति महाजनोक्तिः ।"

चपलप्रकृतिर्हि दुष्यन्तः । स खलु मुनेराश्रमाद् राजधानीं प्रत्यागत्य कतिपयदिनानन्तरमेव तां शकुन्तलां विसस्मार । निजप्रवृत्तेर्भूयो भूयः प्रेरणातोऽसौ तापसकन्यकां प्रत्यासक्तोऽभवद्, तस्मादेव स तां प्रेमपात्रमकरोद् न तु प्रेम्णः पवित्रता तत्राऽऽसीद् । इत्थञ्च यत् स्वाभाविकं तस्य निष्ठुरत्वं क्षोभजनकत्वञ्च विविच्य कविरसौ स्वीयरूपकस्यास्य सामञ्जस्यविधानार्थमेव—

"विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव ॥"

इत्यादिना दुर्वाससो दुर्भाषाव्यापारं विवृतवान् । यच्च वयस्यं प्रति

"परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः"

इत्याद्युक्तो राज्ञो दुष्यन्तस्य तदपि "यदि नाम विदूषको विदितैतद्वृत्तान्तस्तर्हि स एव शकुन्तलास्वीकारस्मारको भविष्यति" इति हेतोः । राज्ञा तस्याः सखिभ्यां प्रदत्तमभिज्ञानमङ्गुरीयकं निरर्थकं स्यात्तथा च रूपकस्यानन्यरमणीयता न भवेदिति परिकल्प्य दुर्वासोऽभिशापरक्षणार्थं नाटकेऽस्मिन् राजपुरुषैर्जालिकनिग्रहादिकञ्च प्रदर्शितं कविकुञ्जरेण ।

नाटकेऽस्मिन् स्त्रीशिक्षायाः प्रमाणानि बहूनि सन्ति । प्रथमाङ्के राज्ञो दुष्यन्तस्य यथानियममतिथिसत्कारं विधाय सह सखिभ्यां शकुन्तला सहागन्तुकेन वाक्यालापं कर्त्तुं परितस्तमनतिदूरमुपविवेश । तृतीये वयं स्वामिविरहेण म्रियमाणामिव शकुन्तलां पश्यामः । सा तु शुकोदरस्निग्धं नलिनीपत्रं नखैर्निक्षिप्तवर्णमकरोत्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तव न जाने हृदयं मम पुनर्मदनो दिवापि रात्रावपि।
निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गानि ॥"

इति। अतः परं पञ्चमाङ्के परिलक्ष्यते यद् राज्ञः सङ्गीत-शालाभ्यन्तरे प्रणयपिपासू राज्ञी हंसपदिका तं दुष्यन्तं तिरस्कर्त्तुमिदं गीतवती—

"अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर ! विस्मृतोऽस्येनां कथम् ॥"

इत्यत्र विद्यावत्तायाः पूर्णः परिचयः। विदूषकोऽस्यार्थं नावजगाम। दुष्यन्तो मुग्धः सन्नुवाच—"अहो रागपरिवाहिणी गीतिः।" सप्तमेऽङ्के यदा दुष्यन्तः शकुन्तलायाः पुरतो नतजानुरभवत्तदा साध्वी सा स्वामिनो बाहुयुगलं ससम्भ्रमं धृत्वोवाच—

"उत्तिष्ठतु उत्तिष्ठत्वार्यपुत्रः। नुनं मे सुचरितप्रतिबन्धकं पुरा कृतं तेषु दिवसेषु परिणामसुखमासीत्। येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरसः संवृत्तः।"

अत्र स्वेच्छया स्वामिनः सर्वापराधमात्मनोऽदृष्टस्योपरि संस्थाप्य लीलया शकुन्तला दारुणां विरहव्यथामपि विसस्मार। अत एव तस्मिन् समये स्त्रियः शिक्षया ज्ञानेन सङ्गीतनृत्याद्यनुशीलनेन विभूषिता आसन्। आसीत्तासां व्यवहारो मार्जितो वचनममृतमयम्, चरित्रं महत्, निर्मलं रमणीयञ्चेति प्रदर्शितं कविवरेण।

नाटकस्यास्य मङ्गलाचरणादेव तदानीन्तनप्रचलितबौद्धधर्मप्रभाव-स्योपलब्धिं कर्त्तुं प्रभवामः। आसीत्तदानीं निरीश्वरवाद एव प्रचलितः। ग्रन्थस्य बहुलप्रचाराय भगवद्भक्तेन कविशेखरेण परमेशस्य प्रत्यक्षमूर्त्तीनां नमस्काररूपं मङ्गलं कृतं—

"प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥"

इति। नाटकस्यान्ते मोक्षार्थी सन् कविरसौ लोकहितये च वाग्देवीं ववन्दे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"प्रवर्त्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहती महीयताम् ।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ।।"

इति । तथा च—

आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययश्चेतः ।।

इत्यत्राश्रित्य भाषामिमामविच्छेद्यभावेन विनयोऽधिवसति । ध्रुवमेव शिक्षामार्जितमनसोऽभिव्यक्तिरियम् । एतदेव समालोच्य तत्रभवतः कविपुङ्गवस्य परिणते वयसि विरचितमिदमित्यनुमीयते । एतादृशश्च नान्यत्र दृश्यते । अभिज्ञानप्राप्तिप्रकारः सर्वदमनस्य सिंहशावकपराभवोऽपराजितानामौषधिग्रहणं तपस्विभ्यां "पश्य रे शकुन्तलावण्यमित्युक्तेः" "कुत्र सा मे माता" इत्यादिना शकुन्तलापरिचयप्रदानरूपाभिनवोपायप्रदर्शनेन दुष्यन्तशकुन्तलयोः पुनर्मेलनश्चेति सर्वमेतत् सर्वेषां मनोहरमिति विचित्रचित्ररचनानैपुण्येन नाटकादन्यस्मात् समधिकं चित्ताकर्षकं रमणीयं च संवृत्तं नाटकमिदमिति सम्भावयामः । तथा हि—

"वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यः
यत् किञ्चिन्मनसो रसायनमतः सन्तर्पणं मोहनम् ।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो-
रैश्वर्यं यदि कोऽपि काङ्क्षति तदा शाकुन्तलं सेव्यताम् ।।" इति ।

जर्मणदेशीयस्य सुप्रसिद्धस्य 'गेटे' इत्याख्यातस्य कवेर्वाक्यानुसारेण मन्यामहे सत्यमुक्तं मनीषिभिः—

"कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलमिति ।" अलमतिविस्तरेण ।।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्रीरहस्यम्

(पूर्वानुवृत्तम्)

[निवन्धकः—श्रीशरत्कमलन्यायरस्मृतितीर्थः ।

(१) "वरदा" (२) "देवी" (३) "त्र्यक्षरा" (४) "ब्रह्मवादिनी" (५) "छन्दोमाता" (६) "ब्रह्मरूपा" (७) "योनिस्वरूपा च" गायत्रीति व्याख्यातम्, तत्र "केयं वरदा ?" इत्यादि साम्प्रतं व्याख्यायते ।

"वरदा"—व्रियतेऽसौ वरः—प्रार्थनीयपदार्थः, तं ददाति या सा "वरदा" सर्वार्थसाधिका इति फलितार्थः । तामेतां स्मृत्वा प्रणमन्ति

"सर्वमङ्गलमङ्गल्ये ! शिवे ! सर्वार्थसाधिके !
"शरण्ये ! त्र्यम्बके ! गौरि ! नारायणि ! नमोऽस्तु ते ॥"

(श्रीश्रीचण्डी ११।१०।)

स्तुवन्ति चैताम्—

......"नमामि सकलार्थदाम्
भक्तकल्पलतां देवीम्"

(महर्षिगौतमकृतगायत्रीस्तवः ।२।३।)

तथाच (१) "वरदा" (२) "सर्वार्थसाधिका" (३) "सकलार्थदा" (४) "भक्तकल्पलता" इति एक एवार्थः, एवञ्च तादृशी गायत्री परमेश्वरीति फलितम् । परमेश्वरादन्यत्र सर्वार्थसाधकरूपवरदातृत्वमनुपपन्नमिति प्रणिधातव्यम् ।

केयं "देवी"—? "(१) दानाद् वा (२) दीपनाद् वा (३) द्योतनाद् वा द्युस्थानभवतीति वा" यो देवः सा देवता—इत्येवं रूपाइत्यर्थः ।

(निरुक्ते दैवतकाण्डे देवतानिर्वचनप्रकरणं द्रष्टव्यम् ।)

तथाच—उद्धृतमहर्षियास्कनिर्वचनेन—देवी गायत्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१) दानादिगुणशीला (२) सर्वदीप्तिमूलदीप्तिरूपा (३) सकलद्योतनैकमूर्त्तिः (४) द्यु स्थानविहारिणी उत्तमज्योतिर्मयी इत्यादिस्वरूपा विभावनीया ।

अयमेव उत्तमज्योतीरूपः पदार्थः श्रुतिभिरेवं व्याख्यातो यथा—

(क) "अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषु लोकेषु, इदं वा तद् यदिदमस्मिन्नन्तः पुरुषे ज्योतिः"—(इत्यादि छान्दोग्योपनिषत् ।३।१३।७)

(ख) "तद् देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्"

(इत्यादि- बृहदारण्यकोपनिषत् ४।४।१६)

(ग) "न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥"

(इत्यादिकठोपनिषत् २।२।१५। मुण्डकोपनिषत् २।२।१०)

(घ) "अग्निर्यत्राभिमथ्यते.........
सोमो यत्रातिरिच्यते" (इत्यादि श्वेताश्वतरोपनिषत् २।६)

(ङ) "हिरण्मये परे कोषे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद् यदात्मविदो विदुः ॥"

(मुण्डकोपनिषत् २।२।६)

(च) अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यौ ।

(मुण्डकोपनिषत् २।१।४)

अपि चैतदुत्तमं ज्योतिः—ऋचाभ्युक्तम्—यथा

"चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।" (पुरुषसूक्तमन्त्रः १३)

तदेतत् सूत्रितं शारीरके भगवता बादरायणेन

"ज्योतिश्चरणाभिधानात्" (वेदान्तदर्शने १।१।२४ सूत्रम्)

इत्यादिभिः । गायत्रीमन्त्रस्थ-"भर्गः" शब्देनाप्येतदेवोत्तमं ज्योतिरभिधीयते इति विभावनीयम्, तन्मन्त्रस्थदेवसवितृशब्दाभ्यामपि फलत एतदेवोत्तमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिरुच्यत इत्यपि प्रणिधातव्यम्। ततश्चैवं "देवी" द्यु स्थानविहारिणी उत्तमज्योतिर्मयी गायत्रीति सर्वथोपपद्यते।*

अपि च पूर्वोक्तमहर्षियास्कवाक्ये "दानादिति" पदं यदि "दो य छेदने"

---

* अत्रेदमवधातव्यम्—यज्ञाङ्गत्वेन वेदव्याख्यातॄणां नैरुक्तानां महर्षियास्कादीनां मते "अग्निरेव एका देवता, अन्याः सर्वा देवतास्तद्व्यूहस्थानीयास्तद्विभूतिरूपाः फलतस्तत्स्वरूपा एव" (अग्निस्वरूपा एव) अतो नैरुक्तानां दृष्ट्या सर्वासामेव देवता तेजोरूपत्वम्; सोऽयं तेजोरूपोऽग्निर्देवता यदा एतत्पृथिवीस्थानस्तदा स "पार्थिवाग्नि"रित्युच्यते, यदा मध्यस्थानस्तदा "मध्यमाग्निर्वायुरित्युच्यते, यदा च द्यु स्थानस्तदा उत्तमाग्निः "सूर्य" इत्युच्यते—"तिस्र एव देवता इति नैरुक्ताः, अग्निः पृथिवीस्थानो वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः सूर्यो द्यु स्थानः"—(निरुक्ते दैवतकाण्डे देवतास्वरूपकथनप्रकरणे) इत्यादि यास्कवचनात्, "अथापि ब्राह्मणं भवति—"अग्निः सर्वा देवताः" इत्यादि (निरुक्ते दैवतकाण्डे देवतास्वरूपकथनप्रकरणं द्रष्टव्यम्)। एवञ्च "सवितुर्भर्ग"इति गायत्रीमन्त्रस्थ "सवितु"रिति "राहोः शिरः" इतिवदभेदे षष्ठी (शङ्कराचार्य-हलायुधकृतगायत्रीव्याख्या द्रष्टव्या)। तथाच "य एव सविता तदेव भर्गः, यदेव भर्गः स एव सविता, स एव द्यु स्थानस्योत्तमज्योतिः सूर्यरूपोऽग्निर्देवता, सैव देवता गायत्रीमन्त्रस्थ "देवी" पदार्थ इति प्रस्तुतोऽर्थ उपपन्नो वेदितव्यः। अपि च "अग्निः कस्मात्? अग्रणीर्भवति" इति महर्षियास्कनिर्वचनम्। "अग्रशब्दः प्रधानवाची स एव वा अग्रं नयति, सेनां वा अग्रे नयति सैनापत्येऽवस्थित इत्येके, विज्ञायते हि अग्निर्वै देवानां सेनानीरिति" (पूर्वोक्तनिरुक्तभाष्यम्, निरुक्ते दैवतकाण्डे अग्निशब्दनिर्वचनं द्रष्टव्यम्)।

उद्धृतनिरुक्तवचनात् तद्भाष्यकृद्व्याख्यानाच्च ज्योतीरूपस्याऽग्नेरेव सर्वदेवताचालकत्वं सिद्धम्, एतदेव चालकत्वं बृहदारण्यकब्राह्मणेन अन्तर्यामित्वेन व्याख्यातम् (बृहदारण्यकोपनिषत् ३।७, वेदान्तदर्शने १।२।१८ सूत्रं द्रष्टव्यम्)। एतदन्तर्यामित्वमेव गायत्रीमन्त्रस्य तृतीयपादार्थ इति प्रकृतरहस्यं विभावनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति छेदनार्थक'दा'धातुनिष्पन्नं स्यात् तर्हि "देवी"ति छेदनशक्तिः संहारमूर्त्तिर्गायत्रीत्यभिधीयते, अतश्च सायाह्ने गायत्री "रुद्राणी"ति ध्यायते, रुद्राणी तु संहारशक्तिरेव।

(१) "रुद्रो रौतीति सतः (२) रोरुमाणो द्रवतीति वा, (३) रोदयतेर्वा; यदरुदत् तद् रुद्रस्य रुद्रत्वमिति काठकम्, यदरोदीत् तद् रुद्रस्य रुद्रत्वमिति हारिद्राविकम्"—(निरुक्ते दैवतकाण्डे रुद्रपदनिर्वचनं द्रष्टव्यम्)। इत्यादिनिर्वचनात्।* एषैव "रुद्राणी" दुर्गासप्तशतीस्तवेनैवं स्मर्यते

"माहेश्वरी वृषारूढा त्रिशूलवरधारिणी।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा॥" श्रीश्रीचण्डी ८।१६,

प्रकृतायान्तु गायत्र्यामुक्ताः सर्व एवार्था उपयुज्यन्ते तस्याः सर्वदेवतामूलशक्तित्वादित्यवधेयम्॥

---

* यजुर्वेदीयरुद्राध्यायभाष्ये "रुद्र" शब्दस्य बहुधा निर्वचनम्—यथा—(१) रुतौ नादान्ते द्रवति द्रावयति इति वा "रुद्र" इति केचित्। (२) रुत्या वेदरूपया धर्मादीन् अवलोकयति प्रापयतीति वा "रुद्र" इति अन्ये। रुत्या वाग्रूपया वाच्यं प्रापयतीति केचित्। (३) रुत्या प्रणवरूपया स्वात्मानं प्रापयतीतीतरे, (४) रुद्रो रौतीति सत्ये रोरूयमाणो द्रवति प्रविशति मर्त्त्यान् इति "रुद्र" इत्यन्ये (५) "त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्याँ आविवेश" इति। अन्ये ब्रुवते "रुक्" तेजः, लुवकारेकाररेफाश्चेति भूम्नि नित्ययोगे वा र-प्रत्ययः, वर्णव्यापत्त्या "रुद्र"स्तेजस्वीति। (७) रोधिका बन्धिका मोहिका वा शक्तिस्तद्वान्, तस्मात् द्रावयिता वा भक्तेभ्यो "रुद्रः" (८) रुद्रं संसारदुःखं द्रावयतीति "रुद्र" इति केचित्, यथा "अशुभद्रावको रुद्रो यज्जहार पुनर्भवम्। तस्माच्छिवस्ततो रुद्रशब्देनात्राभिधीयते॥" इति। (९) रुतिं शब्दं राति ददातीति प्राणो "रुद्र" इत्यन्ये। (१०) रुतिं शब्दं वेदात्मानं ब्रह्मणे ददाति कल्पादाविति "रुद्र" इत्यपरे, यथा "यो वै वेदांश्च प्रहिणोति तस्मै" इति। एवं तीर्थकारैः स्वस्वसमयानुगुणं "रुद्र"पदं व्युत्पाद्यते।

रुद्राध्याय-प्रथममन्त्रे भट्टभास्करकृतभाष्यव्याख्यानं द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च "देवी"ति पदं क्रीडार्थक"दिव" धातोरपि निष्पन्नं स्यात्, तथाच एतत्पक्षे "देवी"ति "सृष्टिस्थितिप्रलयरूपक्रीडामयी गायत्रीति भावनीया, तामेतां स्मृत्वा स्तौति—

"विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये॥" (श्रीश्रीचण्डी १।५७)

क्रीडा यथा अनायाससाध्या सर्वथा चासक्तिशून्या, सृष्ट्यादिक्रीडापि तस्यास्तथैवेति वेदितव्यम्—"अस्य महतो भूतस्य निःश्वसितमेतत्" (बृहदारण्यकोपनिषत् २।४।१०) इत्यादिश्रुतेः, ततश्च "अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवत्" सृष्ट्यादिकार्यम्, सूत्रितञ्च तच्छारीरके भगवता बादरायणेन—

"लोकवत्तु लीलाकैवल्यम्" (वेदान्तदर्शने २।१।३३ सूत्रम्।)

"यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किञ्चित् प्रयोजनमनभिसन्धाय केवललीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति, यथा च उच्छ्वास-प्रश्वासादयोऽनभिसन्धाय बाह्यं किञ्चित् प्रयोजनं स्वभावादेव सम्भवन्ति, एवमीश्वरस्यापि अनपेक्ष्य किञ्चित् प्रयोजनान्तरं स्वभावादेव लीलारूपा प्रवृत्तिर्भविष्यति।" (शाङ्करभाष्यम्)

तथाच "देवी" स्वभावत एव सृष्टिस्थितिप्रलयलीलामयी गायत्रीति फलितम्, अतश्च (१) ब्रह्माणी (२) वैष्णवी (३) रुद्राणीति त्रिधा प्रातर्मध्याह्ने सायञ्च सा ध्यायते, स्मर्यते च

"गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने।
सरस्वती च सायाह्ने सैव सन्ध्या त्रिषु स्मृता॥"

(आह्निकतत्त्वधृतस्मृतिवचनम्।)

"त्र्यक्षरे"!—अकारोकारमकारात्मकत्र्यक्षरप्रतिपाद्यपरापरब्रह्मरूपे! इत्यर्थः, प्रणवस्य परापरब्रह्मवाचकत्वात्—

"परश्चापरश्च ब्रह्म यदयमोङ्कारः" इत्यादि श्रुतेः,

(अथर्ववेदीयप्रश्नोपनिषत्।)

"ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः।" (गीता।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तस्य वाचकः प्रणवः।" (योगदर्शनम् ।)

इत्यादिस्मृतेश्च ; एवञ्च त्र्यक्षररूपा गायत्री निर्विशेषतुरीयापरपर्यायावाङ्-मनसगोचरोदासीनकूटस्थब्रह्मचैतन्यरूपा, सविशेषब्रह्मचैतन्यरूपा च ब्रह्माणी वैष्णवी रुद्राणी चेति पर्यवसितार्थः ।

अपि चैवं गायत्र्याः परापरब्रह्मरूपत्वात् सर्वदेवतात्मकत्वमवधातव्यम्, सर्वासामेव देवतानां फलतः परापरब्रह्मस्वरूपत्वात्

"एकं सद् विप्रा बहुधा वदन्ति" (ऋग् वेदसंहिता)

इत्यादिमन्त्रवर्णात् ।

सेयं त्र्यक्षररूपा गायत्री महर्षिणा गौतमेन स्तूयते, यथा—

"व्याहृत्यादिमहामन्त्ररूपे ! प्रणवरूपिणि ।"

(महर्षिगोतमकृतगायत्रीस्तवो द्रष्टव्यः ।)

ब्रह्मवादिनि !" "ब्रह्मविद्यारूपे !" इत्यर्थः, ब्रह्म वदति या सा "ब्रह्मवादिनी", तथाच ब्रह्मवादिनीत्वमेतदृचाभ्युक्तम्

"श्रुधि श्रुत श्रद्धिवं ते वदामि ।" (देवीसूक्तमन्त्रः ४)

"हे श्रुत ! विश्रुत ! सखे ! श्रुधि मया वक्ष्यमाणं शृणु (सायणभाष्यम्)। किं तत् ? इत्याह "श्रद्धिवं"—श्रद्धालभ्यं वस्तु ब्रह्म इत्यर्थः । पुनरप्युक्तम् "अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।"

(देवीसूक्तमन्त्रः ५। ऋग् वेदसंहिता ।८।७।११।१)

"अहं" स्वयमेव "इदं" वस्तु ब्रह्मात्मकं "वदामि" उपदिशामि, "देवेभिः" देवैः, इन्द्रादिभिरपि "जुष्टं" सेवितम्, उतापि च मानुषेभिः मनुष्यैरपि जुष्टम्" (सायणभाष्यम्) । अपि चोक्तम् ।

"अहं राष्ट्री ।" (देवीसूक्तमन्त्रः ३ ।)

"राष्ट्री (१) "अर्यः" (२) "नियुत्वान्" (३) "इन इन" (४) इति चत्वारीश्वरनामानि ।"

(निरुक्त नैघण्टुककाण्डे ईश्वरनामकथनप्रकरणं द्रष्टव्यम् ।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रोऽयं व्याख्यातो वेदभाष्यकारेण सायणाचार्येण यथा—"अहं राष्ट्री ईश्वरनामैतत्। सर्वस्य जगत ईश्वरी" इत्यादि। एवञ्च देवीसूक्तमन्त्रद्रष्ट्री अम्भृणस्य महर्षेर्दुहिता वाक् फलतः परमेश्वरी ब्रह्मरूपैव। सेयं स्वयं ब्रह्मरूपापि भक्तानुग्रहार्थं लीलया ब्रह्मवादिनी बभूव, तथाचोक्तं वेदभाष्यकृद्भिः सायणाचार्य्यैः:—

"अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत्, अतः सर्षिः। सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता; तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन च अहमेव सर्वं भवामीति स्वात्मानं स्तौति।...........

मयि हि सर्वं जगत् शुक्तौ रजतमिवाध्यस्तं सद् दृश्यते, माया च जगदाकारेण विवर्तते; तादृश्या मायाया आधारत्वेन असङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योत्पत्तिः॥"

(देवीसूक्ते १म-मन्त्रस्य सायणाचार्यकृतभाष्यम्।)

अतो यैव वाक् सैव ब्रह्मवादिनी गायत्री सैव सच्चित्सुखात्मकसर्वगतपरमात्मस्वरूपा, सेयं ब्रह्मवादिनी ब्रह्मविद्या शक्रादिभिर्देवतैः स्तूयते, ऋषिभिश्च वर्ण्यते

"या मुक्तिहेतुरविचिन्त्यमहाव्रता च अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवी॥

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी॥ (श्रीश्रीचण्डी ४।८, १।४४)

"द्वे विद्ये वेदितव्ये...परा चापरा च...अथ परा यया तदक्षरमधिगम्यते (अथर्ववेदीयमुण्डकोपनिषत् १।१।४-५) इत्यादि श्रुत्या ब्रह्मविद्यायाः स्वरूपं मुक्तिहेतुत्वमवगम्यत इति ब्रह्मविद्यास्वरूपाया ब्रह्मवादिन्या गायत्र्या मुक्तिहेतुत्वमवधेयम्। शङ्कराचार्यमते तु "ब्रह्मविद्या फलतो ब्रह्मैव, ब्रह्मभावश्च मोक्षः" (ब्रह्मसूत्रे २।१।४) इति ब्रह्मसूत्रभाष्ये व्याख्यानादिति प्रणिधातव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"गायत्रि"—"गायति च त्रायते च" इत्यादि श्रुतिप्रतिपादितवाक्-शक्तिरूपे। त्राणकर्त्रि! "गायत्री प्रोच्यते तस्माद् गायन्तं त्रायते यतः" —इति स्मृतिप्रतिपादितभक्तवत्सले! त्राणकर्त्रि च! "गायतेः स्तुतिकर्मणः" इति महर्षियास्कनिरुक्तसर्वश्रेष्ठस्तुतिवाचकपदवर्णरूपे! "गायतो मुखादुद-पतत्"—इति ब्राह्मणवर्णितसृष्टिकर्मनिरतब्रह्ममुखाविर्भूते! इत्याद्यर्थः प्रागेव व्याख्यातः।

"छन्दसां मातः!" वेदमातरित्यर्थः, सेयं स्तूयते महर्षिणा गौतमेन

नमो देवि! महाविद्ये! वेदमातः! परात्परे!

(महर्षिगौतमकृतगायत्रीस्तवो द्रष्टव्यः।)

छन्दसां सामान्यलक्षणमुक्तं महर्षिणा यास्केन यथा—

"छन्दांसि च्छादनात्।" इति

निरुक्ते दैवतकाण्डे छन्दोनिर्वचनप्रकरणं द्रष्टव्यम्।

तथाच—यैर्हि देवता आत्मानमाच्छादयन्ति तानि "छन्दांसि" इत्युच्यन्ते; अतः श्रुतिमूलम्—

"देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन्,
यदेभिराच्छादयंस्तच्छन्दसां छन्दस्त्वम्।

(सामवेदीयच्छान्दोग्योपनिषत् १।४।२)

छन्दोऽपि देवतानां सूक्ष्मं रूपमिति प्रणिधातव्यम्। छन्दांसि तावद् बहूनि गायत्री (१) उष्णिक् (२) अनुष्टुप् (३) बृहती (४) पङ्क्तिः (५) जगती (६) त्रिष्टुप् (७) ककुप् (८) विराट् (९) इत्यादीनि वेदितव्यानि। सर्वेषामेव छन्दसां गायत्री मूलमिति "गायत्री छन्दसां माता" इत्युच्यते, अतः स्मृतं भगवता स्वयमेव—"गायत्री छन्दसामहम्" (गीता १०) इति।

गायत्र्याः सर्वच्छन्दोमूलत्वं व्युत्पादितं वेदनिरुक्तकारेण महर्षिणा यास्केन, यथा—

"उष्णिक् (१) उत्स्नाता भवति (२) उष्णीषिणी वा इति औपमिकम्"।

(निरुक्ते छन्दोनिर्वचनप्रकरणं द्रष्टव्यम्।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्यातोऽयं सन्दर्भो निरुक्तभाष्यकारेण दुर्गाचार्येण—

"उष्णिक् उत्स्नाता" गायत्रीतश्चतुर्भिरक्षरैरुद्वेष्टिता भवति, उष्णिग्-गायत्र्यौ जागतश्चेति।" "उष्णीषिणी" इव "वा" इति औपमिकम्"—चत्वारि अक्षराणि अस्या उष्णीषमिव लक्ष्यन्ते तेन उष्णिक्।"

तथाच गायत्री त्रिपदा चतुर्विंशत्यक्षरा, उष्णिक् तु ततश्चतुर्भिरक्षरैरधिका इति अष्टाविंशत्यक्षरा, तानि चाक्षराण्यधिकानि गायत्र्या उष्णीषमिव शोभन्ते तेन "उष्णिक्"—इति सार्थकं नाम। एवञ्च गायत्र्येव यदा तथाविधैरक्षरैः शोभते तदा तस्या नाम "उष्णिक्",—इति गायत्रीमूलत्वमुपपन्नमुष्णिक्-छन्दस इत्यवधेयम् ॥

कथम् "अनुष्टुभ"श्छन्दसो गायत्रीमूलत्वमत्राह महर्षिर्यास्कः—

"अनुष्टुबनुष्टोभनात्।" "गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेन अनुष्टोभति" इति च ब्राह्मणम्"।

(निरुक्ते दैवतकाण्डे छन्दःप्रकरणं द्रष्टव्यम्।)

अत्र भाष्यकृद्व्याख्यानम्—"स्मतं 'च'शब्देन समुच्चिनोति। गायत्री त्रिभिरष्टाक्षरैः पादैः समाप्यते, तस्याश्च (गायत्र्याः) पुनरपरश्चतुर्थः पादो भवति, येन तामेव (गायत्रीमेव) अनुष्टुप् अनुष्टोभति, तस्मादनुष्टुप्"—इत्यादि। तथाच त्रिपदा चतुर्विंशत्यक्षरा गायत्री यदा तादृशेनाधिकेन चतुर्थेन पादेन शोभते तदा तस्या एव गायत्र्या नाम "अनुष्टुप्" भवतीति गायत्रीच्छन्दोमूलत्वमनुष्टुभश्छन्दस इति प्रणिधातव्यम् ॥

"बृहती"छन्दसः कथं गायत्रीमूलत्वमत्राह महर्षिर्यास्कः—

"बृहती परिबर्हणात्।" (निरुक्ते छन्दःप्रकरणं)

अत्र भाष्यकृद्व्याख्यानम्—"परिवृद्धाऽसौ भवति अनुष्टुभश्चतुर्भिरक्षरैः, उक्तं हि "बृहती जागतस्त्रयश्च गायत्र्या" इति। तथाच त्रिपदा चतुर्विंशत्यक्षरा गायत्री अधिकेन चतुर्थेन पादेन वृद्धा सती "अनुष्टुप्"—इत्युच्यते, सेयमनुष्टुबात्मिका वृद्धा गायत्री पुनश्चतुर्भिरक्षरैः परिवृद्धा

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सती "बृहती"ति नाम्ना व्यपदिश्यत इति गायत्रीच्छन्दोमूल "बृहती"छन्दसः ।

त्रिपदा चतुर्विंशत्यक्षरा गायत्री चतुर्भिरक्षरैः "उष्णीषिणी"इव वृद्धा सती "उष्णिग्"—नाम्ना व्यपदिश्यते ; एकेन पादेन वृद्धा सती "अनुष्टुप्" नाम्ना व्यपदिश्यते ; सेयं चतुष्पदा अनुष्टुबात्मिका वृद्धा गायत्री चतुर्भिरक्षरैः "परिवर्हणात्"—"परिवृद्धा"परमवृद्धा सती"बृहती"ति नाम गृह्णातीति फलितार्थो मन्तव्यः ।

पङ्क्तिच्छन्दसः कथं गायत्रीमूलत्वमत्राह महर्षिर्यास्कः—

"पङ्क्तिः पञ्चपदा" ।

(निरुक्ते दैवतकाण्डे छन्दःप्रकरणम् ।

तथाच चतुर्विंशत्यक्षरा त्रिपदा गायत्री पुनर्द्वाभ्यां पदाभ्यां "पञ्चपदा" सती "पङ्क्ति"रिति नाम गृह्णातीत्यतः पङ्क्तिच्छन्दसो गायत्रीच्छन्दोमूलत्व मवधातव्यम् । एवमेवाह भाष्यकारः—

पञ्चभिः पादैः पङ्क्तिरित्युच्यत"—इत्यादि

(निरुक्तभाष्यं द्रष्टव्यम्)

एवमुक्तदिशा "त्रिष्टुब्" "जगती"—च्छन्दसोरपि गायत्रीच्छन्दोमूलत्वमू नीयमिति गायत्र्याश्छन्दोमातृत्वमुपपन्नम्" ॥

एतेषां छन्दसां "जगती"च्छन्द एव अन्त्यमिति बोध्यम्, तदुक्तं निरुक्ते महर्षिणा यास्केन—

"जगती गततमं छन्दः" । इति

व्याख्यातञ्च तद्भाष्यकारेण दुर्गाचार्येण—"जगती गततमं छन्दः अन्त्य मित्यर्थः, अतः परमतिच्छन्दांसि" इत्यादि (निरुक्तभाष्यं द्रष्टव्यम्) ।

छन्दांसि तु स्वयमेवाऽऽविर्भवन्ति, न हि तानि केनापि क्रियन्ते तेषां नित्यत्वात्, तदेतदुक्तं निरुक्तभाष्यकृता

"नहि च्छन्दांसि क्रियन्ते नित्यत्वादेव च्छन्दसाम्"—इत्यादि ।

(निरुक्ते जगतीछन्दोव्याख्याप्रकरणं द्रष्टव्यम् ।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ भूरादिव्याहृतिमन्त्राणां गायत्र्यादिच्छन्दोव्युत्पादनम् ।

भूरादिसप्तव्याहृतिमन्त्राणां यथाक्रमं गायत्र्यादि च्छन्दो वेदितव्यम्, तथाच "भू"रिति प्रथमव्याहृते"र्गायत्री"च्छन्दः (१), "भुव" इति द्वितीयव्याहृते-"रुष्णिक्"छन्दः (२), "स्व"रिति तृतीयव्याहृते"रनुष्टुप्"छन्दः (३), "मह" इति चतुर्थव्याहृते"र्बृहती"छन्दः (४), "जन" इति पञ्चमव्याहृतेः "पङ्क्तिः" छन्दः (५), "तप" इति षष्ठव्याहृते"स्त्रिष्टुप्" छन्दः (६), "सत्य"मिति सप्तमव्याहृते"र्जगती"च्छन्दः (७) इति फलितार्थः ।

सृष्ट्यादौ प्रजापतेर्मनसि भूरादय एते मन्त्ररूपेणैवाऽऽविर्बभूवुः, ततः प्रजापतिः "भू"रिति व्याहरन् (कथयन्, नाम कुर्वन्) गायत्रीछन्दसा भूमिमसृजत्, सेयं "पृथिवी"त्युच्यते, "भुवः" इति व्याहरन् (कथयन्, नाम कुर्वन्) उष्णिक्-छन्दसा भुवर्लोकमसृजत् (२), "स्व" रिति व्याहरन् अनुष्टुप्छन्दसा स्वर्लोक-मसृजत्, योऽसौ "स्वर्ग" इति व्यपदिश्यते (३), "मह" इति व्याहरन् "बृहती" छन्दसा महर्लोकमसृजत् (४), "जन" इति व्याहरन् "पङ्क्ति"छन्दसा जनो नाम लोकमसृजत् (५), "तप" इति व्याहरन् "त्रिष्टुप्"छन्दसा तपोलोक-मसृजत् (६), "सत्य"मिति व्याहरन् "जगती"छन्दसा सत्यलोकमसृजत् (७), "सत्य"लोकोऽयं "ब्रह्मलोक" इत्युच्यते । सृष्ट्यादौ प्रजापतेर्मनसि भूरादय एते मन्त्ररूपेण सूक्ष्मा एवाऽऽसन्, पश्चात् प्रजापतेस्तादृशव्याहरणेन नामरूपादीनि सर्वाणि भजमानाः स्थूला बभूवुरिति तेषां "व्याहृति"रिति नाम प्रजापतेश्च तत्त-न्मन्त्रद्रष्टृत्वम् ; त एते भूरादयः सप्त व्याहृतयः "सप्त लोका इत्युच्यन्ते ।*

---

* चिकीर्षितमर्थमनुतिष्ठंस्तस्य वाचकं शब्दं पूर्वं स्मृत्वा पश्चात्तमर्थ-मनुतिष्ठतीति सर्वेषां नः प्रत्यक्षमेतत्, तथा प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः, पश्चात् तदनुगतानर्थानसौ ससर्जेति गम्यते । तथाच श्रुतिः "स भूरिति व्याहरत, स भूमिमसृजत" (तैत्तिरीयब्राह्मणम् २।२।४।२) इत्येवमादिका भूरादिशब्देभ्य एव मनसि प्रादुर्भूतेभ्यो भूरादि-लोकान् सृष्टान् दर्शयति । (वेदान्तदर्शने १।३।२८ सूत्रस्य शङ्कराचार्यकृत-भाष्यव्याख्यानं द्रष्टव्यम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपिच शङ्कराचार्यपादैः पूर्वोक्तवेदान्तदर्शनसूत्रभाष्ये एतस्मिन्ने प्रमाणत्वेनैताः स्मृतोऽप्युपन्यस्ताः ।

(१) "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥

(२) नामरूपञ्च भूतानां कर्मणाञ्च प्रवर्त्तनम् ।
वेदशब्देभ्य एवाऽऽदौ निर्ममे स महेश्वरः ॥

(३) सर्वेषान्तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवाऽऽदौ पृथक्संस्थाश्च निर्ममे ॥ मनुसंहिता ।

अपि चेयं स्मृतिरप्यत्र प्रमाणं वेदितव्यम्, यथा—

"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयान्निरदुहद् "भूर्भुवःस्व"रितीति च ॥ मनुसंहिता ।

उद्धृतस्मृतौ निम्नलिखिता श्रुतिर्मूलमवधातव्यम्—

"स एतां त्रयीं विद्यामभ्यतपत् तस्यास्तप्यमानाया रसान् प्राबृहत्, "भू"रिति ऋग्भ्यः, "भुव"रिति यजुर्भ्यः, "स्व"रिति सामभ्यः ॥

(छान्दोग्योपनिषत् ४।१७।३)

अत्रेदमवधातव्यं—नैरुक्तानां यास्कादिमहर्षीणां मते "भूर्भुवःस्व"रि यथाक्रमं "पृथिवीस्थानम्" (१) "मध्यमस्थानम्" (२) "द्युस्थानापरनामो स्थानम्" (३) इति च संज्ञां लभन्ते । "महर्जनस्तपःसत्या"नाञ्च लोका द्युस्थानान्तर्गतत्वमिति बोध्यम्, एवञ्च मन्त्र-ब्राह्मण-स्मृतीनामैक्यमुपपन्नमि प्रणिधातव्यम् ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

विंशः सर्गः

[निबन्धकः—श्रीनित्यगोपालविद्याविनोदः]

अथ रक्षःकुलाधीशः समरोल्लासभैरवः ।
नह्यते हेमकूटस्य शृङ्गतुल्यै रथीश्वरैः ॥१॥
ध्वनन्ति रणतूर्याणि समोपे खे शतं ध्वजाः ।
उड्डीयन्ते तथाऽसंख्यरक्षोवृन्दं प्रगर्जति ॥२॥
तदा मन्दोदरी राज्ञी सभायां समुपागता ।
कपोतीव पोतशून्यं वीक्ष्य नोडं शुगर्दिता ॥३॥
पादयोः पतितां दृष्ट्वा महिषीं कौणपाधिपः ।
समुत्थाप्य प्रयत्नेन प्राह दुःखसमाकुलः ॥४॥
भो राक्षसकुलेन्द्राणि रामो नो दारुणो विधिः ।
ध्रियेऽहं केवलं सूनोर्मृत्योः प्रतिविधित्सया ॥५॥
प्रतियाहि गृहं शून्यं यियासुः समरन्त्वहम् ।
कथं रुणत्सि मां देवि शोककालश्चिरन्तनः ॥६॥
तुच्छं राज्यसुखं हित्वासित्वा च विरले वयम् ।
सन्ततं तं स्मरिष्यामो गच्छेदानीं गृहं प्रति ॥७॥
शोकमन्थनसम्भूतः कोपश्वसनदीपितः ।
युद्धोत्साहानलोऽश्रुभी राज्ञि निर्वाप्यते कथम् ॥८॥
वनशोभी महाशालो भूमावद्य निपातितः ।
चूर्णं गिरेस्तुङ्गशृङ्गं राहुग्रस्तो दिवाकरः ॥९॥
निन्ये सखीगणो देवीमवरोधं विचेतनाम् ।
रक्षोऽधीशश्च निर्याय क्रोधाद्रक्षांस्यवोचत ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य वीर्यात् सुरदैत्यनरा भीतास्तथर्षभाः ।
नागा रसातले लीनाः सोऽद्य शेते रणे मृतः ॥११॥
लक्ष्मणश्छद्मवेशेन चौरवद्देवमन्दिरम् ।
प्रविश्य हतवान् पुत्रं निरस्त्रमसहायकम् ॥१२॥
आसन्नमरणो यद्वत् प्रोषितोऽदृष्टबान्धवः ।
प्राणांस्त्यजति दुःखार्त्तस्तद्वत् पुत्रो मृतो युधि ॥१३॥
स्वर्णलङ्काशिरोरत्न पालितो बहुकालतः ।
पृच्छ भूमण्डले वंशः कस्त्वद्वंशसमो गुणैः ॥१४॥
देवमर्त्यान् पराभूय रोपितो यो यशस्तरुः ।
वाम्याद् विधेः स विशुष्कः सालबालस्तपेऽशुभे ॥१५॥
वलापं न करिष्यामि किं मे तेन फलं भवेत् ।
पुत्ररत्नं न लप्स्येऽहं मुक्त्वाऽसूनपि दुर्लभान् ॥१६॥
द्रावयेयुर्न मेऽश्रूणि कठोरं यममानसम् ।
किं महीध्रो द्रवेद्धारासारैरविरतैरपि ॥१७॥
नाशयिष्यामि सौमित्रिं छद्मयोद्धारमन्यथा ।
प्रत्येष्यामि पुरं नैतद् दर्शयिष्यामि वा मुखम् ॥१८॥
सेनान्यो मे प्रतिज्ञैषा मृतो वीरकुलाग्रणीः ।
स्मृत्वा रक्षःकुलेन्दुन्तं संनह्यध्वं महायुधे ॥१९॥
इत्युक्त्वा जोषमासिष्ट दीर्घं निःश्वस्य रावणः ।
रेसुर्भीमं क्रुधा क्षोभाद्रक्षःसैन्याः सहस्रशः ॥२०॥
सिक्तासीद्धरणिस्तेषां नयनासारवर्षणैः ।
तच्छ्रुत्वा रघुसैन्याश्च प्रतिनेदुर्भयङ्करम् ॥२१॥
रुष्टस्त्रिदिवनाथश्च दिवि रामः सलक्ष्मणः ।
कपिसैन्यास्तथा चक्रुर्जयरामध्वनिं भृशम् ॥२२॥
कल्पान्त इव जीमूता मन्दं मन्दमगर्जिषुः ।
वात्याऽवहद् महाभीमा दावाग्निर्ज्वलितो वने ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्लाविताऽसीद् महापल्ली पुरग्रामादिसंयुता ।
कम्पिता भूश्चचालाली सौधानां सहशाखिनाम् ॥२४॥
एवं घोरविपर्यस्तं जगत् स्थावरजङ्गमम् ।
रुरोदोच्चैर्यथा जीवसंहतिः प्रलयोन्मुखी ॥२५॥
भयार्त्ता रुदती पृथ्वी ययौ यत्र महाधने ।
पीठे समास्त वैकुण्ठो नत्वा चास्मै न्यवेदयत् ॥२६॥
भूयो भूयः कृपासिन्धो किङ्करीं त्वं ररक्षिथ ।
मत्स्य-कूर्म-वराहाद्यै रूपैर्युगाकृतिक्षमैः ॥२७॥
मधुसूदनेति नाम्ना ते ये स्मरन्ति विपद्गताः ।
ते यान्ति निष्कृतिं सद्यो ज्ञात्वा त्वत्पदमागता ॥२८॥
सस्मितं मधुरञ्चाह मुरारिर्विश्वधारिणि ।
केनागास्त्वमितः पृथ्वि कस्त्वां क्लिश्नाति दुर्मतिः ॥२९॥
क्रन्दन्ती पृथिवी प्राह किं न जानासि सर्ववित् ।
पश्य लङ्कां प्रभो यत्र युध्येते राम-रावणौ ॥३०॥
देवाकृती रथिश्रेष्ठः सौमित्रिर्वीरकेशरी ।
मेघनादमहन् संख्ये शोकार्त्तो राक्षसेश्वरः ॥३१॥
संग्रामे लक्ष्मणं हन्तुं प्रतिजज्ञे दशाननः ।
रक्षितुं तं सुरेशोऽपि प्रतिशुश्राव वीर्यतः ॥३२॥
क्षणेनारप्स्यते जन्यं भीषणं वीरमण्डलम् ।
कथमेतां सहिष्येऽहं यातनां वद वल्लभ ॥३३॥
लङ्कां रमेश ऐक्षिष्ट हसन् रुष्टांश्च सैनिकान् ।
निर्गच्छतः पुरोऽसंख्यान् विकम्पितधरातलान् ॥३४॥
चकम्पे कानकी लङ्का ददर्श श्रीपतिर्बहिः ।
रघुसैन्यान समुत्तुङ्गानूर्मीनिव महोदधेः ॥३५॥
वेगेनापततो देवांस्ताक्ष्‍र्य पक्षिनृपं यथा ।
धावन्तं भुजगं भक्ष्यं निर्घोषैः पूरितं जगत् ॥३६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगिनश्च पलायन्ते हित्वा योगं तथा प्रसूः ।
उत्सङ्गे शिशुमादाय रोरुद्यते भयाकुला ॥३७॥
जीवसंख्याः प्रतिष्ठन्ते मोघज्ञाना विचेतसः ।
दृष्ट्वाऽथ चिन्तयित्वा च चिन्तामणिरुवाच गाम् ॥३८॥
घोरापदागता साध्वि तव रुद्रः स्वशक्तितः ।
राक्षसान् बलिनश्चक्रे नोपायः कश्चिदीक्ष्यते ॥३९॥
त्वरितं देवि गच्छ त्वं सर्वापद्ध्वान्तभास्करम् ।
भक्त्या प्रणम्य देवेशं सर्वमेतन्निवेदय ॥४०॥
रुदत्युर्वी प्रत्युवाच हन्त शूली तमोमयः ।
ध्वंसलीलारतो नित्यं न प्रसादयितुं क्षमः ॥४१॥
विषाग्निना जगद्दग्धुं कालसर्पः सदेच्छति ।
त्वं विश्वम्भर विश्वात्मन् परित्रायस्व किङ्करीम् ॥४२॥
हसन्नुवाच विश्वात्मा याहि पृथ्वि स्वकं गृहम् ।
देववीर्यं सुसंहृत्य त्वत्कार्यं साधयाम्यहम् ॥४३॥
रामानुजं रक्षितुं न देवराजोऽपि शक्ष्यति ।
दुःखाद्राक्षसभक्तानां विषण्णश्चन्द्रशेखरः ॥४४॥
वसुन्धरा निशम्येदं हर्षोच्छ्वसितमानसा ।
सुपर्णध्वजमानम्य प्रातिष्ठत निजालयम् ॥४५॥
आदिदेश प्रभुस्तार्क्ष्यं गरुत्मन् नभ उत्पत ।
देवतेजो हराऽऽजौ त्वं जलौघं सविता यथा ॥४६॥
यथा त्वं विनतानन्द देवानमृतमाहरः ।
तथा मम निदेशेन निस्तेजस्कान् सुरान् कुरु ॥४७॥
प्रसार्य पक्षयुगलं महत् पक्षी गतोऽम्बरम् ।
महाच्छायाऽपतद् भूमौ समाच्छादितदिङ्मुखा ॥४८॥
द्वारेभ्यो निरगाद्रक्षःकुलं गर्जद् महास्वनम् ।
विभावसुशिखापुञ्जसन्निभं गृहमध्यगम् ॥४९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिनेदू रघुसैन्याः सन्नद्धाश्चामरा युधे ।
किन्नरैः सह गन्धर्वा यक्षवृन्दैः सुसज्जिताः ॥५०॥
शुश्रावाऽऽतङ्किता लङ्का मन्द्रं तूर्यं सुपर्वणाम् ।
दिवौकसां निनादेन देशश्चाऽऽस्त विकम्पितः ॥५१॥
अभ्युद्यानस्य देवेन्द्रं नृमणिः प्राह देवराट् ।
युष्माकं दासदासोऽहं पुण्यैर्भवन्तमाप्नवम् ॥५२॥
विपत्तावलभे पुण्यं दर्शनं ते सुरेश्वर ।
पादपद्मरजोभिस्ते पुण्यं भूतं भुवस्तलम् ॥५३॥
स्वरीश्वरः प्रतिप्राह राघवं भो रघूत्तम ।
देवस्यन्दनमारुह्य दुर्वृत्तं राक्षसं जहि ॥५४॥
क्रव्यादकुलपूर्णेन्दुरस्तं याति स्वदोषतः ।
कोऽस्ति तं रक्षितुं शक्तो मृत्युपाशनियन्त्रितम् ॥५५॥
पीयूषं मन्थनेनेव लङ्कां निर्मथ्य रावणम् ।
दण्डयित्वा सुरकुलं तुभ्यं दास्यति मैथिलीम् ॥५६॥
कियन्तं समयं लक्ष्मीरन्धीकृत्य धरातलम् ।
अतलस्पर्शसलिले निवत्स्यति रघूत्तम ॥५७॥
तुमुलं जन्यमजनि देवरक्षोनृणामथ ।
समुद्रगर्जनमिव शङ्खा लक्षाणि दध्वनुः ॥५८॥
धन्वी धनुर्निनादेन रुरोध वर्त्म कर्णयोः ।
उत्पेतुर्गगनाच्छादिसायका वर्मभेदिनः ॥५९॥
पतिता रथिनोऽसंख्याः कुञ्जराश्च सहस्रशः ।
वायुना पत्रवत् कुञ्जे वाजिनश्च समापतन् ॥६०॥
चतुरङ्गबलोपेतश्चामरो देवमक्रमीत् ।
समुज्ज्वलरथेनागाद् रणं चित्ररथो रथी ॥६१॥
सिंहो यूथपतिमिव सुग्रीवं कपिपुङ्गवम् ।
आह्वयत रथिश्रेष्ठश्चक्रैश्च घर्घरायितम् ॥६२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वास्कलश्चाङ्गदं वीक्ष्य मृगयूथं यथा हरिः ।
अचालयद्रथं तूर्णमसिलोमा च प्राद्रवत् ॥६३॥
हनूमता बिडालाक्षस्तथाऽन्ये बहुसैनिकाः ।
राक्षसीया रघुनाथपक्षीयैर्युद्धमादधुः ॥६४॥
शताङ्गं दिव्यमारूढो रामः शक्र इवापरः ।
लक्ष्मणश्च यथा स्कन्दो निरैतां योद्धुमानसौ ॥६५॥
रेणुराशिरुदगच्छत् परितो मेघजालवत् ।
लङ्काऽकम्पत सौवर्णी जगर्ज च नदीश्वरः ॥६६॥
अपूर्वमसृजद्व्यूहं देवेन्द्रः पुष्पकस्थितः ।
निर्ययौ रक्षसामीशश्चक्रं चक्रे महारवम् ॥६७॥
प्रभा रत्नालिसम्भूता पुष्पकस्याग्रतो ययौ ।
एकचक्ररथारूढसूर्यस्योषा यथा पुरः ॥६८॥
रेसुः रक्षांसि गम्भीरं समीक्ष्य रक्षईश्वरम् ।
सम्भाष्य सारथिं प्राह रथिको वीरनायकः ॥६९॥
सूतैकाकी नरो नाद्य युध्यतेऽङ्ग निशामय ।
धूमैरग्निरिवाऽऽभाति रघुसैन्येषु देवता ॥७०॥
रावणिं निहतं श्रुत्वाऽगमल्लङ्कां स्वरीश्वरः ।
रक्षोराजः सुतं स्मृत्वाऽगर्जन्महारुषाऽन्वितः ॥७१॥
रथं चालय भोः सूत यत्र शक्रोऽस्ति वज्रभृत् ।
आज्ञप्तश्चालयामास रथं सोऽपि मनोजवम् ॥७२॥ (युग्मम्) ।
प्रतस्थिरे रघुसैन्या आरण्या इव भीषिताः ।
निरीक्ष्य मत्तमातङ्गं निःश्वसन्तो मुहुर्मुहुः ॥७३॥
यद्वा दृष्ट्वा घनान् पूर्णान् वज्राग्निभिर्मरुद्धतान् ।
तिर्यञ्चस्त्रासिता घोरं नदन्तः सर्वतो ययुः ॥७४॥
धनुष्टङ्कृत्य वीरेन्द्रस्तीक्ष्णबाणेन भिन्नवान् ।
व्यूहं तस्य यथा बन्धं सैकतं प्लावनं सुखम् ॥७५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शार्दूलो वा गोष्ठवृतिं यथा रात्रौ भनक्त्यलम् ।
व्यूहं बभञ्ज तद्वत् स लीलया वलभितकृतम् ॥७६॥
शिखिध्वजस्यन्दनेन पुरो गत्वा षडाननः ।
आकृष्य शिञ्जिनीं शक्त्या रथवेगमवारुणत् ॥७७॥
रावणस्तं नमस्कृत्य कृताञ्जलिरभाषत ।
यजते किङ्करो नित्यं शङ्करं शङ्करीं कथम् ॥७८॥
लङ्कायां शत्रुमध्यस्थं निरीक्षे त्वां शिवात्मज ।
करोषि केन साहाय्यं रामस्याधर्मचारिणः ॥७९॥
अधर्म्यसमरे पुत्रं जघान लक्ष्मणोऽधमः ।
तं हनिष्यामि दुर्वृत्तं मुञ्च मार्गं महामते ॥८०॥
प्रत्याह पार्वतीपुत्रो रक्षोराजेन्द्रसम्मतः ।
लक्ष्मणं त्वत् परित्रास्ये वीर्यतो मां निवर्त्तय ॥८१॥
ततो रक्षःकुलापीडो रुद्रतेजःसमेधितः ।
वाणवर्षैर्महासेनं विदधे विह्वलं परम् ॥८२॥
अथ सम्बोध्य विजयां पार्वती प्राह दृश्यताम् ।
सखि लङ्कां प्रति स्कन्दो विद्धो रावणमार्गणैः ॥८३॥
पश्य व्योम्नि खगाधीशो देवतेजो हरत्यसौ ।
सौदामनीगतिर्गत्वा कुमारं विनिवर्त्तय ॥८४॥
दीर्यते हृदयं स्निग्धे दृष्ट्वा रक्ताक्तविग्रहम् ।
कुमारं भीमसंग्रामे रावणेन निपीडितम् ॥८५॥
भक्ताधीनः सदानन्दो भक्तस्तस्य सुतात् प्रियः ।
तत्तेजसा रावणोऽद्य दुर्वारोऽभूत् सुरैरपि ॥८६॥
ज्योतिर्मयी सखी गत्वा नीलाम्बरपथेन तम् ।
प्राह संहर शक्तिं स्वां रुद्रतेजोवली रिपुः ॥८७॥
हसन् निवारयामास रथं तारकसूदनः ।
सिंहनादेन भित्त्वाऽथ कटकानि दशाननः ॥८८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रुतं धावितवान संख्ये रिपून् रोषकषायितः ।
ऐरावतं समारुह्य रुष्टवज्रधरोपमः ॥८९॥ [युग्मम्]
राक्षसेशं शतं योधाः परिवव्रुः समन्ततः ।
हुङ्कारेण तु सर्वान् स भस्मसात् कृतवान् बली ॥९०॥
लज्जां हित्वा द्रुतं वीराः प्रस्थिताः सर्वतो भयात् ।
रुष्टो दैत्यारिरागच्छत् पार्थं कर्णो यथा युधि ॥९१॥
ऐरावतशिरो वेद्धुं रावणोऽक्षिपदायुधम् ।
अर्द्धवर्त्मनि तच्छक्रो व्यदधाच्छरखण्डितम् ॥९२॥
सुरेन्द्रं प्राह कर्वुर-पतिर्गर्वेण वासव ।
दिवि यद्भयभीतस्त्वमिन्द्रजित् स हतो रणे ॥९३॥
कपटायोधने धूर्त्त लङ्कायां समुपस्थितम् ।
व्यापादयेयं नूनं त्वां नो चेत्त्वममरो भवेः ॥ ९४ ॥
सौमित्रिं रक्षितुं नालं त्वमेष शपथो मम ।
वदन्नेवं गदां गृह्णंश्चोत्प्लुत्य भुवमापतत् ॥ ९५ ॥
मही भारेण पदयोस्तस्यालं कम्पिताऽभवत् ।
कटिकोषस्थितः खड्गस्तुमुलं झन्झनायितः ॥ ९६ ॥
जग्राह कुलिशी वज्रं हुङ्कृत्य रोषदीपितः ।
तदैव गरुडस्तस्य दैवं तेजः समाहरत् ॥ ९७ ॥
चालयितुमशक्तोऽभूत कुलिशममराधिपः ।
इतो गदां निचिक्षेप गजमूर्ध्नि दशाननः ॥ ९८ ॥
भीमाघातेन दन्तीन्द्रं पद्भ्यां भूमिमुपागतम् ॥ ।
आरुरोह हसन् दृष्ट्वा मातङ्गं राक्षसाधिपः ॥९९ ॥
क्षणेन मातलिर्दिव्यं रथं तं समुपानयत् ।
मार्गं जहौ स मानेन युयुत्सू राघवोऽभ्यगात ॥ १०० ॥
रक्षःपतिस्तमवदत् त्वां नेच्छामि हनूसखम् ।
तवानुजं जिघांसामि वीरं प्रच्छन्नयोधिनम् ॥ १०१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घ्नन्तं दृये क्षपाटानां गणं सिंहं यथा वृषान् ।
लक्ष्मणं स महेष्वासो दृष्ट्वा चक्रेऽतिगर्जनम् ॥ १०२ ॥
चचाल पुष्पकं वेगात् सनिर्घोषानलं सृजत् ।
चूडायां राजपताका रेजे धूमध्वजप्रभा ॥ १०३ ॥
सौमित्रिं पुत्रहन्तारं वीक्ष्य युद्धे दशाननः ।
कपोतमभिदुद्राव शशादन इवाम्बरे ॥ १०४ ॥
परितोऽधाविषुर्वीरा रक्षितुं राघवानुजम् ।
राक्षसाश्च तथाऽधावन सर्वतो रक्षईश्वरम् ॥ १०५ ॥
रक्षोवीरं विडालाक्षं जित्वा पवननन्दनः ।
निराचकार रक्षांसि तूलराशिमिवानिलः ॥ १०६ ॥
दृष्ट्वा यमाकृतिं शूरं रुष्टो लङ्कापतिः शितैः ।
शरैरविध्यदत्यर्थं मारुतिं तीव्रवेदनम ॥ १०७ ॥
पुत्रेण स्मृतमात्रस्तु वायुस्तस्मै बलं ददौ ।
सूर्यः स्वकरदानेन भूषयति विधुं यथा ॥ १०८ ॥
रावणेन समाक्रान्तो रुद्रतेजोबलीयसा ।
हनूमान् विमुखो युद्धात् पलायिष्ट द्रुतं भिया ॥ १०९ ॥
ततः समागतं दृष्ट्वा किष्किन्ध्यानृपतिं हसन् ।
उवाच निकषासूनुः किं वर्वर मुमूर्षसि ॥ ११० ॥
कथं भ्रातृवधूं त्यक्त्वा तारां तारामिवोज्ज्वलाम् ।
शूरमध्यं समागच्छो मुञ्चामि याहि मन्दिरम् ॥ १११ ॥
पुनर्वैधव्यमङ्ग त्वं कथं तां प्रापयिष्यसि ।
को वाऽन्यो देवरस्तस्याः पाणिं भूयो जिघृक्षति ॥ ११२ ॥
उच्चैरुवाच सुग्रीवः पाषण्डः कस्त्वया समः ।
परदारापहारेण नश्यसि त्वं सहान्वयः ॥ ११३ ॥
एतदुक्त्वा बली गर्ज्जन् निचिक्षेप रिपुं प्रति ।
गिरिशृङ्गं रावणोऽपि खण्डशस्तद् व्यधाच्छरैः ॥ ११४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुग्रीवस्तीक्ष्णबाणेन हतो हुङ्कृत्य सत्वरम् ।
पलायिष्ट रणादन्ये रघुसैन्याश्च विद्रुताः ॥ ११५ ॥
निरीक्ष्य लक्ष्मणं तत्र रावणः प्राह दुर्मते ।
कुत्र शक्रमुखा देवा रामो वा ते सहायकाः ॥ ११६ ॥
हन्मि त्वामधुनैवाहं तस्करं कूटयोधिनम् ।
पुत्ररत्नहरं ते त्वां रक्षन्तु मम हस्ततः ॥ ११७ ॥
इत्युक्त्वा स धनुः सज्यमकरोद्राक्षसाधिपः ।
तद्दृष्ट्वा तं लक्ष्मणोऽपि प्रत्युवाचाशनिस्वरम् ॥ ११८ ॥
जातोऽहं क्षत्रियकुले राक्षसान्वयलाञ्छन ।
न बिभेमि यमात्त्वत्तु का भीतिर्मानसे मम ॥ ११९ ॥
जिघांसानिलसन्दीप्तं पुत्रशोकानलं तव ।
बाणवर्षैर्विधास्यामि निर्वाणमग्निवज्ज्वलम् ॥ १२० ॥
देवदैत्यनराश्चर्यविधायि युद्धमुल्वणम् ।
महत्तदा तयोरासीच्छस्त्राशस्त्रि सुदारुणम् ॥ १२१ ॥
विस्मितो रावणः प्राह श्लाघ्यस्त्वं वीरकेशरिन् ।
शक्तिं धत्सेऽतुलां शक्तिधरतोऽप्यधिकां रणे ॥ १२२ ॥
त्राणं ते नास्ति सौमित्रे मम हस्तात् कथञ्चन ।
इत्युक्त्वा संस्मरन् पुत्रं महाशक्त्या जघान तम् ॥१२३ ॥
तया हतोऽपतद् भूमौ नक्षत्रमिव लक्ष्मणः ।
स पन्नगाचलसमो रक्तस्रोतसि निष्प्रभः ॥ १२४ ॥
रक्षोराजो रथं हित्वा धर्त्तुकामः शवं ययौ ।
विद्ध्वा मृगं वने व्याधो यथा तमभिधावति ॥१२५॥
हाहाकारो महानासील्लक्ष्मणो वेष्टितोऽमरैः ।
शङ्करं शङ्करी प्राह कैलासे खिन्नमानसा ॥१२६॥
जघान लक्ष्मणं रक्षोनाथः स धूलिलुण्ठितः ।
भक्तं प्रीणितवान नाथ हत्वा वीर्यं मरुत्वतः ॥१२७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याचे रक्ष विरूपाक्ष लक्ष्मणस्य कलेवरम् ।
इत्याकर्ण्य हसञ्छम्भुर्वीरभद्रं समादिशत् ॥१२८॥
निवारय द्रुतं लङ्कानृपं सोऽपि जगाद तम् ।
लङ्कां प्रति निवर्त्तस्व न स्पृश्यस्ते रिपुर्मृतः ॥१२९॥
स्वप्नवद्देवदूतः स तदैवान्तर्हितोऽभवत् ।
सिंहनादेन वीरः स आरुरोह रथं पुनः ॥१३०॥
ध्वनितं रक्षसां तूर्यं रेसुः क्रव्यादसैनिकाः ।
प्रविवेश पुरीं सेना चामुण्डेव हतासुरा ॥१३१॥
रक्षोनृपस्य रणपातितलक्ष्मणस्य
गीतं यशः स्तुतिकरैर्जयिनां भटानाम् ।
शक्रस्तथा युधि जितो दशकन्धरेण
ह्रीणो जगाम सह देवगणैः स्वधाम ॥१३२॥

इति श्रीमेघनादवधे महाकाव्ये शक्तिनिर्भेदो नाम विंशः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकगीतिः

[अनुवादकः—श्रीहरिदासकाव्यस्मृतितीर्थः]

Save that, from yonder ivy-mantled tow'r
The moping owl does to the moon complain
Of such as wand'ring near her secret bower,
Molest her ancient solitary reign. 3

दूरस्तम्भोपरि परिलसन्माधवीकुञ्जमध्ये
दुःखं विज्ञापयति शशिनं पेचको ह्यस्तनिद्रः ।
गुप्तं कुञ्जं निलयमभितः प्राणिनो दुःस्वभावाः
प्रत्नं शान्तं विदधति भृशं पर्यटन्तः सविघ्नम् ॥३॥

Beneath those rugged elms, that yew-tree's shade,
Where heaves the turf in many a mould'ring heap,
Each in his narrow cell for ever laid,
The rude forefathers of the hamlet sleep. 4

हा ! संकीर्णे नृशवशयने मृत्तिकास्तूपमध्ये
न्यग्रोधस्याप्रसरति तले जीर्णकायस्य किञ्चित् ।
छायामात्रं वसतिविषये पिप्पलीयं प्रलभ्या-
बोधा ग्राम्याः पितर इह नो यान्ति निद्रां सुखेन ॥४॥

The breezy call of incense-breathing morn,
The swallow twitt'ring from the straw-built shed,
The cock's shrill clarion, or the echoing horn,
No more shall rouse them from their lowly bed. 5

स्निग्धप्रातः पवनमधुरामोद-गन्धप्रसारै-
र्विहङ्गीय-स्वनिलय-परित्यागरावैस्तथैव ।
उच्चध्वानैर्मृ वधकृतां कुक्कुटानाञ्च सर्वै-
र्युक्ताह्वानैरपि न कुरुते तान् प्रबुद्धान् प्रसुप्तेः ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ভট্ট-গুণবিষ্ণু-প্রণীত

ছান্দোগ্য-মন্ত্রভাষ্যম্

স্কটিশ চার্চ্চ কলেজের প্রধান সংস্কৃতাধ্যাপক-

শ্রীদুর্গামোহন ভট্টাচার্য্য কাব্য-সাংখ্য-পুরাণতীর্থ, এম. এ. সম্পাদিত

[মহামহোপাধ্যায় ডাঃ শ্রীযুক্ত গঙ্গানাথ ঝা, এম. এ., ডি. লিট. মহোদয়লিখিত মুখবন্ধ-সংবলিত।]

সামবেদীয় কর্ম্মানুষ্ঠানে পাঠ্য বৈদিক মন্ত্রসমূহের ব্যাখ্যাত্মক "ছান্দোগ্য-মন্ত্রভাষ্য" "গুণবিষ্ণুটীকা" নামে বঙ্গ ও মিথিলায় সুপ্রসিদ্ধ। এই ব্যাখ্যা এত প্রাচীন ও প্রামাণিক যে হলায়ুধ, সায়ণাচার্য্য প্রভৃতি বেদ-ব্যাখ্যাতৃগণ তাঁহাদের ভাষ্যে ইহা হইতে অংশবিশেষ গ্রহণ করিয়াছেন। ইহাতে **বিবাহ, অন্নপ্রাশন, চূড়াকরণ, উপনয়ন** প্রভৃতি দশবিধ সংস্কার ও স্নান, সন্ধ্যা, শ্রাদ্ধ প্রভৃতি নানাবিধ গৃহকর্ম্মের উপযোগী মন্ত্রগুলি ব্যাখ্যাত হইয়াছে। **প্রত্যেক মন্ত্রের আকর ও বিনিয়োগ নির্দ্দেশ করা হইয়াছে।**

প্রকাশের পর অল্পকাল মধ্যেই পুস্তকখানি ভারতবর্ষ ও ইউরোপে সর্ব্বত্র সমাদর লাভ করিয়াছে এবং বিভিন্ন ভাষার পত্রিকায় ইহার সুখ্যাতিমূলক সমালোচনা বাহির হইয়াছে।

মূল্য—সাধারণ-পক্ষে—৩৸০
পরিষৎসদস্য-পক্ষে—৩৲

প্রাপ্তিস্থান—সংস্কৃত-সাহিত্য-পরিষৎ
১৭নং আর. জি. কর রোড, শ্যামবাজার, কলিকাতা, ও প্রধান সংস্কৃত পুস্তকালয়সমূহ।

অভিমত—

হিতবাদী—"কালের কুটিল গতিতে বেদাধ্যয়ন বিলুপ্তপ্রায়, ফলে **বৈদিক মন্ত্রের বিকৃতিহেতু আমাদের ক্রিয়াকাণ্ডগুলি পণ্ড হইতেছে।** ......এক্ষণে গুণবিষ্ণুর গ্রন্থ প্রকাশিত হওয়ায় অনেক সন্দেহের মীমাংসা হইল। যাঁহারা বিশুদ্ধরূপে মন্ত্রপাঠ করিয়া যথাযথভাবে শাস্ত্রীয় কর্ম্মের অনুষ্ঠান করিতে ইচ্ছা করেন, তাঁহাদের পক্ষে ও পুরোহিতগণের পক্ষে এই গ্রন্থ অবশ্য দ্রষ্টব্য।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষৎ-প্রকাশিত—

ছান্দোগ্যমন্ত্রভাষ্য-সম্বন্ধে আরও কয়েকটা অভিমত।

বঙ্গবাসী—"হিন্দুর নিত্যানুষ্ঠেয় ক্রিয়াকলাপে যে সকল বেদমন্ত্র উচ্চারিত হয়, গুণবিষ্ণু বহু শত বৎসর পূর্বে তাহার ব্যাখ্যা করিয়া গিয়াছেন। গুণবিষ্ণুটীকার হস্তলিখিত পুথি বিরল হইয়া উঠিতেছে। ব্রাহ্মণ-পণ্ডিতগণের গৃহে যে দুই চারিখানি গ্রন্থ এখনও দেখিতে পাওয়া যায়, তাহার অধিকাংশ পুথিতে আধুনিক লেখকগণের প্রমাদবশতঃ নানাবিধ অপপাঠ প্রবেশ লাভ করিয়াছে, বিভিন্ন পুথিতে বিভিন্নরূপ পাঠ লিখিত হইয়াছে, কোন পুথিতে প্রয়োজনীয় ভাষ্যাংশ পরিত্যক্ত হইয়াছে, কোন পুথিতে বা লেখকের স্বকপোলকল্পিত পাঠ সংযোজিত হইয়াছে।...গ্রন্থের সম্পাদক মহাশয় **অনেকগুলি আদর্শ পুথির সহায়তায় পরিশ্রম সহকারে সংহিতা, ব্রাহ্মণ প্রভৃতি আকর-গ্রন্থের সহিত মিলাইয়া মন্ত্রের পাঠ নির্ণয় করিয়াছেন।** আদর্শ পুথির সহিত আকর-গ্রন্থের পার্থক্য দেখিলে পাদটীকায় আকর-পাঠ প্রদর্শন করিয়াছেন; সর্বত্র বিভিন্ন পুথির পাঠান্তর নির্দ্দেশ করিয়াছেন এবং গুণবিষ্ণুর সহিত সায়ণীয় পাঠের প্রভেদ থাকিলে তাহাও দেখাইয়াছেন।"

বসুমতী—"গুণবিষ্ণু-ভাষ্যের প্রামাণ্যে পণ্ডিতগণের এত অধিক শ্রদ্ধা যে কালক্রমে অনধিকারী লেখকগণের অনবধানতাপ্রযুক্ত যে সকল অশুদ্ধ পাঠ ইহাতে স্থান লাভ করিয়া গুণবিষ্ণুর নামে চলিয়া যাইতেছে, তাঁহারা সেগুলি সংশোধন করিতেও ভয় পাইয়া থাকেন। এরূপ গ্রন্থপ্রকাশের আবশ্যকতা-সম্বন্ধে মতদ্বৈধ থাকিতে পারে না।...তাহার পরে গ্রন্থসম্পাদকের সুবিস্তৃত ইংরাজি ভূমিকা, সংস্কৃত প্রস্তাবনা, মন্ত্রসূচী ও বিনিয়োগসূচী সন্নিবেশিত হইয়াছে। ভূমিকায় সম্পাদক মহাশয় গ্রন্থ ও গ্রন্থকার-সম্বন্ধী নানাবিধ আলোচনা দ্বারা সপ্রমাণ করিয়াছেন যে গুণবিষ্ণু আটশত বৎসর পূর্বে এই বঙ্গদেশে বর্ত্তমান ছিলেন।...ত্রিশ পৃষ্ঠা ব্যাপী আকর-সঙ্কেতিকা-নামক পরিশিষ্টটি এই গ্রন্থের অতুলনীয় সম্পদ্। ইহাতে প্রত্যেক মন্ত্রের আকরস্থান, বিনিয়োগ-প্রমাণ এবং বিভিন্ন-গ্রন্থধৃত পাঠভেদ প্রদর্শিত হইয়াছে। এই **সর্ব্বাঙ্গসুন্দর পুস্তকখানি যেমন আনুষ্ঠানিক হিন্দুর পক্ষে পরমোপযোগী** হইবে, তেমনই বেদবিদ্যানুশীলনতৎপর ইতিহাস-জিজ্ঞাসুর পক্ষে আদরণীয় হইবে।"

—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

संस्कृतसाहित्यपरिषत्

Vol. XIX, No. 5] [September, 1936.

१८५८ शकीये भाद्रे १९श-वर्षस्य ५म संख्या

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती मातु भारती

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता ।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road.
Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
8, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সংস্কৃত-সাহিত্য-পরিষৎ-পুস্তকালয়ের

মুদ্রিত-সংস্কৃত-পুস্তকসংখ্যা (২৯।৫।৪৩ তারিখে)

বেদ	... ৪৬৫	তন্ত্র	...
ব্যাকরণ	... ৩১৭	পুরাণ	...
কোষ	... ১১৫	নাটক	..
ইতিহাস	... ১০৩	সঙ্গীত-শাস্ত্র	...
লেখগ্রন্থ (Inscriptions)	১৬	কামশাস্ত্র	...
Catalogues of Manuscripts	... ১১৭	রাজনীতি	...
কাব্য	... ৭০০	বৈষ্ণবগ্রন্থ	...
অলঙ্কার	... ১২৮	স্তোত্রগ্রন্থ	...
ছন্দঃ	.. ২১	স্মৃতি	...
ন্যায়	... ১৫৪	জ্যোতিষ	...
বৈশেষিক	... ৩১	শিল্প	...
মীমাংসা	... ৮৮	বৈদ্যক	...
যোগ	... ৫৬	বৌদ্ধ	...
সাংখ্য	... ৩৮	জৈন	...
বেদান্ত	... ৪৪০	History & Criticism	
দর্শনে বিবিধ	... ৮৮	বিবিধ	...

মুদ্রিত পুস্তকের মোট সংখ্যা :—৫১১৯

দ্রষ্টব্য—পুস্তকালয়ে যাহাতে সংস্কৃতভাষায় লিখিত বা সংস্কৃতভা সম্বন্ধীয় নব-নব প্রকাশিত পুস্তকগুলি সংগৃহীত হয় তৎপ্রতি বিশেষ দৃষ্টি র হইতেছে। সংস্কৃতভাষার অনুশীলনে যাঁহাদের আগ্রহ আছে, তাঁহারা পরিষ সভ্য না হইলেও পরিষদ্গৃহে বসিয়া পুস্তক পাঠ করিতে পারেন, এবং স হইলে সামান্য অর্থ ন্যস্ত রাখিয়া দুষ্প্রাপ্য ও দুর্মূল্য পুস্তক ভিন্ন অন্য স পুস্তকই প্রয়োজনমত স্বস্বগৃহে নিয়া অধ্যয়ন করিতে পারেন। সংস্কৃতভা গ্রন্থসমূহ অধ্যয়নের এরূপ সুযোগ কলিকাতার অন্য কোথায়ও পাওয়া সম্ভ নহে। বৃহস্পতিবার ভিন্ন সাধারণতঃ বৈকাল ৩॥০ টা হইতে রাত্রি ৮ পর্য্যন্ত পুস্তকালয় ও সাধারণ পাঠাগার খোলা থাকে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरि

20th Anniversary of the Sanskrit Sahitya Parishat
Dramatic Performance—
Balacharitam & Bhagavadajjukiyam

भारते भातु भारती **संस्कृत-साहित्य-परिषद्भवनतः**

१३४३ सौराश्विनस्य पञ्चमदिवसीया

सबहुमानमावेदनम्—

महाभागाः, आगामिनि सौराश्विनस्य चतुर्द्दशदिवसे बुधवासरे सायं सार्द्धपञ्चवादनतः कलिकाता 'युनिभार्सिटी इन्ष्टिटिउट्' इत्याख्य-भवने संस्कृत-साहित्य-परिषदो विंशवार्षिकाधिवेशनं भविता। तत्र सुसङ्गाधिपाः श्रीमन्तो 'महाराजा' भूपेन्द्र-चन्द्र-सिंह-महोदयाः सभापतिपदमलङ्करिष्यन्ति। भवद्भिः कृपयागत्य सभाकार्यं सम्पूरणीयमिति।

आश्रवयोः—
श्रीअमरेश्वर-ठाकुरस्य
श्रीप्रबोधचन्द्र-वागची-शर्मणश्च सम्पादकयोः

कार्यसूची—१। सभापतिवरणम्। २। कार्यवि[illegible]णपाठादि[illegible]म्। ३। स्वर्गत-कविराज-शिरोमणि-श्यामादास-वाचस्पति-महोदयानां चित्र-प्रतिष्ठा। ४। स्वर्गतानां महामहोपाध्यायानां भागवतकु[illegible]रशास्त्रिणां कृतेशोकप्रकाशः। ५। सभापतेरभिभाषणम्। ६। भासकविकृत-"बालचरितस्य" बोधायन-कविकृत-"भगवदज्जुकीयस्य" चाभिनयः।

University Institute. 30th Sept., 1936, 5-30 p. m.
President—
Maharaja Bhupendra Chandra Singh

कृष्णाष्टम्यां जातः सामन्तोपनामा चन्द्रशेखरसिंह आमरणं
कुर्वन् वहुवाधाः समतीत्य कृतकृत्योऽभवत्। ओड्रप्रदेशप्रधान

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

September, 1936. | १८५८-शकीये भाद्रे १९श-वर्षस्य ५म-संख्या | Vol. XIX No. 5

चन्द्रशेखरः

[निबन्धकः—श्रीयोगेशचन्द्ररायविद्यानिधिः]

पञ्जिकारसिकाः कतिचन भारतीया अर्द्धशताब्द्याः प्राक् अस्याः संस्कारे मनो निदधुः। अत्र ते भ्रममास्थिषत, पञ्जिकागणितकाले उपरागादर्शनात् ब्रिटिशपञ्जिकानीतदिवसे विषुवायनसंक्रान्तेरसंवादाच्च। केऽप्यवदन् ब्रिटिशनाविकपञ्जिकानीतान्तरमपि सूर्याद् ग्रहाणामस्मत्पञ्जिकानीतान्तरेण न संवदति। ततस्ते आशङ्कन्ते स्म यदस्मत्पञ्जिकोक्ततिथिषु अनुष्ठितानि धर्मकृत्यादीनि अकालकृतानि निष्फलतां यातानि। हिन्दुधर्मसंरक्षकाणां पण्डितानां विचारा अभवन् कृत्यनिर्णये, अन्तरान्तरा तेषां सम्मेलनमप्यभवत्। अत्रान्तरे सर्वेष्वपि प्रदेशेषु ब्रिटिशनाविकपञ्जिकानुयायिनी पञ्जिका प्राकाशि। अस्मद्देशीयपण्डितास्तां म्लेच्छां मन्यमाना न स्वीचक्रुः। तदानीं न केऽप्यजानन् यद् ओड्रप्रान्तवासी कश्चित् पण्डितः प्रचलितसिद्धान्तेषु भ्रमं पश्यन् स्वकृतग्रहवेधेन तान् निराकृतवान्, तन्निर्मितसारणीगणितपञ्जिका च पुरीमन्दिरे मानिता। असौ १७५७ शके पौषकृष्णाष्टम्यां जातः सामन्तोपनामा चन्द्रशेखरसिंह आमरणं ज्यौतिषचर्यां कुर्वन् बहुबाधाः समतीत्य कृतकृत्योऽभवत्। ओड्रप्रदेशप्रधाननगरकटकतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्चिमायां पञ्चविंशतिक्रोशेषु अवस्थितं खण्डपाडा नाम सामन्तराज्यं तस्य जन्मभूमिरासीत्। नाविरासीत्तत्र परिव्राजकानामगम्ये वनपर्वतमये भूमिभागे पाश्चात्त्यशिक्षालोकः। तत्रैव स जीवनकालं यापयामास। सप्तपञ्चाशद्वर्षः स प्रथमं कटकनगरं ददर्श।

कलिकातासंस्कृतमहाविद्यालयाध्यक्षो महामहोपाध्यायः श्रीमहेशचन्द्र-न्यायरत्नमहाशयो वङ्गभूमौ ज्यौतिषिकसम्मेलने भूयसा दत्तमना आसीत्। चन्द्रशेखरस्य नाम तेन श्रुतं नाज्ञायि तु नामी। १८९३ खृष्टाब्दस्य जानवारीमासे स कटकमागतः, चन्द्रशेखरश्च तत्रानायि। प्रथमं महामहोपाध्यायेन न प्रतीतं यत् प्राचीन-ज्यौतिषिको नादर्शनतां गतः। ओड़ीं संस्कृतां च विहाय नान्यां भाषां सः अज्ञासीत्। बाल्ये तेन ओड़्भाषालिखितं नव्यभूगोलविवरणं पठितं ध्रुवत्वेन न मानितं च। भूभ्रमणं न तस्य सम्मतमासीत्। पण्डितैर्विमतेषु सर्वेष्वेव विषयेषु कृतोत्तरः अनवगतपाश्चात्त्यज्योतिषज्ञानलेशोऽपि असौ प्राचीनहिन्दुशास्त्रानुरक्तो महामहोपाध्यायस्य विस्मयमाततान।

चन्द्रशेखरोऽसौ राजवंशसमुद्भूतो विविधव्यसनान्यवधूय ज्यौतिषज्ञाननियतस्तापस इव कालं निनाय। पञ्चदशवर्षदेशीयः स मातृभाषाशिक्षां समाप्य संस्कृतभाषायां विविधान् विषयान् पठितुमारेभे। अत्रावसरे पिता तस्मै लग्नराशिग्रहनक्षत्रादिशब्दार्थस्य होराशास्त्रे प्राथमिकशिक्षां च ददौ। बालकोऽसौ आकाशे ग्रहादिदर्शनोत्सुक आसीत्। किन्तु आकाशे तेषां स्थानमनियतमतः शास्त्रादेव बोद्धव्यम्। ततस्तेन सूर्यसिद्धान्तः टीकासाहाय्येनैवाधीतः। यदा स ग्रहाणां स्थानानयने असमर्थ आसीत् तदा स प्रत्यक्षदर्शनेन गणनानीतफलं परीक्षितुमैच्छत्। सिद्धान्तवर्णितानि यन्त्राणि तेन निर्मितानि। ग्रहांस्तु गणनानीते स्थाने न दृष्ट्वा स विस्मितोऽभवत्। पुनः पुनर्गणनयापि दृग्दर्शनासंवादात् स सिद्धान्तभगणादिसत्यतायां समशेत।

ततस्तेन सिद्धान्तशिरोमणिरधीतः। अनेन गणितानां स्थानानामपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृग्दर्शनासंवादस्तेन लक्षितः। अधुना स स्थिरनिश्चयोऽभूत् यत् सिद्धान्त-भगणादिर्न यथार्थः। विंशतिवर्षीयः स यथार्थभगणादिनिर्णये कृतसङ्कल्पो बभूव लब्धफलं च तालपत्रे संस्कृतश्लोकैरुपनिबद्धवान्। त्रिंशद्वर्षेण तेन सिद्धान्तदर्पण इति ग्रन्थः समाप्तः। सारण्यादिगणनसंशोधनादौ पुनश्चतुर्विंशतिर्वर्षाणि तेन नीतानि। १८९३ खृस्ताब्दे स महामहोपाध्याय-विरुदं लब्धवान्।

ग्रन्थप्रकाशात् पञ्चवर्षाभ्यन्तरे १८२६ शके ज्यैष्ठकृष्णद्वादश्यां स यशःशेषतां गतः। न कदापि स दृढकाय आसीत्। वैष्णवोचितकृच्छ्र-साध्यजीवनधारणेन ज्यौतिषालोचनायां चाभिनिवेशेन स आयौवनम् अस्वस्थदेह आसीत्। आश्चर्यं यत् स एतावत्कालजीवी आसीत्।

सिद्धान्तदर्पणस्य मुखबन्धोद्धृतसारण्यस्तस्य गणनानैपुण्यं प्रदर्शयन्ति।

पाश्चात्त्यज्योतिषनीतग्रहभगणस्य तस्यग्रहभगणस्य चान्तरदिनादि

	सूर्यसिद्धान्तस्य	सिद्धान्तदर्पणस्य
रवेः	+०·००२३८	+०·००२३८
चन्द्रस्य	+०·००००१	+०·००००१
कुजस्य	+०·०१८१	+०·००६३
बुधस्य	−०·०१०७	+०·०००९
गुरोः	−०·२६४२	+०·०४३०
शुक्रस्य	−०·००२२	+०·००१६
शनैश्चरस्य	+६°५५३३	+०·५४०८

चन्द्रशेखरः सूर्यसिद्धान्तधृतभगणादिं पर्यग्रहीत् न स्वयमगणयत्। तदानीता ग्रहणां परमविक्षेपास्तु सर्वथा प्राप्तिनिर्मुक्ताः। ते यथा—

	त्रिटीशज्योतिषे	सूर्यसिद्धान्ते	सिद्धान्तदर्पणे
बुधस्य	७°—०′—८″	५°—२५′	७°—२′
शुक्रस्य	३—५३—३५	२—४६	३—२३
कुजस्य	१—५१—२	१—३०	१—५१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरोः	१–१८–४१	१–०	१–१८
शनैश्चरस्य	२–२६–४०	२–०	२–२६
चन्द्रस्य	५–८–४८	४–३०	५–६
रविपरमक्रान्तिः	२३°–२७	२४°–०	२३°३०′

दर्पणगणनाया याथार्थ्यं पश्चाल्लिखिततुलनया समधिकं स्पष्टतया प्रतिभाति। महाविषुवपाताद् ग्रहभुक्तयः १८९४ खीस्ताब्दस्य जानवारी ३१ तमे (कटकसायं षट्होरागते)

	नाविक पञ्जिका	सिद्धान्तदर्पण	वङ्गपञ्जिका	नाः पः मतेन क्रान्तिः	सिद्धान्तदर्पण-मतेन क्राः
सू	१०-११°-५४′	१०-११°-५६′	१०-१०°-३४′	१७°-१४′	१७°-१५′
च	४-४-२४	४-४-४१	४-२-५५	२४-१	२४-१५
कु	०-२२-४८	०-२२-२३	०-२०-३७	९-२४	९-७
बु	१०-०-३३	१०-०-५८	१०-३-१०	२१-४५	२१-१५
गु	०-१९-२७	०-१९-८	०-१८-०	६-३२	६-५०
शु	९-१९-१९	९-१९-१२	९-१८-४०	२२-७	२२-१
श	६-१२-४३	६-१३-३	६-१३-८	२-४१	३-०

चन्द्रशेखरस्य असामान्यकृतकार्यताया द्विविधं कारणमुपलभ्यते। प्रथमतः स भगणादिनिर्णये भास्कराचार्यस्य दृक्सिद्धग्रहस्थानानि लब्धवान्। षट्शतवर्षेभ्यः प्राक् प्रदत्तानि स्थानानि स्वगणितस्थानानि च तस्य परमोपकृतयेऽभवन्।

स्वोद्भावितयन्त्रयोगेण वेधकर्मणि असामान्यनैपुण्यं तस्य द्वितीयं सफलताकारणम्। यन्त्राणामसाधारणत्वं किमपि नासीत्। तानि सर्वाण्येव गृहनिर्मितानि। नासौ यन्त्रस्य गुणो येन सफलता लभ्यते, किन्त्वस्य यन्त्रिणः। वराहस्तस्य बृहत्संहितायां ज्यौतिषिकगुणान् गणयामास। तन्मध्ये दृग्गणितसंवादार्थं छायाजलयन्त्रदृगगणितसाम्येन प्रतिपादनकौशलमन्यतमम् इति कथितम्। ईदृशगुणसम्पन्नोऽसौ चन्द्रशेखरः। यन्त्रं विनापि केवलं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्या तारयोरन्तरम् अंशपर्यन्तमनुमातुं समर्थ आसीत्। सूर्यसिद्धान्त-सिद्धान्तशिरोमण्यज्ञातं चन्द्रपथगणने संस्कारं स्वयमाविश्चकार।

उक्तं च ज्योतिःशास्त्रं वेदचक्षुरिति। न कोऽपि जानाति कदा कथं वा चक्षुः प्रयुक्तमभवत्। दिने दिने सूर्यस्य उदयास्त-गमनम्, मासे मासे चन्द्रस्य ह्रासवृद्धी, रात्रौ रात्रौ नक्षत्राणामाविर्भावतिरोभावौ नराणां विस्मयं जनयामासुः। नराश्च तेषां साहाय्येन निरवच्छिन्नं कालं विभजते स्म। ब्रह्मा नरानसृजत् शास्त्रञ्च। जीवनयात्रानिर्वाहार्थं प्राचीना आर्या भगणानां गतिं पर्यालोचयामासुः, ऋतुपर्यायादिं च नक्षत्रविशेषोदयेन संयोजयामासुश्च। इत्थमष्टसहस्रवर्षेभ्यः प्राक् ऋग्वेदद्रष्टार ऋषयश्चित्रोदये दक्षिणायनारम्भम् अश्विन्युदये उत्तरायणारम्भञ्च दृष्टवन्तः। ततः क्रमेण ज्योतिःशास्त्रज्ञानवृद्धिर्बभूव। सिद्धान्तेषु अस्य चरमोन्नतिर्जाता। प्रणयनकाले तेषां दृग्गणितैक्यमासीत्। ईदृग्गणनया प्रथिता पञ्जिका सार्थिका। चन्द्रशेखरः स्वोपज्ञज्योतिषशास्त्ररचयितृणामन्तिमतमः प्रतिभाति। तेन ज्योतिषं यथार्थं वेदचक्षुः कृतम्। यदा दृग्गणितान्तरं कालेन वर्द्धमानं विपुलतां याति तदा संस्कारः प्रयोजनीयो भवति। चन्द्रशेखरः सर्वेषां पश्चादायातः संशोधनञ्च तेन सम्यक् कृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टभवभूतिः

[निबन्धकः—श्रीद्विजेन्द्रनाथगुहचतुर्धुरीणः]

रत्नानि। इह खलु भारतवर्षे यदा देवभाषानुशीलनस्य प्रावल्यमभवत् तदा रत्नशब्दस्य प्रयोगो व्यवहारोऽपि च सर्वैरेव विदित आसीत्। अष्टादशपुराणान्तर्गतम् अग्निपुराणं गारुडञ्च एतद्गतं विवरणं विवृणुतः। अनेकशो रत्ननामानि तत्र विद्यन्ते। तथा चोक्तम् आग्नेये रत्नपरीक्षाप्रकरणे—(२४६ अध्याये, १-७ श्लोकाः)

"रत्नानां लक्षणं वक्ष्ये रत्नं धार्यमिदं नृपैः।
वज्रं मरकतं रत्नं पद्मरागञ्च मौक्तिकम्॥
इन्द्रनीलं महानीलं वैदूर्यं गन्धशस्यकम्।
चन्द्रकान्तं सूर्यकान्तं स्फटिकं पुलकं तथा॥
कर्केतनं पुष्परागं तथा ज्योतीरसं द्विज।
स्फटिकं राजपट्टञ्च तथा राजमयं शुभम्॥
सौगन्धिकं तथा गञ्जं शङ्खब्रह्ममयं तथा।
गोमेदं रुधिराक्षञ्च तथा भल्लातकं द्विज॥
धूलीं मरकतञ्चैव तुत्थकं सीसमेव च।
पीलुं प्रवालकञ्चैव गिरिवज्रं द्विजोत्तम॥
भुजङ्गममणिञ्चैव तथा वज्रमणिं शुभम्।
टिट्टिभञ्च तथा पिण्डं भ्रामरञ्च तथोत्पलम्॥
सुवर्णप्रतिबद्धानि रत्नानि श्रीजयादिके।
अन्तप्रभत्वं वैमल्यं सुसंस्थानत्वमेव च॥"

तत्रैव रत्नानां गुणाः द्रव्यगुणे धात्वादिवर्गे—

"रत्नानि भक्षितानि स्युर्मधुराणि सराणि च।
चक्षुष्याणि च शीतानि विषघ्नानि धृतानि च।
मङ्गल्यानि मनोज्ञानि ग्रहदोषहराणि च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगो-
र्माहेयस्य तु विद्रुमो निगदितः सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शने-
र्नीलं निर्मलमन्ययोर्निगदिते गोमेद-वैदूर्यके ॥"

अथ रत्नस्य निरुक्तिः—

"धनार्थिनो जनाः सर्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥"

(द्रव्यगुणे, धात्वादिवर्गः) ।

यद्वा—"जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते ।"

अपिच—"न हि शास्त्रं विना चक्षूरत्नानामाकरादिकम् ।
साध्यते त्रिदशैस्तस्मात् परीक्षा रत्नविज्जनैः ॥"

मुक्ता—"अयन्ते वाष्पौघस्त्रुटित इव मुक्तामणिसरो"** (उत्तरचरिते १।२९) । "अन्तसारं शौक्तिकेयमिन्दुरत्नञ्च मौक्तिकम्" इत्यत्र पर्यायो मुक्तावल्याम् । देशान्तरे नामभेदः—यथा, हिन्दुस्थाने मोती, महाराष्ट्रे मोर्ती, गुर्ज्जरे मोती, कर्णाटे मौक्तिक, तैलङ्गे मोत्यालु, पारस्यदेशीये मखारिद, आरबभूखण्डे लोलो, असमीयाप्रदेशे मुकुता माणिक, आंलण्ड-देशीये Pearl, ल्याटिने च Margarita,

"द्विपेन्द्र-जीमूत-वराह-शङ्ख-मत्स्याहि-शुक्त्युद्भव-वेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषान्तु शुक्त्युद्भवमेव भूरि ॥"

(भोजराजकृत-युक्तिकल्पतरौ मुक्तापरीक्षा) ।

अपिच—"द्विप-भुजग-शुक्ति-शङ्खाभ्र-वेणु-तिमि-शूकरप्रसूतानि ।
मुक्ताफलानि तेषां बहु साधु च शुक्तिजं भवति ॥"

(बृहत्संहितायाम ८१।१) ।

शुक्रनीतौ चतुर्थाध्यायस्य द्वितीयप्रकरणे च तद्वत् प्रतीयते । अन्यच्च, भावप्रकाशे (वैद्यकग्रन्थे) उक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"शङ्खो गजश्च क्रोडश्च फणी मत्स्यश्च दर्दुरः ।
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ॥"

निदानमेव तावत्. ज्योतिषशास्त्रे तु अस्याः समधिकस्तुतिवादा दृश्यन्ते। धारणे गृहमागते च महाफलं लभ्यते। ग्लौरेव अधिष्ठात्री देवता। बृहत्संहितामते बहुशः अधिष्ठात्र्यो देवता भवन्ति।

गुणः आमयिकप्रयोगश्च। तथाचोक्तं द्रव्यगुणे—

"मुक्ता कषाया स्वाद्वी च बलपुष्टिप्रदायिनी ।
वृष्या नेत्रहिता राजयक्ष्मघ्नी विषनाशिनी ॥
स्त्रीणां कान्तिरतिकरी धारणाद् ग्रहपापनुत् ॥"

मुक्तायाः लावण्यमयीं कान्तिं वर्णविशेषकञ्च छायामाहुः। चतुर्धा मौक्तिकच्छाया परिकल्पिता। रत्नविदां (मण्डलीनां वा) मते पीतच्छाया स्त्रीसम्पत्तिः, मधुरा छाया बुद्धिवृद्धिकरी, शुक्ला यशस्करी, नीला च सौभाग्यकृत—

"पीता लक्ष्मीप्रदा छाया मधुरा बुद्धिवर्द्धिनी ।
शुक्ला यशस्करी छाया नीला सौभाग्यदायिनी ॥"

चन्द्रकान्तमणिः—"* * * *
"बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः" (उत्तरचरिते १।३४)। "चन्द्रकान्तः सोममणिः सिताश्मा प्रस्तरोपलः" इत्यत्र पर्यायः। देशान्तरे नामभेदः—यथा, हिन्दुस्थाने चन्द्रकान्त, महाराष्ट्रे चन्द्रकान्तमणि, कर्णाटे चन्द्रकान्त, तैलङ्गे च चन्द्रकान्त स्फटिक (quartz) विशेषः।

तत्रैव उत्पत्तिः—

*स्फटिकस्य उपादानेन अयालुमिना क्षारपदार्थश्च स्वभाववशेन मिश्रितत्वात् पृथक् पृथग् वर्णत्वं प्राप्तवन्तौ। तन्मध्ये 'मुनष्टोन्' (Moon-stone)

* "हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तद् द्विधा भवेत् ।
* । * * चन्द्रकान्तं तथाऽपरम् ॥" (युक्तिकल्पतरौ)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याख्यातं रत्नं प्रशस्तम्। प्राचीनकालाद् भारतवर्षे "चन्द्रकान्तणिः" इत्येव प्रसिद्धिः। व्युत्पत्तिविषये तावत्—चन्द्रकिरणसंस्पर्शात् शिशिर-बिन्दुसदृशम् अमृतं क्षरितवान् इत्येव किंवदन्ती स्फोरिता।* अधुना 'फेल्स्पार्' (Felspar) इत्येव अनुमीयते। चन्द्रकान्तस्य नीलाभ-हरिद्वर्णः श्वेतपद्मवत् शुभ्रश्चेति द्वौ विशिष्टौ प्रकारौ विद्येते। उभयोरेव उपरिभागे तु चन्द्रवद् गोलाकारा छाया वर्त्तते।

गुण आमयिकप्रयोगश्च—

चन्द्रकान्तमणिधारणे तु देवादिदेवो महादेवः सततं प्रसन्नो भवति। तथाचोक्तं मुक्तावल्याम्—

"चन्द्रकान्तमणिः शीतः स्निग्धः स्वच्छः शिवप्रियः।
अस्रदाहग्रहालक्ष्मीविनाशनो निरन्तरम्॥"

अपिच सुश्रुतवैद्यकग्रन्थे—

"चन्द्रकान्तोद्भवं वारि पित्तघ्नं विमलं स्मृतम्।" इति।

राजपट्टमणिः—"एतस्मिन् मसृणितराजपट्टकान्ते" * * * (उत्तरचरिते ५।१८)। मणिविशेषः। बालद्वयं कुशलवौ "कुवलयदल-स्निग्धश्यामम्" इति वर्णितम् (४।१४)। अन्यत्रापि च "इन्द्रमणिमेचच्छवि" इत्युक्तम् (६।१७)। राजपट्टमणिरेव स इति प्रतिभाति। अत एव 'राज-पट्टमणिः' मरकत (Emerald) इति सम्भावयन्ति। केषाञ्चिन्मते राजपट्ट नीलरक्तपट्टवस्त्रविशेषः। अपरेषां तु मते वज्रविशेषः। इदानीं तु तत्समाधानचेष्टा काऽपि न परिलक्ष्यते।

सूर्यकान्तमणिः—"किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति।" (६।१४)। भानुसम्पर्केण अग्निवज्ज्वलनं सूर्यकान्तमणेः प्रसिद्धमेव।

---

* उक्तञ्च—"पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात्।
चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे॥" (मुक्तावल्यां)।
यद्वा—"अमृतांशुकरस्पर्शात् स्रवत्येवामृतोदकम्।
दुर्लभं तं महारत्नं चन्द्रकान्तं विदुर्बुधाः॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"दीप्तोपलः सूर्यकान्तो ज्वलनाश्माऽग्निगर्भकः" इत्यत्र पर्यायः। देशान्तरे नामभेदः—हिन्दुस्थाने आतसी सीसा, सूर्यकान्त ; महाराष्ट्रे सूर्यकान्तमणि, गुर्ज्जरे अगनचशमानो काच। तत्रैव उत्पत्तिस्थानम्—

"हिमालये सिंहले च विन्ध्याटवीतटे तथा।
स्फटिकं जायते चैव नानारूपं समप्रभम् ॥
हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तद् द्विधा भवेत्।
सूर्यकान्तश्च तत्रैकं * * * *"

(युक्तिकल्पतरुः)

व्युत्पत्तिः—

"सूर्यांशुस्पर्शमात्रेण वह्निं वमति यत् क्षणात्।
सूर्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः ॥" (तद्वत)।

यद्वा—

"तपनस्यातपस्पर्शाद् उद्गिरत्यनलं हि यः।
सूर्यकान्तं विजानीयात् स्फटिकं रत्नमुत्तमम् ॥"

गुण आमयिकप्रयोगश्च—

"सूर्यकान्तो भवेदुष्णो निर्मलश्च रसायनः।
वातश्लेष्महरो मेध्यः पूजनाद् रवितुष्टिदः ॥"

(राजनिघण्टुः)।

इन्द्रनीलमणिः—'अथ कोऽयमिन्द्रमणिमेचकच्छविः" (६।१७)। नीलः, शौरिरत्नं, नीलाश्मा, नीलरत्नकः, नीलोपलः, तृणग्राही, महानीलः, सुनीलकः, मसारम्, इन्द्रनीलम्, गल्लर्कः, पद्मरागजः इति पर्यायाः।

देशान्तरे नामभेदः—हिन्दुस्थाने नीलमणि, महाराष्ट्रे नीलमणि, गुर्ज्जरे नीलम्, कर्णाटे नील, तैलङ्गे नीलं आंलण्डदेशीये (sapphire), पारस्यभूखण्डे नीला।

तत्रैव उत्पत्तिस्थानम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"विषये सिंहले चैव गङ्गातुल्या महानदी ।
तीरद्वये च तन्मध्ये विक्षिप्ते नयने यथा ॥
ईषन्मात्रे पृथक् स्थाने कालिङ्गविषये तथा ।
पतिते लोचने यत्र तत्र जाता महाकराः ॥
सिंहलस्याकरादेव समुद्भूताः सुशोभनाः ।
महानीलास्तु विज्ञेयाः कलिङ्गस्य तथोद्भवाः ।

* * * * * *

सिंहलीयाकरौ द्वौ च उत्तमाधमसंज्ञकौ ।
सिंहलस्याकरोद्भूता महानीलास्तु ये स्मृताः ॥"

(अगस्तिमते इन्द्रनीलपरीक्षा) ।

यद्वा—"सिंहलद्वीपसम्भवेन्द्रनीलोपलस्य" इति मल्लिनाथटीकायाम्, (माघे १।१६) ।

एतच्च—"इन्द्रनीलस्य सम्भूतिः सिंहलद्वीपमध्यतः ।
नद्या रावणगङ्गायाः कूले पद्माकरे स्मृता ॥"

निदानमेव तावत्—

"यस्य मध्यगता भाति नीलस्येन्द्रायुधप्रभा ।
तदिन्द्रनीलमित्याहुर्महार्घं भुवि दुर्लभम् ।
यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तन्नयेत् सर्वं महानीलः स उच्यते ॥" (युक्तिकल्पतरुः) ।
अग्निपुराणेऽपि तद्वत् ।

यद्वा—"क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन् नीलतां व्रजेत् ।
इन्द्रनीलमिति ख्यातं तदा हि रत्नकोविदैः ॥" (मणिपरीक्षा)

गुण आमयिकप्रयोगश्च—

"नीलः सतिक्तकोष्णश्च कफपित्तानिलापहः ।
यो दधाति शरीरे स्वे सौरिर्मङ्गलदो भवेत् ॥" (राजनिघण्टुः) ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्ता

अष्टमः परिच्छेदः

महत्तरः खलु विजयाया गृहसंलग्नस्योद्यानस्यैतद्दिश्योऽंशः। दीर्घतराणामाम्रपनसादिवृक्षाणामधस्तात्तदाऽन्धकारो घनीभूतः प्रावर्त्तत। वृद्धो दौवारिकः प्राह, मातृके, किञ्चित् तिरश्चीनतामाश्रित्य प्रशस्तया रथ्यया गमनं किं न सम्यगासीत् ?

एवमादिषु विषयविशेषेषु दृष्टिपातनोचिता मनोऽवस्था विजयाया नासीत् —सा केवलं 'ने'त्येकमक्षरमुच्चार्यैव द्रुतम् अन्धकारपूर्णं वनमन्तरा गृहं प्रत्यग्रेसरीबभूव। यन्नाम कथाद्वयं तस्या हृदयं प्राधान्येनाभ्यभवत् तयोरेकम् इदं यत्, इयत्स्वप्यालापेषु केवलं योषिद्विषये भद्ररीतिविगर्हितमिति कृत्वैवास्य नामापि न ज्ञातमभूत्। द्वितीयमेतद् यत्, दिनद्वयात् परमयं क्व गमिष्यति—प्रश्नोऽयं शतकृत्वो मुखान्तरुपगतोऽपि शतकृत्व एव केवलं लज्जयैव मुखे प्रतिरुद्ध आसीत्। एतस्य विषये कश्चन विशेषः प्रथमत एव विजयाया दृष्टिमाचकर्ष, यदयं यो वा भवतु सर्वथा सुशिक्षितः, तथा, सत्यपि पल्ल्यामेव जन्मस्थाने अनात्मीयया भद्रयोषिता सहासङ्कोचालपनस्य शिक्षा अभ्यासश्चास्य स्तः। ब्राह्मसमाजस्यान्तरनिविशमानोऽप्ययमिमां शिक्षां कथं क्व वा प्रापदिति चिन्तयन्त्यां तस्यां गृहे प्रवर्तितचरणमात्रायामेव परेशमातोपेत्य व्यज्ञापयत् यत्, बहून् क्षणान् विलासमहोदयो बहिरुपवेशनगृहे भवतीम् प्रतिपालयति। श्रुतवत्या एव तस्या मनः श्रमेण विरागेण च पूर्णमभूत्। जनोऽयं यत्तदानीं क्रुध्यन् प्रातिष्ठत, ततः परं पुनर्नागच्छत्। परमद्य येनैव हेतुना स आगच्छतु, यस्य जनस्य चिन्तया तस्या अन्तरं पूर्णमासीत् तं कथमप्यज्ञात्वापि विजया द्यावापृथिव्योरिवेतयोर्व्यवधानमपरिकल्पयन्ती स्थातुं नोदसहत। श्रान्तेन कण्ठेनापृच्छत्, अहं गृहं प्रत्यागतेति कच्चित्तं ज्ञापितवत्यसि परेशमातः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परेशजननी प्राह, नहि ; अन्तिके, अहमिदानीमेव परेशेन वृत्तान्तं प्रेषयामि ।

स 'चा' पास्यति न वेति कच्चिदपृच्छः ?

हन्त मातः, तदपि नाम नाभूत ? तेन तु प्रोक्तम्, त्वयि प्रत्यावृत्तायामेव सपीतिर्भविष्यति ।

विलासमहोदय एवास्य भवनस्य भविष्यन्नध्यक्ष इत्ययं वृत्तान्त आत्मीयेषु परिजनेषु च न कस्याप्यविदित आसीत् । तेन च हेतुना समादरस्याङ्गवैकल्यं लेशतोऽपि न पर्यलक्ष्यत । विजया वचनान्तरमकुर्वाणा उपरि तस्या गृहं प्राविशत् । प्रायेण पञ्चाशत्पलेभ्यः परं विजया अधोऽवतीर्य उन्मुक्ताद् द्वाराद् बहिरदपश्यत्, विलासो दीपाभिमुखम् आसन्दिकाया उपरि अवनतपूर्वकायः कियतो लेखान् पश्यन्नवर्तत । स तस्याः पदशब्देन मुखमुन्नमय्य क्षुद्रमेकं नमस्कारं कृत्वा सपद्येव गम्भीरतामगाहत । प्राह, नूनं त्वमुत्प्रेक्षितवत्यसि यदहं कोपेनैवैतावतो दिवसान् नागच्छम् । यद्यप्यहं कोपं नाकार्षम्, परम्, कुतोऽपि स मद्विषये कियन्मात्रयाऽप्यन्याय्यो नाभविष्यदित्येवाद्य त्वाहं प्रमाणयिष्यामि ।

विलास एतावत्कालं विजयां भवच्छब्देनैव समबोधयत् । अद्यतनस्याकस्मिकस्य 'त्वम्' इति सम्बोधनस्य :कारणं कथञ्चनानुपलभ्यापि विजया आनन्देनोच्छ्वसिता न जातेति तु तस्या मुखमवलोकयतो न दुरनुमेयमासीत् । परं सा किमपि वचनमनुक्त्वा शनैर्गृहं प्रविश्य नातिदूरवर्तिनीमासन्दिकामाकृष्योपाविशत् । विलासस्तत्र भ्रूक्षेपमप्यकृत्वा प्राह, अहं सर्वं चतुरस्रं विधायेदानीमेव कलिकातातः प्रत्यावर्तिषि, इदानीं यावत् तातपादैः सहापि साक्षात्कारं कर्त्तुं नालमभवम् । त्वं तावद् यथेच्छं तूर्णीं स्थातुमर्हसि, नाहन्त्वर्हामि । मम कर्त्तव्यज्ञानं वर्त्तते, गुरुभारं किञ्चन कर्मोरीकृत्य नाहं कथमपि स्थिरतयाऽवस्थातुं प्रभवामि । अस्माकं ब्राह्ममन्दिरप्रतिष्ठा अस्मिन् 'बड'दिनावकाश एव भविष्यति—सर्वं स्थिरीकृत्य प्रतिनिवृत्तोऽस्मि, किमन्यत्, निमन्त्रणमपि नावाशेषयम् । अहो, प्राततरारभ्य कियदिव वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चंक्रमणं न विहितम्। यातु, अमुष्यां दिशि प्रायेण निश्चिन्ता एवास्म। के के आगमिष्यन्ति तदपि मयैतत् पत्रमारोप्यानीतम्, वारमेकं वाचय— इत्युक्त्वा विलासो मनःप्रसादजन्मानं प्रचण्डं निःश्वासमुत्सृज्य सम्मुखस्थं पत्रं विजयां प्रति प्रचालयन् आसन्दिकायां देहं प्रसार्योपाविशत्।

तथापि विजया मुखमुद्रां नाभिनत्, निमन्त्रितानां विषयेऽपि लेशमात्रं कौतूहलं न प्राकाशयत; यथापूर्वमुपविष्टा तस्थौ। एतावतः क्षणादूर्ध्वं विलासविहारी विजयाया नीरवतामभिज्ञाय प्राह, कः प्रकारः ; कथमयं तूष्णीम्भावः ? विजया शनैरवादीत, मया चिन्त्यते, भवता निमन्त्रितानामिदानीं किं प्रतिवक्तव्यम् ?

अस्य कोऽर्थः ?

मन्दिरप्रतिष्ठाविषये नाद्यापि मया किमपि स्थिरीकर्त्तुमलमभूयत।

विलासः सपदि ऋजुकायः सन् कियत्क्षणं तीव्रदृष्ट्याऽवलोक्य प्राह, कोऽस्य हेतुः ? किं त्वया चिन्तितम्, यदस्मिन् अवकाशाभ्यन्तरेऽशक्यसंपादनश्चेत् पुनः शीघ्रं सुशकं भवेत् ? तेषां कोऽपि न तावकीनः, येन यदा तवावकाशो भविष्यति, तदैव ते प्रत्युपस्थास्यन्ति ? मनः स्थिरं नाभूदित्यस्य कारणं मया श्रूयताम् ?

क्रोधेन तस्य नेत्रद्वयी ज्वलितेवाभूत्। विजयाऽधोमुखी कियत्क्षणान् तूष्णीमवस्थाय शनैराह, मया विचिन्त्य स्थिरीकृतम्, एतन्निमित्तीकृत्यात्रोत्सवो निष्प्रयोजनः।

विलासश्चक्षुषी विस्फार्य प्राह, उत्सवः ! उत्सवः कर्त्तव्य इत्येवंविधा तस्य वाचोयुक्तिर्न मया प्रयुक्ता, प्रत्युत, यत् स्वभावेन शान्तं गम्भीरञ्च कर्मणो निःशब्दनिष्पादनोचितं ज्ञानं ममास्ति, तदर्थं न त्वया चिन्तयितव्यम्।

विजया तथैव मृदुना कण्ठेनावोचत्, अत्र ब्राह्ममन्दिरप्रतिष्ठाया कापि फलवत्ता नास्ति। न सा भविष्यति।

विलासः प्रथममेवं स्तम्भितोऽभूत्, यत्तस्य मुखाद् वागेव सहसा न निर्ययौ, पश्चादाह, मया ज्ञातुमिष्यते, त्वं परमार्थतो ब्राह्मरमणी न वेति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीव्रेणाघातेनेव चकिता विजया मुखमुत्तोल्यावालोकयत्; परं निमेष-मात्रेणाऽऽत्मानं संयम्य केवलमाह, भवनतः शान्तेन चेतसा प्रत्यावृत्ते भवति पश्चादालापो भविष्यति—तिष्ठत्विदानीम्। इत्युक्त्वैवोत्थातुमुपाक्रामत्। परं भृत्यं 'चा' इत्यस्योपकरणमादायागच्छन्तमवलोक्य पुनरुपाविशत्। विलासस्तस्यां दिशि दृक्पातमात्रं नाकरोत्। ब्राह्मसमाजान्तर्निविष्टोऽपि स स्वं व्यवहारं सुसंयतं भद्रोचितञ्च कर्त्तुं नाभ्यस्यत्;—स भृत्यस्य समक्षमेवोद्धतेन कण्ठेनाह, वयं तव सम्बन्धम् एकान्ततो हातुमर्हमेति ज्ञायते?

विजया नीरवा 'चा' संपादयन्त्यासीत्, किमप्युत्तरं न प्रत्यपादयत्। भृत्ये प्रस्थिते शनैराह, सा नामालोचना मया पितृव्येन सह करिष्यते, न भवता। इत्युक्त्वा 'चा'-गह्वकं तदभिमुखं प्रासारयत्।

विलासस्तदस्पृष्ट्वैव तस्यैव वचसः पुनरुक्तिं विधायाह, अस्माभिस्तव सम्बन्धे परित्यक्ते किं भवेत्, अपि ज्ञायते?

विजया प्राह, नहि। परं स यद् भवतु, यतो भवतो दायबोध एवं महान्, ततः, अनिच्छन्त्यां मयि येषां निमन्त्रणं विधायावमाननाया भारं गृहीतवानसि, तेषां भारः स्वयमेव भवतोह्यताम्, नाहमंशग्रहणायानु-रोद्धव्या।

विलासश्चक्षुषी प्रदीप्य तारस्वरेणाह, अहं कर्मकुशलः कर्मणैव प्रीये, न क्रीडयेति मनसि निधीयतां विजये।

विजया स्वाभाविकेन शान्तेन कण्ठेन प्रत्यौत्तरयत्, बाढम्, तन्मया न विस्मरिष्यते।

एतदन्तरा यत् किलौपहासिकमासीत् तद् विलासविहारिणमेकान्तत उन्मादं चकार। स प्रायेण सचीत्कारमाह, अस्तु, यथा न प्रस्मरिष्यसि तथाहं द्रक्ष्यामि।

विजयाऽस्य प्रत्युत्तरं नाकरोत्, अवनतमुखी नीरवा 'चा' पात्रमन्त-र्दर्विकां निमज्जयन्त्यान्दोलयितुं प्रवृत्ता। तां तूष्णीं स्थितामवलोक्य विलासः स्वयमपि क्षणं नीरव आत्मानं कथञ्चन संयतं विधायापृच्छत्, अस्तु, एवं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्हि एतावद् बृहद् भवनं कस्मिन् कर्मण्युपयोक्ष्यत इति श्रूयतां तावद-स्माभिः ? न तावदिदम् अनर्थकं रक्षितव्यम् ।

अवसरेऽस्मिन् विजया मुखमुन्नमय्यापश्यत, अविचलदृढमाह च, नहि। परम्, भवनमिदं ग्रहीतव्यमेवेति नेदानीमपि स्थिरमभूत् ।

उत्तरं निशम्य विलासः क्रोधेनात्मविस्मृतोऽभूत् । चरणेन क्षितिमाहत्य पुनरुच्चैराक्रोशत् अभूदेव, शतकृत्वः [ब्रवीमि] स्थिरमभूत्। अहं समाजस्य मान्यान् जनानाहूयावमतान् कर्तुं नार्हेयम्—भवनमिद-मस्माभिर्ग्राह्यमेव । एतन्मया सम्पाद्यैव विरंस्यते—एतन्मया त्वाम् अद्य ज्ञापयित्वा गम्यते । इत्युक्त्वाऽनपेक्ष्यैव प्रत्युत्तरं द्रुतं गृहाद् बहिरयासीत्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानार्थसंग्रहः

(पूर्वानुवृत्तिः)

लक्ष्मीः श्रीशोभासम्पत्सु लोहितं कुङ्कुमासृजोः ।
लूता *पिपीलिकोर्णायोर्लालसौत्सुक्य-याचनयाः ॥५६१॥

[व]

वार्त्ता †वृन्ताक उदन्ते कृष्यादिषु च वर्त्तने ।
वार्त्तमारोग्यनिःसारवृत्तिशालिषु नीरुजि ॥५६२॥
वर्णो यशसि विप्रादौ गुणाक्षरकुथासु च ।
शुक्लादिस्तुतिभेदेषु चित्रे रूपे विलेपने ॥५६३॥
वरो जामातरि श्रेष्ठे देवादेर्वाञ्छिते वृतौ ।
वरी मता शतावर्यां वरमल्पेप्सितेऽव्ययम् ॥५६४॥
वशा वन्ध्यगवीपुत्र्योः‡ करिणी-योषितोरपि ।
वशः प्रभुत्व आयत्त(?) अभिलाषे च कथ्यते ॥५६५॥
विषयिध्वनिरुद्दिष्टो वैषयिकजने नृपे ।
इन्द्रिये कामभेदे च विषयासक्तपूरुषे ॥५६६॥
विधानं करिकवले विधावभ्यर्चने धने ।
चेतनायामुपाये च कथ्यते वैरभेदयोः ॥५६७॥
वृषा मूषिकपर्णान्तु वृषः स्याद्वृषभौषधौ ।
धर्मप्रभेदराश्योश्च श्रेष्ठाम्बुगोषु शुक्रले ॥५६८॥
व्यसनं पापरागादिदैवानिष्टफलेषु च ।
विपत्तावशुभे सक्तौ विधुः केशव-चन्द्रयोः ॥५६९॥

---

* पिप्पदलिका—आ०   † वर्तन—आ०
‡ सुख्योः—आ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनीतो वाणिजे क्षिप्रे निभृते विजितेन्द्रिये ।
विनयश्चापि दृष्टश्च वृष्णिर्यादव-मेषयोः ॥५७०॥
वसुर्योक्त्रेऽग्नौ शुष्केऽशौ *नृप-मण्योः सुरान्तरे ।
विवशोऽवशप्रकृतावरिष्टे दुष्टधीगुणे ॥५७१॥
वामनः केशवे खर्वे दृश्यते दिग्गजान्तरे ।
विद्रुमः स्यात् किशलये प्रवालमणि-भूरुहोः ॥५७२॥
व्यूढो विशाले विन्यस्ते संहतेऽपि प्रयुज्यते ।
वरिष्ठः स्याद् गुरुतमे तथा वत्से च दृश्यते ॥५७३॥
विच्छिन्नस्तु समालब्धे कथ्यते च द्विधाकृते ।
वर्त्तिर्दीपदशायान्तु दीपे गात्रानुलेपने ॥५७४॥
वारुणी (?) सिन्धौ चित्राश्वे पर्णजीवे च विद्विषि ।
वामिलो दाम्भिके वामे वृषाकपिः शिवे हरौ ॥५७५॥
विकारो रुजि विकृता विभुः परिवृढे दृढे ।
वृद्धिर्वर्द्धन आनन्दे वेधा विधि-मनीषिणोः ॥५७६॥
वपुः शस्ताकृतौ काये वञ्चकः फेरु-धूर्त्तयोः ।
वर्षाभूर्भेकशोथघ्न्योर्वृद्धः स्थविर-धीमतोः ॥५७७॥
विवस्वान् मनौ सूर्ये [च]बीजं रेतसि कारणे ।
विस्तारो विस्तृतौ स्तम्बे विकाशो विजने स्फुटे ॥५७८॥
व्यवायोऽन्तर्द्धि-रतयोर्वहो गोस्कन्ध-वाहयोः ।
व्युष्टिः समृद्धि-फलयोर्विशदो व्यक्त-शुक्लयोः ॥५७९॥
वीरुद् विटप-लतयोर्वापा विव-मेहयोः (?) ।
......व्यापृते गाढे वीचिः स्तोभ-तरङ्गयोः ॥५८०॥
वृषाकपायी श्री-गौर्योर्बिन्दुर्ज्ञातरि विप्रुषि ।
वारुणी च सुराऽप्राच्योर्विभावसुः शुचौ रवौ ॥५८१॥

---

* वह्नौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विकटं पृथौ कराले विष्कम्भः स्तृतिरोधयोः ।
विशुद्धं निभृते सत्ये वृषभः पुङ्गवे वृषे ॥५८२॥
विगतो निष्प्रभे वीते बुधः सौम्ये कवौ सुरे ।
व्यालो व्याघ्रे खले सर्पे विस्मयश्चित्र-दर्पयोः ॥५८३॥
वाहिनी पृतना-नद्योर्वेल्लितं कुटिले धुते ।
वर्द्धनं छेदने वृद्धौ वीरस्तु सुभटे वरे ॥५८४॥
विन्नं विचारिते लब्धे विट् च मानुष-वैश्ययोः ।
विलग्नो लग्ने मध्ये च व्यायामः पौरुषे श्रमे ॥५८५॥
विश्वाख्या विश्वा-जगतोर्व्यक्तः स्फुटे च परिडते ।
विशारदो बुधे श्रेष्ठे विवरं दोष-रन्ध्रयोः ॥५८६॥
वैदेही सीता-पिप्पल्योर्व्यग्रो व्यापृत आकुले ।
विकृतो रुजि बीभत्से वर्जनं त्याग-हिंसयोः ॥५८७॥
वर्त्म नेत्रच्छदे मार्गे बाष्प ऊष्मणि चाश्रुणि ।
विरोचनोऽर्के चन्द्राग्न्योर्वदान्यो दातृ-वाग्मिनोः ॥५८८॥
वाग्योनिर्वेदनोकल्ये वैशाखो मास-मन्थयोः ।
विश्लेषो विदूरेऽयोगे वरीयान् विपुले वरे ॥५८९॥
वद्धे रूपेऽपि विद्वासो वनं कानन-नीरयोः ।
विष्वक्सेनाख्या फलिन्यां विष्णौ प्रस्थान-वर्गयोः ॥५९०॥
व्यूहो वृन्दे वलन्यासे वज्रं हीरक-शस्त्रयोः ।
विक्रमोऽतिशक्तिक्रान्त्योर्वीर्यं वत्सेऽंशु-रेतसोः ॥५९१॥

[श]

शृङ्गं विषाणेऽम्बुयन्त्रे पर्वताग्र-प्रभुत्वयोः ।
शृङ्गी चातिविषा-मीनभेदयोर्वृषभौषधौ ॥५९२॥
शिवं भद्रे शिवः शम्भौ कीले शिवा तु जम्बुके ।
नद्यां गौर्यां शमी-धात्वयोः शुद्धः केवल-पूतयोः ॥५९३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेयः शिवे प्रशस्ते च धर्मे चातिशयेऽपि च ।
श्रेयसी गजपिप्पल्यामभया-पाठयोरपि ॥५९४॥
शम्बरश्च जले दृष्टं मृग-दैत्यविशेषयोः ।
शम्बरो मूषिकपर्णी शैलूषो नट-विल्वयोः ॥५९५॥
शिखा शाखाशिफाग्रेषु चूडा-प्रवालयोरपि ।
ज्वालायां वर्हिचूडायां शिलीमुखोऽलि-वाणयोः ॥५९६॥
शुचिः शुद्धाग्निशुक्रेषु तथाषाढेऽनुपद्रुते ।
उपधाशुद्धसचिवे शापः शपथ-निन्दयोः ॥५९७॥
शेषोऽनन्ते गजे नागे स्वीकृतेतरवस्तुनि ।
शेषा निर्माल्यदाने च शितिर्धवल-कृष्णयोः ॥५९८॥
शिखरं पक्वदाडिम्ववीजाभरत्नखण्डके ।
अग्र-शकलयोश्चापि श्रीर्लक्ष्म्यां कान्ति-सम्पदोः ॥५९९॥
शिरो मूर्ध्नि पुरःसैन्ये प्रधाने चापि दृश्यते ।
शुक्रोऽग्नौ भार्गवे ज्यैष्ठे शुक्रमक्षिरुजीन्द्रिये ॥६००॥
श्लेष्मघ्नी स्यान्मल्लिकायां केतक्यामपि दृश्यते ।
शिखी हुताशने वृक्षे मयूरे कुक्कुटेऽपि च ॥६०१॥
शङ्खो निधौ नागभेदे शंखं कम्बु-ललाटयोः ।
शारदोऽभिनवे वर्षे शालीनेऽपि शरद्भवे ॥६०२॥
शोणो रक्तवर्णाभे लोहिताश्वे नदान्तरे ।
शिपिविष्टः खलतिके दुश्चर्मणि महेश्वरे ॥६०३॥
शिलीन्ध्रो वृक्षभेदेऽपि मत्स्ये कंचुलिका-मृदोः ।
श्रेणिः समानजातीनां संहतावावलौ तथा ॥६०४॥
शर्करी मेखलायां स्यान्नदी-च्छन्दोविशेषयोः ।
शर्करोपलरुग्भेद-कुम्भादिशकलेषु च ॥६०५॥
शतह्रदाख्या शाल्मल्यां देश-विद्युद्विशेषयोः ।
शीतं तुषार-वानीर-वहुवारद्रुमेषु च ॥६०६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशुमारः पयोजन्तौ तारकामयकेशवे ।
शय्या ग्रन्थस्य निर्माणे खट्वादिशयनीयके ॥६०७॥
शालावृकस्तु *फेरवे वलीमुख-शुनोरपि ।
शुश्रूषा श्रोतुमिच्छायां स्यात् कथा-परिचर्ययोः ॥६०८॥
शतपत्राख्याऽब्ज-केकि-दार्वाघाटेषु सारसे ।
श्यामः कृष्णे श्यामा रात्रौ शारिवायां फली-विशोः ॥६०९॥
शृङ्गारः कविभूषायां नाट्यस्य च रसान्तरे ।
शुण्डा सलिलहस्तिन्यां मदिरा-हस्तिहस्तयोः ॥६१०॥
शङ्कुः शस्त्रान्तरे कीले यादः-संख्याविशेषयोः ।
शिशुकः शिशुमारे च बाल-द्रुमविशेषयोः ॥६११॥
शाम्बस्तु मुषलाग्रे च लौहे वज्रे च विष्णुजे ।
शरणं गृह-रक्षित्रोर्मारणे रक्षणेऽपि च ॥६१२॥
शरपाणिः शरमुखे †पदाति-शरजीविनोः ।
शार्ङ्गः शृङ्गस्य कोदण्डे चापे विष्णुशरासने ॥६१३॥
शुषिरं वंशादिवाद्ये गर्त्ते गर्त्तसमन्विते ।
शाला तरुस्कन्धशाखा-गृहैकदेशयोर्गृहे ॥६१४॥
शौण्डपणिकश्चौरे स्यादौखितासनिकेऽपि च ।
शुल्को घट्टे विवाहाय वरग्राह्यधनेऽपि च ॥६१५॥
शक्तिरायुधभेदे स्यादुत्साहादौ बले तथा ।
शीतचम्पकशब्दोऽयं दीप-तर्पणयोर्मतः ॥६१६॥
शुद्धान्तोऽन्तःपुरे गुह्ये कक्ष्याभेदे च भूपतेः ।
शिला द्वाराधरस्तम्भ-दृषदोः शीलमुञ्छके ॥६१७॥
शक्वरं छन्दसि ज्ञेयं शक्वरो वृषभे मतः ।
श्राद्धः श्रद्धावति श्राद्धं शास्त्रतः पितृकर्मणि ॥६१८॥

---

* क्रूरारे † पापिष्ट

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्तिर्दुर्नामिका-मुक्तास्फोटयोरश्वलक्षणे ।
शकुनो विहगे गीतः शकुनं फललक्षणे ॥६१९॥
श्रवणः श्रुते नक्षत्रे श्रवणं श्रुति-कर्णयोः ।
शालाख्या मदनतरौ काण्डे श्वाविच्छलाकयोः ॥६२०॥
शासनं शास्त्र आज्ञायां लेखेऽपि परिभाषितम् ।
शारिरक्षोपकरणतपर्याणयक्षिदयोः (?) ॥६२१॥
शिशिरं शीतले।दृष्टमृतुभेद-तुषारयोः ।
शाखा वेदविभागे च तरोरवयवे भुजे ॥६२२॥
शशी वोले च पुंभेदे दृष्टः प्राण्यन्तरेऽपि च ।
शल्कस्तु वल्कले खड्गे शक्रः कुटज-वज्रिणोः ॥६२३॥
शारः स्याच्छबले वायौ शमनाख्या वधे यमे ।
श्रुतिः श्रोत्रे च वेदे च शुक्तं शर्मणि निष्ठुरे ॥६२४॥
शकलं वन्धनेऽर्द्धे च शादः कर्दम-शष्पयोः ।
श्रीपर्णमग्निमन्थेऽब्जे शंसा वचसि वाञ्छिते ॥६२५॥
शरत्त्वन्तरे वर्षे शूलो रुक्-शस्त्रभेदयोः ।
श्वशुर्यो देवरे श्याले शिखण्डो बर्हि-चूडयोः ॥६२६॥
शाको द्वीपान्तरे शिग्रौ श्वेतस्तु रजते सिते ।
शास्त्रमागम आज्ञायां शान्तिरुक्ता शमे शुभे ॥६२७॥
शङ्का त्रासे वितर्के च श्रद्धा श्रद्धालु-काङ्क्षयोः ।
शीलं प्रकृतौ सद्वृत्ते शयनं रत-शय्ययोः ॥६२८॥
शस्त्रं प्रहरणे लोहे श्लोकः पद्ये यशस्यपि ।
शाणः कषे मानभेदे शुकोऽनुग्रह-शोकयोः ॥६२९॥
शुभ्रं शुक्ले प्रदीप्ते च शमः शान्तौ निवर्त्तने ।
श्येनो विहङ्गमे श्वेते शुषः शोषे तथा विले ॥६३०॥
शुकाख्या कीरे स्थौणेये शास्ता ब्रह्मार्हतोः शिवे ।
श्रीफलाख्या विल्वे नील्यां शिखरी द्रुम-शैलयोः ॥६३१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[ष]

षण्डः स्मृतो बलीवर्दे षण्डं तु कानने भवेत् ।
षण्डाली तैलमाने च सरस्यामपि कीर्त्तिता ॥६३२॥

[स]

साधनं दापने सिद्धौ धनोपायनिवृत्तिषु ।
मोहने मृतसंस्कारे गतावनुगमे जवे ॥६३३॥
स्यात् संसरणं संसारे नगरस्योपविक्रमे* ।
रथादीनाञ्च संकीर्णगमने संसृतावपि । ६३४॥
संविद् बुद्धौ प्रतिज्ञायामाचारे नाम्नि तोषणे ।
सम्भाषणे क्रियाकारे सङ्केत-ज्ञानयोरपि ॥६३५॥
सरस्वती स्यात् स्त्रीरत्ने नद्यां नद्यन्तरे गवि ।
भारत्यान्तु रसज्ञायां वचः-सागरयोरपि ॥६३६॥
समयः शपथाचारसिद्धान्तेषु च सम्पदि ।
क्रियाकारेऽथ निर्देशे सङ्केते काल-भावयोः ॥६३७॥
सत्त्वं द्रव्ये चात्मभावे व्यवसाय-स्वभावयोः ।
पिशाचादौ गुणे प्राणे बले जन्तौ च रेतसि ॥६३८॥
सङ्करः संश्रवे युद्धे क्रियाकारे तथापदि ।
सङ्करं वृषभेदे तु दृश्यते च शमीफले ॥६३९॥
स्थपतिः सौविदल्ले स्याद् बृहस्पतीष्ट्याजिषु ।
धनदे शिल्पिभेदे च स्तननं क्रन्दने ध्वनौ ॥६४०॥
सम्भवो मेलके हेतौ सङ्केतापाययोरपि ।
आधाराधेयतुल्यार्थे सम्बोधो बोध-नाशयोः ॥६४१॥
सैरिन्ध्री परवेश्मस्थास्वतन्त्रशिल्पियोषिति ।
वर्णसङ्करजातायां स्वामी पति-विशाखयोः ॥६४२॥

---

* निर्दमे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फुटो व्यक्ते विकसिते व्याप्ते शुक्लेऽपि दृश्यते ।
समूढः पुञ्जिते भुमे सद्योजाते निरुत्प्लुते ॥६४३॥
सङ्कुलाख्या भवेद् व्याप्तौ युद्धविस्पष्टवाक्ययोः ।
सूनृतं स्यात् प्रियसत्ये वचने मङ्गले तथा ॥६४४॥
सुमनाः पण्डिते पुष्पे मालती-देवयोरपि ।
सम्भ्रमो भयसंवेगगौरवेषु महाश्रमे ॥६४५॥
सूत्रे च सूचना दृष्टौ व्यवधाने नये तथा ।
सौम्यः सोमात्मजे चारौ कथितः सोमदैवते ॥६४६॥
सुरभिर्गवि चैत्रे च सुगन्धे घ्राणतर्पणे ।
सार्वभौमो दिशो नागभेदे सर्वमहीभुजि ॥६४७॥
समुन्नद्धो गर्विते च पण्डितम्मन्य ईश्वरे ।
सन्धिनामानदीमध्यस्तरङ्गासु च कथ्यते ।६४८॥
साधृतं वर्हिसंघाते पण्यवीथ्यां च पत्नके ।
समुदायः समूहे स्यात् समरे च समुद्गमे ॥६४९॥
सालः सर्जतरौ वृक्षे प्राकारेऽपि प्रयुज्यते ।
स्पर्शो दाने रुजायाञ्च स्पर्शके स्पर्शने तथा ॥६५०॥
संज्ञा सङ्केत-गायत्री-चेतनासु च नामनि ।
सिन्धुर्नदे समुद्रे च मददेशनदीषु च ॥६५१॥
सर्गो निश्चये निर्माणे प्रोत्साहाध्याययोरपि ।
सौदामिनी पुरीभेदे चञ्चलायां प्रकीर्त्तिता ॥६५२॥
समाह्वयः समाख्याते युद्धे च पशुपक्षिभिः ।
सरकं सीधुपानेक्षुसीधुनोर्मद्यभाजने ॥६५३॥
सम्बन्धः समृद्धौ शक्ते हिते न्याये च कथ्यते ।
स्कन्धो महीपतावंशे समुच्चये च संहतौ ॥६५४॥
सम्पुटस्तु कुरुवके तलिकायाञ्च कीर्त्तितः ।
सन्धिः संघट्टने दृष्टः स्मरस्तम्भ-सुरङ्गयोः ॥६५५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्पर्शनः पवने दृष्टः स्पर्शनं स्पर्श-दानयोः ।
भवेत् **सुरततालो** तु दूतिकायां शिरःस्रजि ॥६५६॥
सामुद्रन्तु समुद्रोत्थे कथितं देहलक्षणे ।
सूनाख्या पुष्पिते पुष्पे जिह्वातले वधालये ॥६५७॥
संवित्तिरविवादित्वे प्रतिपत्तावपि स्मृता ।
सम्परायः स्मृतो युद्धे विपदुत्तरकालयोः ॥६५८॥
संस्थानमाकृतौ चिह्ने सन्निवेशे चतुष्पथे
सन्तानः सन्ततौ गोत्रे देववृक्षे तथात्मजे ॥६५९॥
संस्त्यायः सन्निवेशे तु संघातेऽपि प्रयुज्यते ।
साधीयोऽत्यथवार्ढ *स्यात् तथैवात्यन्तशोभने ॥६६०॥
साधुर्वार्द्धषिके दृष्टः सज्जने सुन्दरे तथा ।
समितिः सङ्गमे युद्धे सभायामपि दृश्यते ॥६६१॥
सिकता वालुकायान्तु तथैवाच्छन्नभूतले ।
खयाम्बुनोरसराजे प्रासाद-वासुदेवयोः ॥६६२॥
सिद्धरसः पारदेऽपि रससिद्धे च कीर्त्तितः ।
सह्यमारोग्यसोढव्ये सह्यश्च पर्वतान्तरे ॥६६३॥
समञ्जसं समाख्यातमभ्यस्तोचितयोरपि ।
सूदः स्यात् सह **सूपेन** सूपकारे च जेमने ॥६६४॥
सारथ्या चापराधे च लोध्रे पापे च पठ्यते ।
संकीर्णः सङ्कटे व्याप्ते तथा च वर्णसङ्करे ॥६६५॥
स्वशब्दो ज्ञाति-धनयोः तथात्मात्मीययोरपि ।
संग्रहः स्याद् महोद्रङ्गे† संक्षेपे ग्रहणे तथा ॥६६६॥
भवेत् **सारसनं** काञ्चयामुरस्त्रे च निगद्यते ।
स्थासकोऽपि च चर्चायां जलादीनां च बुद्बुदे ॥६६७॥

---

* अभ्यर्थे वारिस्यात्

† बृहदुद्रङ्गे इति हैमः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मतिः स्यादभिलाषे तथाऽनुज्ञान एव च ।
साहसन्तु बलात्कारकृतकार्ये दमेऽपि च ॥६६८॥
सितं प्राप्तावसाने च तथा धवल-बद्धयोः ।
स्थिरदंष्ट्रध्वनिः ख्यातो भुजङ्गादि-वराहयोः ॥६६९॥
स्वस्तिको नृपतेर्गेहे गृहभेदे चतुष्पथे ।
सुदर्शनो मेरुजबां शक्रपूर्विष्णुचक्रयोः ॥६७०॥
समुदायः समुदये पृष्ठस्थायिबलेऽपि च ।
स्थूलोच्चयस्त्वसाकल्ये करिमध्यगतौ तथा ॥६७१॥
सूतः शूद्रात् क्षत्रियाजे वन्दिसारथितक्षसु ।
सत्रं वने सदा दाने च्छदनाध्वरयोरपि ॥६७२॥
सवनं याजने स्नाने सोमनिर्दलनेऽपि च ।
सत् सत्ये विद्यमाने च प्रशस्तार्चितसाधुषु ॥६७३॥
समाहितं समाधिस्थे प्रतिज्ञाते च विश्रुते ।
समाधिर्नियमे ध्याने समासे चापि युज्यते ॥६७४॥
सुधा गङ्गेष्टका चूर्णा महीध्वमृतमूलयोः ।
सभा स्यान्मन्दिरे व्यूहे सभासदि च संसदि ॥६७५॥
सारङ्गश्चातके ख्यातः शबले हरिणे तथा ।
सृष्टं भूविणिमुक्ते च निर्मिते चाथ भूषिते ॥६७६॥
समर्यादं समीपे स्यात् मर्यादासहिते तथा ।
सन्धिन्यकालदुग्धायां वृषाक्रान्तावपातयोः ॥६७७॥
सन्निधिः सन्निधानेऽपि प्रत्यक्षेऽपि प्रयुज्यते ।
सर्वतोभद्राख्या निम्बे गम्भारी-गृहभेदयोः ॥६७८॥
सहा स्यात् कुमारीमुद्गपर्ण्योः सहः सशक्तिके ।
संख्यमायोधने संख्या त्वेकत्वादि-विचारयोः ॥६७९॥
समिवल्कस्तु धवलखादिरे कट्फले तथा ।
सारो न्याय्ये स्थिरांशे च बले श्रेष्ठे च भाषितः ॥६८०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ततिस्तनये पुत्र्यां विस्तार-कुलयोरपि ।
समं सदृशि सर्वस्मिन् साधौ समास्तु हायने ॥६८१॥
सूनुर्भ्रातरि पुत्रे च सम्भोगः सुख-भोगयोः ।
सुपर्णस्तार्क्ष्ये पत्रेऽर्के स्वेदः स्वेदन-घर्मयोः ॥६८२॥
स्तनयित्नुः स्तनितेऽब्दे समापनं वधान्तयोः ।
संसिद्धिः स्वभावे सिद्धौ सातिर्दानावसानयोः ॥६८३॥
स्थिरा भूमौ शालपर्ण्यां स्थूलो जडेऽथ पीवरे ।
सचिवः सहायेऽमात्ये सेव्यो नलद-शस्ययोः ॥६८४॥
सोमः स्यादोषधाविन्दौ सरणिः पंक्ति-मार्गयोः ।
समीरणोऽनिलौषध्योः सुतः पार्थिव-पुत्रयोः ॥६८५॥
सती शैलसुता-साध्व्योः सायकः खड्ग-बाणयोः ।
सनातनो हरौ नित्ये सव्यं वामे च दक्षिणे ॥६८६॥
स्नेहः प्रेमणि तैलादौ संप्रयोगो रतेऽन्वितौ ।
स्वभूर्वेधसि विष्णौ च स्वादुर्मिष्ट-मनोज्ञयोः ॥६८७॥
स्तिमितो निश्चिते क्लिन्ने संव्यानं छदनेऽंशुके ।
स्नानं वसने पानीये समाघातो वधे युधि ॥६८८॥
सैन्धवो लवणेऽश्वे च स्तम्भनो जड-मूर्खयोः ।
सौवीरं काञ्जिके शैलौ सूक्ष्माख्याध्यात्म-लेशयोः ॥६८९॥
संस्कारः सङ्कल्पे यत्ने सेवकोऽर्थ-प्रसेवयोः ।
संघर्षो घर्षे स्पर्द्धायां सप्तार्चिर्दहनेऽशनौ ॥६९०॥
संस्तरः प्रस्तरे यज्ञे सीमा क्षेत्रेऽवधौ स्थितौ ।
सम्बाधः सङ्कटे योनौ सेनानीः सैन्यगे गुहे ॥६९१॥
गुणोत्कर्षे विधातव्यं स्थानं साम्येऽन्तरे स्थितौ ।
संस्था स्थितौ विनाशे च स्वैरः स्वच्छन्द-मन्दयोः ॥६९२॥
सिक्थाख्याऽन्ने मधूच्छिष्टे सूतकं रस-जन्मनोः ।
स्थित ऊर्ध्वे सप्रतिज्ञे सिद्धार्थः सर्षपेऽजिने ॥६९३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुवर्णं हेम्नि तत्कर्षे सत्यं शपथ-तथ्ययोः ।
सहोत्थे सहजः सृष्टौ सामधेनीयमिष्यचि ॥६६४॥
सामजो द्विपे सामोत्थे सहा मार्गे सहो बले ।
सेवनं सीवनोपास्त्योः सृतिर्गमन-मार्गयोः ॥६६५॥
संस्तरः शयने यागे सारसाख्या खगेऽम्बुजे ।
स्थूणा सूर्म्यां तथा स्तम्भे सादी सूताश्ववारयोः ॥६६६
सत्तमोऽतिसाधौ श्रेष्ठे स्वरुर्यूपाग्र-वज्रयोः ।
रेवानद्यो समुद्रायः सज्जनः साधु-गुल्मयोः ॥६६७॥
स्वरूपो रूपिणि प्राज्ञे सखा मित्र-सहाययोः ।
स्वप्नः स्वापे सुप्तज्ञाने स्यन्दनस्तिनिशे रथे ॥६६८॥
स्थानेऽव्ययं युक्ते हेतौ स्मातीते पादपूरणे ।
साम्प्रतं युक्तेऽवधानार्थे स्वः स्वर्ग-परलोकयोः ॥६६९॥
स्वित् पृच्छायां वितर्के च साक्षात् तुल्य-समक्षयोः ।
समि निन्दायां युद्धे च सह च तुल्य-योगयोः ॥७००॥
स्वस्त्या श्रीःक्षेमपुण्येषु सकृत सैवहकारयोः ।

[ह]

हरिः सिंहार्कभेकेषु शुके विष्णौ यमेऽनिले ॥७०१॥
इन्द्रे चन्द्रे कपावीशे स्वर्गवर्णाहिवाजिषु ।
हंसो निर्लोभे भूपाले भास्करे विहगान्तरे ॥७०२॥
योगिभेदे विशुद्धे च श्रेष्ठे राजादिपूर्वकः ।
हृषितः सह हृष्टेन जातहर्षेऽथ विस्मिते ॥७०३॥
मनोहरे च रोमाञ्चे हेतिः शस्त्रे तथार्चिषि ।
हिरणश्च हिरण्यश्च स्यादकुप्ये कपर्दके ॥७०४॥
धान्यमानान्तरे हेम्नि ह्रादिनी पवि-विद्युतोः ।
हृद्यं प्रिये हृतदार्ते वशमन्त्रे च हृद्यके ॥७०५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेरम्बो गजवक्त्रे च महिषे प्रमथान्तरे ।
हस्तिमल्ल इति ख्यातः शक्रनागे विनायके ॥७०६॥
हायनो वत्सरे प्रोक्तस्तथा व्रीहि-मयूखयोः ।
हस्तः शुण्डायां नक्षत्रे करेके शात् परश्वये ॥७०७॥
हिङ्गुनिर्यास उद्दिष्टो निम्बे हिङ्गुरसेऽपि ।
हरिणी हेममये मृगे हरितायामपि क्वचित् ॥७०८॥
हेमलः स्याच्छिलाभेदे स्वर्णकृत्-कृकलाशयोः ।
हरिचन्दनमाख्यातं कुङ्कुमे देवपादपे ॥७०९॥
हरिदश्वान्तरे वर्णे तृणे ककुभि कथ्यते ।
हृदयं वक्षसि स्वान्ते हेलाऽवज्ञा-विलासयोः ॥७१०॥
हैमवत्युमा-वचयोर्हवो हूत्याज्ञयोर्मखे ।
हनू रोगान्तरौषध्योर्हरणं यौतुके हृतौ ॥७११॥
हठस्तु प्रसभे पार्ष्णौ हरिणः पाण्डरे मृगे ।
हविः सर्पिषि होतव्ये हिंसा चौर्यादिके वधे ॥७१२॥
हिमं शीतेऽपि शिशिरे हारो मुक्तावलौ हृतौ ।
अतोऽव्ययानि कथ्यन्ते हन्तशब्दोऽन्तकल्पने ॥७१३॥
वाक्यारम्भे विषादे च हर्षार्थे च प्रयुज्यते ।
हि कारणे विशेषे च तथाऽवधारणेऽपि च ॥७१४॥
हा खेदे शुचि पीडायां हु परिप्रश्न-तर्कयोः ।

[क्ष]

क्षुद्रः क्रूराल्पनीचेषु दीने च क्षुद्रा च स्त्रियाम् ॥७१५॥
व्यङ्गायां कण्टकार्याञ्च नद्यां सरघ-वेश्ययोः ।
क्षेत्रियं क्षेत्रसंहतौ तृणे साध्ये गदे तथा ।
परदेहे चिकित्सार्हे क्षत्रियः पारिदारिके ॥७१६॥
क्ष्वेडा समिद्वीरसिंहनाद-वैणवशल्ययोः ।
क्ष्वेडो विषे निनादे च क्ष्माभृत् पर्वत-भूभुजोः ॥७१७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षमः[शक्ते]हिते युक्ते क्षमा भूमितितिक्षयोः ।
क्षत्राशब्दो क्षत्रियाजे प्रतीहारे च सारथौ ॥७१८॥
क्षणस्तु व्यापृते ज्ञेयो मुहूर्त्तोत्सवपर्वसु ।
क्षेत्रं देहे कलत्रे च केदारे सिद्धधामनि ॥७१६॥
क्षयोऽपचये रोगार्त्तगेहेषु राजयक्ष्मणि ।
क्षेमस्तु कुशले दृष्टस्तथा लब्धार्थरक्षणे ॥७२०॥
क्षवथुः कचित्कासे कण्ठकण्डूयने क्षुति ।

इति श्रीअजयपालकृतौ नानार्थसंग्रहः समाप्तः ॥

[एकमेव पुस्तकं कस्यचन माहस्मदीयस्यापणे क्रय्यमवलोक्य महता मूल्येनोपक्रीय तदेवावलम्ब्य परिषत्पत्रिकायां मुद्रापितमिदम् । परन्तु पुस्तकस्यास्य वङ्गभाषामयस्यापादचूडमशुद्धत्वात् साम्प्रतञ्चास्माकमप्यवकाशाभावादत्र सावशेषत्वमशुद्धीनां प्रत्यक्षीभावमुपयायात् । अग्रहायणसंख्यायामत्रत्याः सर्वा अशुद्धयः प्रदर्शयिष्यन्ते पाठान्तराणि च सन्निवेक्ष्यन्ते। येषां च वाचकमहोदयानां सविधे नानार्थसंग्रहस्य प्रतिलिपयो वर्त्तन्ते तश्चेत् कृपया तद्गतानि पाठान्तराणि प्रदर्श्येरन्, चिराय तेषु कृतज्ञतामुद्वक्ष्यामः। स० सा० प० स०]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहङ्कारस्य परिणामः

[निबन्धकः—श्रीनारायणकाव्यरत्नः]

मथ्नंस्तूर्णं जलधिहृदयं पादपालीं विशृण्वन्
क्ष्माभृच्चूडांश्चपलरभसैः खण्डशः संविभिन्दन्।
तूलस्तोमानिव वनमुचोऽजस्रमभ्रे विलिम्पन्
कल्पाक्षेपोद्धत इव मरुत् प्राचलन्मूर्त्तरुद्रः॥

आस्तां तस्मिन विषमसमये सन्निकर्षोत्थहार्दौ
कान्तारान्ते विहितवसती व्योमचुम्बी रसालः।
नीचैर्देहा धरणिशयना यूथिका चानवद्या
विश्रम्भालापसुखविचये व्यापृतौ तावभूताम्॥

उच्चैःशीर्षा द्रुमगहनणीः सङ्गिनोमाह सद्य-
स्तन्वि स्निग्धे ललितरजनीनाथरम्याङ्गशोभे।
पश्यत्वस्मिन मम पृथुतरे वज्रसारं शरीरे
स्वस्मिन्नङ्गे तव च भवती कौसुमं सौकुमार्यम्॥

मामाश्रित्य व्रततिवनितेऽसंख्यपितसत्नसमूहाः
संतिष्ठन्ते मम तु विटपेष्वात्तनीडान्तगेहाः।
दत्तच्छायासुमधुरफलैस्तर्पयाम्यस्मि पान्थान
मन्यन्ते मां शरणमनिशं मार्गखेदेऽध्वगास्ते॥

झञ्झावातं तडितमशनिं मेघनीरार्कदीप्ती
मूर्द्ध्नयादाय प्रकृतिनियतान् भूतसंघान् सगर्वः।
कालेनाहं जगदविरतध्वंसधात्रा विगृह्णन्
जीवामीत्थं चिरमनुगतान प्रीणयित्वा वनेऽस्मिन्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वाञ्च प्रेक्षे कुसुमविनते सौरभैकप्रभूपे
देहे देहे ललितविवशां का कथोग्रानिलस्य ।
स्रंसन्ते ते मलयमरुतः स्निग्धहस्तावमृष्ट्या
भृङ्गालीनां च मृदुचरणक्षेपणैर्जालकानि ॥

मास्म श्लाघां कुरु तरुपते यूथिका प्रत्यवादीद्
यादृक्षीं मां परमपुरुषः सृष्टवान् स्यां तथैव ।
भ्रान्तोद्भ्रान्तः कथमिव सखे गर्हसे मद्व्यवस्थां
शोकेनालं ननु मम दशां श्रेयसीमेव मन्ये ॥

यावत्तस्या वचनविरतिस्तावदेवोग्ररंहा
हा हा हन्त द्रुमवरममुं मूलतो व्याचकर्ष ।
क्षुब्धो वातः स हि भुवि नता यूथिका नीरुजासी-
दौद्धत्यं स्यान्मरणपिशुनं नम्रता जीवनाय ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

GUṆAVIṢṆU'S

CHĀNDOGYAMANTRABHĀṢYA

A Pre-Sāyaṇa Commentary on Select Vedic Mantras

Edited by

Durgamohan Bhattacharyya, M A.,

Kāvya-Sāṅkhya-Purāṇatīrtha, Senior Professor of Sanskrit, Scottish Church College.

With a Foreword by

Mahamahopadhyaya Dr. Ganganatha Jha, M.A., D.Lit.

Late Vice-Chancellor, Allahabad University

Price—Rs. 3-12-0, For members—Rs. 3-0-0

This edition of an important Vedic work with an elaborate Introduction has been very favourably noticed in the learned Reviews like the *Acta Orientalia, the Annals of the Bhandarkar Oriental Research Institute, the Indian Historical Quarterly and the Journal of the Royal Asiatic Society.* It has been highly spoken of by Professors F. W. Thomas, A. B. Keith, M. Winternitz and W. Caland.

Extracts from Reviews and Opinions

FOREWORD

Dr. Gangunath Jha:......This desideratum of the modern scholar is supplied by the present edition of 'Guṇaviṣṇu.' It contains the text...and also a 'Preface,' an 'Introduction' and alphabetical index of Mantras occurring in the text, a list of the *Viniyogas* not occurring in the text itself, but culled from the Gṛhyasūtras and other sources, and an appendix at the end giving the original sources of the Mantras. The Introduction contains all the information that is available, and it is precious little, regarding the author. It is of use to the general Vedic scholar also who is interested in the explanation of Mantra-texts, specially because, explanations of texts herein contained are, according to our editor, older than Sāyaṇa, who is found to have referred to these explanations.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Chāndogyamantrabhāṣya

Reviews

Acta Orientalia, Vol. IX, part iv

Prof. Sten Konow......Mr. Bhattacharyya's edition is careful and his Introduction sound and critical. As there seems to be reason for assuming that Guṇaviṣṇu is older than Sāyaṇa, his commentary deserves serious attention, and the new edition will be welcome to Vedic scholars.

Annals of the Bhandarkar Oriental Research Institute, Vol. XIV, pts. I and II.

Dr. S. N. Pradhan......With the help of various materials detailed in his Introduction he has been able to settle the true text of the commentary which in several places seemed to be hopelessly corrupt. The Introduction contains a valuable account of the work and the author Guṇaviṣṇu. The data have been gathered not only from the printed texts but also from a number of manuscripts.........The most notable feature of the present edition is the number of Indices and Appendices.........To the alphabetical index of the Mantras occurring in the text, a very useful list of the 'Viniyogas' of every Mantra has been added, and a concordance of the Mantras covering more than thirty pages together with a list of quotations contained in the body of the work has been appended. In this concordance the editor has not merely used the *Vedic Concordance* of Bloomfield, but has sometimes corrected it, and what is more important, he has adduced readings from four new works that had not been used by Bloomfield.

Indian Historical Quarterly, Vol. VI, No. 4

Mahamahopadhyaya Dr. Haraprasad Sastri:...It has the excellences of a commentary clear, concise, expressive and lucid. The editor has dealt in his Introduction with various topics relating to the work and the author, *e.g.*, the sources of the Mantras commented upon by Guṇaviṣṇu, the relation of the *Chāndogyamantrabhāṣya* to the *Mantrabrāhmaṇa* and the *Gobhilagṛhyasūtra*, the birthplace of Guṇaviṣṇu, his date, his works, the nature of his commentary and so on. The editor's work has been done with great care, accuracy and thought.

Journal of the Royal Asiatic Society, Jan., 1932

Dr. W. Stede: . . . . It deserves attention and credit because we here find some explanations of Vedic passages which are older than and referred to by Sāyaṇa. Pandit D. Bhattacharyya has indeed produced a useful edition which may be recommended as a text book on account of its compactness and handy arrangement.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

संस्कृतसाहित्यपरिषत्

Vol. XIX, No. 6] [October, 1936.

१८५८ शकाब्दे आश्विने १९श-वर्षस्य ६ष्ठ-संख्या

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्

श्यामबाजार, कलिकाता। Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ভাষারত্নম্

(শ্রীকণাদতর্কবাগীশ-প্রণীতো নব্যন্যায়মতসিদ্ধ-পদার্থ-প্রতিপাদকো গ্রন্থঃ)

কলিকাতা-রাজকীয়সংস্কৃতমহাবিদ্যালয়-ন্যায়শাস্ত্রান্যতরাধ্যাপক-

শ্রীযুক্তকালীপদতর্কাচার্য্য-

সম্পাদিতম্

এষ গ্রন্থঃ সরলয়া সরণ্যা তর্কশাস্ত্রপ্রসিদ্ধান্ পদার্থান্ প্রতিপাদয়ন্ সুবহুপ্রাচীনকালাৎ প্রভৃত্যেব পণ্ডিতসমাজে সুবিশ্রুতো লক্ষ্যতে। অত্র পদার্থসিদ্ধৌ সমপেক্ষিতা যুক্তয়ঃ সুগময়া দিশা পরিগৃহীতা, মহান্তমুপকারং জনয়ন্তি তর্কশাস্ত্রং প্রবিবিক্ষতাম্। বিদ্যার্থিনাং সুখেনাবগমায় সম্পাদকমহোদয়েনাত্র সরলা কাচিৎ **টীকাপি** সংযোজিতা। অত্র বিস্তৃতা **বিষয়সূচী** ভূমিকায়াং ন্যায়মতসিদ্ধানেক-**পারিভাষিক-পদার্থবিবৃতিশ্চ** সন্নিবেশিতা, যেন সংস্করণস্যাস্য নিতরামুৎকর্ষঃ সমজনি।

এষ গ্রন্থ ইতঃপূর্ব্বং কদাপি কেনাপি ন প্রকাশিতঃ। অতঃ অপ্রকাশিতপূর্ব্বস্যাস্য গ্রন্থস্য পরমোপাদেয়স্য লাভেন বিদ্যার্থিনঃ অধ্যাপকাশ্চ সুতরামুপকৃতা ভবিষ্যন্তীতি নিঃসংশয়ো বাদঃ।

২৫৪ পৃষ্ঠাত্মকোঽয়ং গ্রন্থঃ সাম্প্রতমেব প্রকাশিতঃ, তৎ সত্বরা ভবন্তু শ্রীমন্তস্তর্কপদার্থবিজ্ঞানরসিকা যেন কালাতিক্রমো নাভিলষিতসিদ্ধিং প্রতিবধ্নীয়াৎ।

মূল্যম্ { সাধারণানাম্—৩॥০
পরিষৎসদস্যানাম্—৩৲

অস্য প্রাপ্তিস্থানম্—

সংস্কৃত-সাহিত্য-পরিষৎ-কার্য্যালয়ঃ

১৭, আর. জি. কর রোড, শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

October, 1936. { १८५८-शकीये आश्विने / १९श-वर्षस्य षष्ठ-संख्या } Vol. XIX No. 6

प्राचीन-शिक्षापद्धतिः

[निबन्धकः—श्रीश्रीराम-शास्त्री]

(३)

प्रश्नः। वत्स ! त्वया उक्तं ते नाम श्रीमधुसूदनदेवशर्मेति। भवतु तावत्, श्रीअमुक-शर्मेत्युक्ते परिचयः किं न भवेत्? अत एव 'शर्मणि' सति 'देवेन' किं प्रयोजनम्?

उत्तरम्। "शर्मा देवश्च (१) विप्रस्य वर्मान्तं (२) क्षत्रियस्य च।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"

---

(१) देवानां शर्म मङ्गलं यस्मात्, यागादिभिरर्थात्।

(२) 'त्रातृवर्मेति भूभुजः' इति पाठान्तरम्। अयमेव पाठः साधीयानित्यस्माभिर्मन्यते, यतः अमुकशर्मा इति नाम यथानर्थकं स्यात्, तथा अमुकवर्मेति। अपि तु देवशर्मा इत्युक्ते यथा देवानां शर्म यस्मादिति सार्थकं भवति, तथा त्रातृवर्मा इत्युक्तेऽपि त्रातरि त्राणकार्ये रक्षणविधौ वर्मा कवचरूपः इति त्रातृजनानां रक्षणशीलं वर्म येषामिति वा नाम्नः स्वरूपतया सार्थक्यं भवति; अत एव अमुकशर्मा अमुकवर्मेति नास्मभ्यं रोचते। आद्ये वर्मशब्दस्य पुंस्त्वम् औपचारिकाः क्वचित् स्वलिङ्गं जहतीति नियमात्, ताच्छीलिक प्रत्ययान्तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नः। नाम्नः प्रथम एव कथं श्रीशब्दः प्रयुज्यते, पश्चात् कथं न दीयते ? अमुकदेवशर्मा श्रीरिति कथं नोच्यते ?

उत्तरम्। "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिपं तथा।
साध्यं सिद्धयधिकारांश्च श्रीपूर्वं समुदीरयेत्॥" (३)

प्रश्नः। वत्स! त्वं तु श्रीभवानीप्रसाद-भट्टाचार्यस्य पुत्र इति कथितवानसि, किन्तावत् तत् पुत्रत्वं ?

उत्तरम्। "पुन्नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा॥"

अपि च

"जीवतो वाक्यपालश्च मृताहे भूरिभोजनम्।
गयायां पिण्डदानञ्च त्रिभिः पुत्रस्य पुत्रता।"

प्रश्नः। एकस्मिन् पुत्रे विद्यमाने एतावत् सम्पन्नं भवति, तत् कथमनेकान् पुत्रान् पिता प्रार्थयते ?

भावाभिधायिता तु सोढव्या। वर्मान्तमिति मूलपाठे वर्मान्तदेवशब्दात्मकं भूभुजो नाम, तथा चामुकदेववर्मेति फलितमित्यस्मदुपदेष्टृचरणाः। अत एव वर्मान्तमित्यत्र वर्मान्त इति सविसर्गः पाठोऽस्मभ्यं रोचते। एवञ्च वर्मान्तो देवः क्षत्रियस्य नामेत्यायाति। नाम्ना सह तथाविध'देव'स्याभेद आर्षत्वान्मर्षयितव्यः।

(३) श्रीपूर्वो देवो, यथा—श्रीदुर्गा। गुरुः—श्रीगुरुः। गुरुस्थानं—श्रीपाठः श्रीनवद्वीपः। क्षेत्रं—श्रीक्षेत्रम्। क्षेत्राधिपः—श्रीपुरुषोत्तमः। साध्यं—स्वेष्टदेवता, श्रीकृष्णः। सिद्धयधिकाराः—सिद्धौ अधिकारः येषां ते सिद्धयधिकाराः तान्। मानवानन्तरा अन्येषां जीवानां सिद्धौ अधिकारो नास्ति, अत एव मनुष्यनाम्नः पूर्वं श्रीर्युज्यते। सिद्धाधिकारांश्चेति पाठे स्वर्गगामित्वादिना सिद्धो निर्णीतोऽधिकारो येषामिति तुल्य एवार्थः। साध्यमित्युक्ते देवतानाम प्राप्यते, यतो देवता हि सर्वेषां साध्या, तत्कथं पुनर्देवशब्दः ? सत्यं, पिशाचयक्षाणामपि उपासको वर्त्तते, अत एव न पौनरुक्त्यापत्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरम् । "एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥"

प्रश्नः । कति पितरो मातरश्च ?

उत्तरम् । पञ्च पितरः, सप्त मातरः ।

प्रश्नः । पञ्च पितरः के के ?

उत्तरम् । अन्नदाता भयत्राता यस्य कन्या विवाहिता ।
जनयितोपनेता च पञ्चैते पितरः स्मृताः ॥

प्रश्नः । सप्त मातरः काः काः ?

उत्तरम् । आत्ममाता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
गवी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥

प्रश्नः । यस्य त्वं पौत्रः, तत्परिचयोऽपि त्वया प्रदत्तः, इदानीं कथय पौत्रत्वं किम् ?

उत्तरम् । पुत्रस्यापत्यत्वं पौत्रत्वम् । पुत्रस्य पुत्रः पौत्र इति ।

प्रश्नः । त्वया अपत्यमिति यदभिहितं, तदपत्यं किम् ?

उत्तरम् । न पतति वंशो येन जातेन तदपत्यम् ।

प्रश्नः । साधूक्तं श्रीमता, अतः परं कथय प्रपौत्रत्वं किम् ?

उत्तरम् । पौत्रस्यापत्यत्वं प्रपौत्रत्वम् ।

इतः पूर्वं पिता बालकस्य नातामहादीनां नाम तमशिक्षयत्, इदानीं प्रश्नपूर्वकं तत सुष्ठुतया स्पष्टयति—त्वं कस्य दौहित्रः ? बालकः मातामहस्य नाम कथयति । इत्थं कस्य प्रदौहित्रः, कस्य वृद्धप्रदौहित्रो वा इत्यपि जिज्ञासया वाचनया च तं शिक्षयित्वा तदन्तर्निहितः प्रश्नः पित्रा क्रियते ।

प्रश्नः । किन्तावत् दौहित्रत्वं ?

उत्तरम् । दुहितुरपत्यत्वं दौहित्रत्वम् । दुहितुः कन्यायाः पुत्र इति । (४)

---

(४) दौहित्रेऽपि अपत्यता सांशतया विद्यत एव, यतः सोऽपि मातामहस्य पिण्डोदकादिदानार्हः रिक्थभाक् च क्वचिद् भवति । अत एव पुत्रादीनामभावे सति दौहित्रे वंशो न पतति, अपि तु वंशः संरक्ष्यत एव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

प्रश्नः । वत्स ! त्वममुकस्य पुत्र इति यदुक्तं, तस्य के साक्षिणः ?

उत्तरम् । "आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मो हि जानाति नरस्य वृत्तम् ।"

प्रश्नः । साधूक्तं वत्स ! जात्या त्वं कः ?

उत्तरम् । ब्राह्मणः ।

प्रश्नः । ब्राह्मणः किंलक्षणः ? कति वा लक्षणानि ब्राह्मणस्य ?

उत्तरम् । ब्रह्म वेत्ति जानातीति ब्राह्मणः ।

अपिच—"तिलकं (५) यज्ञसूत्रञ्च पवित्रं कुशधारणम् ।
मुखे सदा वेदपाठो ब्राह्मणः पञ्चलक्षणः ॥"

प्रश्नः । कियन्तं कालं यावद् यूयं ब्राह्मणाः ?

उत्तरम् । "यावन्मेरौ स्थिता देवा यावद्गङ्गा महीतले ।
चन्द्रार्कौ गगने यावत् तावद् विप्रकुले वयम् ॥"

प्रश्नः । विप्रकुल इति यदुक्तं, तद्विप्रः कीदृशः ?

उत्तरम् । "जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते ।
वेदपाठाद् भवेद् विप्रस्त्रिभिः श्रोत्रिय उच्यते ॥

प्रश्नः । त्वं राढीय उत वैदिकः (६) ?

उत्तरं । वैदिकः ।

प्रश्नः । वैदिकत्वं किम् ?

उत्तरम् । वेदान् वेत्ति अधीते वा इति वैदिकः ।

प्रश्नः । वैदिकश्चेत्, त्वं पाश्चात्त्य उत दाक्षिणात्यः ?

उत्तरम् । पाश्चात्त्यः ।

---

(५) ब्राह्मणस्य तिलकारणमेकमसाधारणं लक्षणम्, 'शिखी तिलकी कर्म कुर्या'दिति श्रुतेः ।

(६) ब्राह्मणाः सर्वे एव पूर्वमासीद् वैदिकाः, ततो वङ्गागमनानन्तरं राढदेशवासनिबन्धनात् कतिपयेषां श्रेणीविभागो जातः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नः । पाश्चात्त्यस्य किं लक्षणम् ?

उत्तरम् । पश्चिमदेशोद्भवः पाश्चात्त्यः (७) ।

प्रश्नः । त्वं किंग्रामी (८) ?

उत्तरम् । निर्ग्रामी (९) ।

प्रश्नः । किं लिखसि पठसि च (१०) ?

उत्तरम् । श्रीकाकला (११) ।

प्रश्नः । श्रीकाकला का ?

उत्तरम् । चतुस्त्रिंशदक्षराणि द्वादशसंख्यकानि फलकानि अनुस्वारो विसर्गश्च ।

---

(७) पश्चिमदेशाः सरस्वतीतीरवर्त्तिनः कान्यकुब्जादयः ।

(८) राढ़ीया वङ्गानागत्य केनापि कारणेन ग्रामीति संज्ञां लब्धवन्तः, इदानीमपभाषाकुक्षिकवलिता सा संज्ञा गॉयीत्याकारेण विपरिणता, यथा— मुखुटी गॉयी, वॉड़ुरी गॉयी, चाटुती-गॉयी इत्यादि । अस्माभिर्मन्यते यत्—वासग्रामनामानुसारेण ग्रामीत्येषा संज्ञा जाता, किन्तु कालवशात् सा स्मृतिरपसृतेति परवर्त्तिभिर्मुखुटीगॉयीत्यादिपारिभाषिकी संज्ञा कृता ।

(९) वैदिकानां तथाविधः सम्पर्को न जात इति ते निर्ग्रामिणः, निर्गॉयीति यस्य भाषा ।

(१०) यद्यपीतः पूर्वं बालको न लिखति न वा पठति स्म, तथापि 'भाविनि भूतवदुपचारः' इतिवत् बालकस्य भाविनि लिखनपठनविधौ बीजरूपो वर्त्तमानोपचारः । भाविपाठसौकर्य्यार्थं पिता बालकम् अकारादि-क्षकारान्तं वर्णसमूहम् इत एव पाठयति ।

(११) **श्रीरैश्वर्यं विद्यते अस्याः कलायाः** । श्रियं कायति इति श्रीका, कला कलाविद्या, सा किम्भूता ? श्रीका । श्रीका कला इति च्छेदः । अस्याः व्याख्या, पारिभाषिकपाठप्रणाली च—"चौत्रिश अक्षर वार फला तार नाम श्रीकाकला ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नः । कीदृशानि तान्यक्षराणि फलकानि च ?

उत्तरम् । सिद्धिरस्तु अ आ इ ई इत्यादयः (१२) ।

पूर्वोक्तप्रकारेण नामश्लोके सम्यक् लब्धशिक्षान् प्रश्नमात्रेणोत्तरयितुं समर्थान् शिशून् महाभारतस्य रामायणस्य अन्यस्य च वा चाणक्यसङ्कलितस्य नीतिशास्त्रस्य श्लोकान् पिता शिक्षयति । प्रतिदिनं प्रभाते पित्रा सह शय्योत्थायं शिशवः पितृपठितान् "प्रभाते यः स्मरेन्नित्य"मित्यादीनपि मङ्गलावहान् बहून् श्लोकानायत्तीकुर्वन्ति । एवं क्रमेण कुमाराः पञ्चाब्दमध्ये एव बहून् श्लोकान् कण्ठस्थान् कर्त्तुं प्रभवन्ति । परन्तु नवे भाजने विलग्ना रेखेव सा श्लोकमाला तेषां हृदये आजीवनमविकृतैव तिष्ठति ।

धर्मकृत्ये ब्राह्मणपण्डितानां निमन्त्रणं वङ्गेषु चिरन्तनम् । निमन्त्रणसभास्थेषु ब्राह्मणपण्डितेषु शास्त्रीयविचारोऽपि चिराचरितः । संघटिते तादृशे शुभावसरे ब्राह्मणपण्डिताः समवेताः सन्तः शास्त्रीयविचारं कुर्वन्ति । यदा नैयायिको नैयायिकेन, स्मार्त्तः स्मार्त्तेन, वैयाकरणो वैयाकरणेन च विचारमारचयन्ति, तेषां छात्रा अपि स्वस्वशक्त्यनुसारेण परस्परं विचारयन्ति, तदा साधारणनिमन्त्रणानुसारेण भोजनार्थमागताः सर्वे अर्भका अपि सभाप्रान्तदेशे समवेताः सन्तो नामश्लोकमवलम्ब्य विचारे प्रवृत्ता भवन्ति । प्रश्नास्तु पूर्वोक्तक्रमेण प्रथमं नामजिज्ञासा, नाम्नि कथिते शर्मणि सति देवस्य किं कार्यमित्थमेव प्रचलन्ति । कुत्रापि वा श्लोकदानादानरूपो विचारः प्रवर्त्तते । श्लोकसम्पत्तिबुभुत्सया प्रवृत्तस्यास्य विचारस्य 'श्लोककाटाकाटी'ति प्रादेशिकी भाषा । रीतिरेषैव यत्—

प्रश्नकर्त्ता प्रथमं यं श्लोकमुच्चारयति, उत्तरदाता तु तस्य श्लोकस्य

---

(१२) अकारात् औकारपर्यन्तं चतुर्दश स्वराः, कादयो मावसानाः पञ्चविंशतिर्वर्गीया वर्णाः यरलवाः शषसहा लकारश्च अमो वर्णा तथा अनुनासिकाश्च फलकस्थानीयाः, एते प्रायेण वर्गीयवर्णैः सह युक्ताः संयुक्तवर्णा भवन्ति, तत एव तेषां तथाविधा नामनिरुक्तिः । अनुस्वारो विसर्गश्च (१४+ २५+ ९+ २=५०) एतेन "पञ्चाशल्लिपिभिर्विभक्ता" इत्यादेरपि सिद्धिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्त्याक्षरं यस्य श्लोकस्य प्रथमे वर्त्तते तादृशमेकं श्लोकमुल्लिख्य उत्तरयति। परमुत्तरदात्रोच्चरितस्य श्लोकस्यावसाने यदक्षरं विद्यते, पूर्वपक्षकर्ता पुनः पूर्वोक्तप्रकारेण तादृशं श्लोकमेकं कथयति। एवंविधे विचारे येषां बहवः श्लोकाः कण्ठस्था वर्तन्ते, त एव नैपुण्यं प्रकटयन्ति, नान्ये। अध्यापकानां तथा छात्राणां विचारेषु यथा जयः पराजयश्च निर्णीयेते विजितैर्यथा विजेतृतो विविधा वाक्पारुष्यरूपा उपहासात्मिका विडम्बना उपभुज्यन्ते, एतेषां बालकानामपि विचारे पराजितानां तथैव संघटते। शास्त्रीयविचारेषु यथा माध्यस्थविधिर्वर्तते, मध्यस्थो यथा विचारकाणामुक्तिपरम्परातो जयं पराजयञ्च निश्चिनुयात्, नामश्लोकविचारेऽपि तथा मध्यस्थो बालकानां जयं पराजयं वा सभासु विघोषयति। एवंक्रमेण यथायोगं बालसुलभं विचारं कृत्वा कृत्वा तेऽपि काले विचारमल्ला जायन्ते।

अतःपरं पञ्चमाब्दे बालकानां यथाविधि विद्यारम्भः। तत एव ते लिखन्ति पठन्ति च। लेख्यान्यक्षराणि अकारादिक्षकारान्तानि। पाठ्यानि च तान्येव, एतत्परिभाषा 'खारापाता लेखा' इति। लिखनन्तु तालपत्रे, तत्रापि लौहशलाकाङ्कितक्षरोपरि मसीलेपनरूपम्। लिखनाय पाठनाय च गुरवः केचिदध्यापकाः, नतु ब्राह्मणेतरजातीयगुरुमहाशयाः। यत्र व्याकरणस्य अध्यापना प्रचलति, तच्चतुष्पाठीगृहप्रान्त एव एकस्मिन् स्थाने शिशव उपविशन्ति, अध्यापकैर्यथान्येषां छात्राणां पाठना क्रियते, तथैतादृशामपि बालकानां लिखने पठने च मतिर्नियोज्यते। आसनं तालपत्रनिर्मितं 'चाटखोल' इति यस्य भाषा, उपवेशनं भूमौ, मसी स्वगृहनिर्म्मितं तैलवर्त्तिमुखोद्गीर्णं कज्जलं, लेखनी सुखलभ्या वेणुशाखाः, मृत्पात्रं मस्याधारः। नियन्तुर्नैमित्तिवृत्तिमवलम्बमानानां बालकानां मुद्रिताक्षरोपरि नियतमसीचालनया तेषामक्षरलिखने शक्तिर्जायते। अतः परं तैरमुद्रिततालपत्रे अक्षराणि स्वयमेव लिख्यन्ते। 'आखारापाता लेखा' इति यस्य परिभाषा। यथायथमक्षरलिखने वर्णविन्यासे च यदा ते पारगा भवन्ति, तदा तेषां संयुक्ताक्षरलिखने नियोगो भवति, अस्य पारिभाषिकं नाम—'फला बानान लेखा' इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः परं बालकैः कदलीपत्रे 'चिलता' इति देशभाषाप्रसिद्धे नाम्नां तथा गुरुजनसन्निधौ लेख्यानामपरेषां पत्रिकादीनां च लिखने अभ्यासः क्रियते। एवंक्रमेण लिखने तल्लिखितपठने च यदा बालका निपुणा भवन्ति, गुरवोऽक्षरलिखनविधौ तत्पठनविधावप्यादिशन्ति, तल्लिखने पठने च तदा सम्यक् कृतकृत्या भवेयुः, तदा व्याकरणादीनां शास्त्राणां पाठविषये बालका गुरुभिर्नियोज्यन्ते। तत्पाठक्रमस्तु व्याकरणसूत्रस्य, धातुगणपाठस्य अमरकोषनाम्नः सुप्रसिद्धस्याभिधानस्य परिशुद्धभावेन मूलमात्रमुखस्थीकरणम्। एतदर्थमत्र विषये एका प्रादेशिकी कारिका विद्यार्थिसामाजे प्रचलति यत्—
"गण सूत्र अभिधान टेने टुने मुखे आन।" अपि च—

"आवृत्तिः सर्वशास्त्राणां बोधादपि गरीयसी"ति कृत्वा गुरवः केवलमावृत्तिमेव कारयन्ति। बाल्ये मेधा प्रशस्ततया तिष्ठतीति कृत्वा बालकानां मुखस्थीकरणे तथैव व्यवस्था।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीपाणिनीयं महाराष्ट्रीय-शब्दानुशासनम्

श्रीसंस्कृतव्याकरणकारिका

१ संज्ञापरिभाषीयोऽध्यायः प्रथमः

अथ संज्ञाः प्रवक्ष्यामि परिभाषास्तथा मिथः ।
याः सर्वाः पाणिनीयानां दीपिका इव बोधिकाः ॥
संक्षेपहेतोरेवैता योजितास्तेन धीमता ।
सूचिकाग्रेणेव ताभिः सूत्रितः शब्दविस्तरः ॥
क्वचिच्छन्दोभङ्गभयाद् अपि सूत्रानुसारिणा ।
पर्यायोऽपि मया प्रोक्तः संज्ञा यत्रार्थबोधिका ॥
कार्यदर्शी परं कार्ये दर्शनं यस्य न क्वचित् ।
पाणिनीयैरसौ वर्ण इत्संज्ञ इति कथ्यते ॥
माहेश्वराणि सूत्राणि कथ्यन्तेऽथ ह्यनुक्रमात् ।

अइउण् । ऋॡक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् ।

अत्र सूत्रचतुर्दश्यामन्त्या इदभिधानकाः ।
तेनान्वित आदिवर्णो मध्यानां स्वस्य चाभिधा ॥
संज्ञाः प्रयोजिता एवं शास्त्रेऽस्मिन्प्रत्ययादिषु ।
उच्यन्ते लक्षणानीतामन्त्यं हल् उपदेश इत् ॥
अजप्यनुनासिक इत् लोपस्तस्य भवेदितः ।
संज्ञा च परिभाषा च विधिर्नियम एव च ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच् स्यात् स्वरो व्यञ्जनं हल् वृद्धिरादैच् अदेङ्गुणः ।
मुखनासिकया प्रोक्तो वर्णः स्यादनुनासिकः ॥
अन्तस्थाख्या यरलवाः स्पर्शाः स्युः कादि-मान्तकाः ।
ऊष्माणः स्युः शषसहा इति संज्ञात्रयं हलि ॥
एकद्वित्रिमात्रिकाचो ह्रस्वदीर्घप्लुताः क्रमात् ।
जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलिस्फोटनं कुर्यात् सा मात्रा परिगीयते ॥
हलोऽनन्तराः संयोगो ह्रस्वं स्याल्लघुसंज्ञकम् ।
तत्तु संयोगे भवति दीर्घं च गुरुसंज्ञकम् ॥
सन्निकर्षः परो ज्ञेयो वर्णानां संहिताभिधा ।
अलोऽन्त्यात्पूर्व उपधा सुप्तिङन्तं भवेत्पदम् ।
विरामो ह्यवसानाख्यो विभाषा वाऽर्थबोधिका ॥
प्रकृतिर्मूलरूपं स्यात् प्रत्ययोऽन्वयबोधकः ।
विशेषमर्थं प्रकृतेः प्रत्याययति योऽथवा ॥
हन्यात्स्थानिनमादेश आस्ते स्वामिनमागमः ।
तदंगसंज्ञकं ज्ञेयं प्रत्ययो विहितो यतः ॥
तदादिशब्दस्वरूपं तस्मिन्वै प्रत्यये परे ।
अदर्शनं प्रत्ययस्य लोपो लो वेति कथ्यते ॥
तत्पुनर् लुक्श्लुलुप्संज्ञं तत्तच्छब्दैर्निरूपितम् ।
अपि लोपे प्रत्ययस्य कार्यं स्यात्प्रत्ययाश्रितम् ।
कृते तु लुमता तस्मिन् कार्यमङ्गस्य नेष्यते ॥
संज्ञि स्वं रूपं शब्दस्य संज्ञा चेन्नेह सूचिता ।
स्थानान्यथ निरूप्यन्ते प्रयत्नाश्च यथाक्रमम् ॥
अकुहविसर्गाणां स्यात्स्थानं कण्ठो हि तालिचुयशानाम् ।
ऋटुरषवर्णानां स्यान्मूर्धा दन्ता लृतुलसानाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दन्तौष्ठं वस्योष्वोरोष्ठौ नासिका च भवेद् ञमाम्।
तथा कण्ठौष्ठमोदौतोरिति स्थानविचारणा ॥

अथाऽन्तरो बाह्य इति प्रयत्नो द्विविधः स्मृतः।
विविधः स्वराणामीषत्स्पृष्टस्त्वन्तस्थसंज्ञिनाम्।
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ॥

उच्चैरुदात्तो नीचैस्तु स्वरोऽनुदात्तसंज्ञकः।
स्वरितः स्यात्स यत्रैतौ वर्णधर्मौ समाहृतौ ॥
तस्याऽऽद्यार्धमुदात्तं स्यादनुदात्तं तथाऽन्तिमम्।
श्वासा घोषो विवारश्च विसर्गस्य खरस्तथा ॥

वर्णानामितरेषां तु नादो घोषश्च संवृतः।
पंचवर्गेष्वयुग्मानामल्पप्राणस्तथा यणः।
अन्येषां तु महाप्राण इति प्राणा निरूपिताः ॥

यद्यत् तुल्याऽऽस्यप्रयत्नं सवर्णमभिधीयते।
स्थानभेदेऽपि सावर्ण्यं मिथः स्याद् ऋलृवर्णयोः ॥
उदित्संज्ञा सवर्णस्य अण् च यो न विधीयते।
समकालस्य तपरस्तदन्तस्य विशेषणम् ॥

स्वस्याऽप्यप्रत्ययविधौ स्यादुगिद्वर्णवर्जिते।
कार्ये प्रत्ययनिर्दिष्टे शब्दाद् यस्मात्स सूचितः।
तदन्तस्य तदादेश्च तत्र ग्रहणमिष्यते ॥

तस्येति कार्यं स्थाने स्याज्ज्ञेयमादेः परस्य यत्।
तस्मिन्निति तु पूर्वस्य तस्मादित्युत्तरस्य तत् ॥
षष्ठ्या निर्दिष्ट आदेशः स्थानेऽन्त्यस्य भवेदलः।
शिदनेकाल् च सर्वस्य ङित्त्वन्तस्यैव दिश्यते ॥
शब्दाऽऽन्तर्यं चतुर्धाऽर्थगुणस्थानप्रमाणतः।
आदेशोऽन्तरतमः स्यात् स्थानतस्तु विशेषतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुदेशः समानानां यथासंख्यं प्रयुज्यते ।
आगमोऽचोऽन्त्यात्परो मिदाद्यन्तौ टकितौ तथा ॥
गुणवृद्धी इकः स्यातां ह्रस्वदीर्घप्लुता ह्यचः ।
गित्किन्निमित्ते ङिति च नेष्टो वृद्धिगुणादिकः ॥
कार्ये ह्रस्वादेश एचां तत्स्थाने स्युरिकस्तथा ।
शब्दाऽन्तर्यं चतुर्धाऽर्थगुणस्थानप्रयत्नतः ॥
आदेशः सदृशः कार्यः स्यादान्तर्यानुरूपतः ।
आन्तर्यं स्थानतस्तत्र बलीय इति कथ्यते ॥
कार्यं तस्येति निर्दिष्टं तत्स्थाने क्रियते बुधैः ।
तस्मिन्निति पूर्वस्य तस्मादित्युत्तरस्य यत् ॥
आगमस्तु प्रत्ययस्य:तस्मिन्नित्यपि दिश्यते ॥
षष्ठ्या निर्दिष्ट आदेशः स्थानेऽन्त्यस्य भवेदलः ।
अनुदेशः समानानां यथासंख्यं प्रयुज्यते ॥
इति संज्ञापरीभाषमधिकृत्याऽऽदिमः कृतः ।
महाराष्ट्रियेणाध्यायस्तुष्यात्तेन जनार्दनः ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलिनीवसन्तम्

(पूर्वानुवृत्तिः)

[निबन्धकः—श्रीशिवशङ्कर-शास्त्री]

अशुभवार्त्ता शुभवार्त्तापेक्षया सत्वरं बहुलीभवति। तपोधनविसृष्ट-दूतस्य वसन्तनिषेवितनगरप्राप्तेः प्रागेव नलिनीमरणसन्देशो वसन्तमस्प्राक्षीत्। "इयं कृतकान्त्येष्टिक्रियामात्रं मरणच्छायामात्रञ्च। 'वसन्तेनोद्धृता भविता-स्मी'ति तया सन्दर्शितालोकमरणया वर्तते" इति वार्त्तावहमुखेन तपोधनो वसन्तमवादीत्। सन्देशं शृण्वन् वसन्तोऽतिमात्रं सुखायमानः प्रफुल्लचेता-श्चासीत्। स पूर्वरात्रे 'प्राणैरहीयते'ति स्वप्नमद्राक्षीत्। [अयं खलु विचित्रस्वप्नः। यत उपरतनरश्चिन्तयितुमलमासीत्।] नलिनी तमासाद्य गतजीवितमवलोक्याधरं चुम्बित्वोदजीवयत्तम्। ततः प्रत्यानीतप्राणवृत्तिः स राजाऽभूत्।

काञ्चनपुरापतितसन्देशहरात् स्वप्नदृष्टशुभसन्देशं नूनं श्रोष्यतीति स मनसि चकार। परन्तु यदा श्रुतं तेन स्वप्नस्य विपरीतं तदा सोऽप्रति-बोधशायिनीं चुम्बनेनोज्जीवयितुमशक्याञ्च श्रुत्वा तुरङ्गमसज्जीकरणा-याऽऽदिदेश। यतः स तद्रात्रौ गत्वा काञ्चनपुरमुपरतनलिनीं द्रष्टुं कृतसङ्कल्पः संवृत्तः। हताशोन्मत्तनरचेतसि दुष्कार्यचिकीर्षासुलभतया तदासीच्च तस्य मनसि कस्यचिन्निर्धनभेषजविक्रयिणो वार्त्ता। एकदा विदर्भ-पुरे परिभ्रमन् सोऽस्य भेषजविक्रयिणोऽन्तिकमयासीत्। धृतभिक्षुकाकृति-ममुं दृष्टवतो जनस्य 'बहुदिवसं यावत् सोऽनाहारी'ति मनसि जायते स्म। न केवलं स भेषजविक्रेता हलाहलविक्रय्यप्यासीदिति वसन्तोऽज्ञासीत्। स्मृततन्नरो वसन्तस्तदन्तिकं जगाम। प्रथमं कृतविषविक्रयविकल्पेन तेनासंवृतसुवर्णमुद्रालोभेन दत्तसुवर्णमुद्राय वसन्ताय 'विंशतिजनतेजस्विनो ऽपि प्राणान् हन्तुं समर्थः' इत्युक्त्वा दत्तो हलाहलः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहीतहलाहलेन प्रणयिनीदिदृक्षाक्षिप्तचेतसा 'सकृतस्वचक्षुर्निकाम-निपीतनलिनीर्निःशेषनिपीतहलाहलो नलिनीपार्श्वे शयो भवितेति मन-स्याहितसंकल्पेन काञ्चनपुरमभि कृतप्रस्थानेनाधिनिशीथासादितकाञ्चन-पुरेणोपतपोवनाश्रममध्युद्यानं नलिनीं मृगयमाणेनेतस्ततो दत्तदृष्टिना पर्य-टता, निर्ज्जनवासाभिलाषिणो नलिनीमरणदुःखाभिभूतस्याश्रितैकशिला-तलस्य मनसा निन्दितभगवद्विचारस्याविदितनिर्वासितवसन्ताध्युद्याना-गमनप्रयोजनस्य प्रव्राजितवसन्तपलायनचित्रीयमाणमानसस्य केशवस्य साक्षात्कारः सञ्जातः। स क्रुद्धस्वरेण वसन्तं 'तिष्ठे'त्युवाच। विदित-काञ्चनपुरपुनर्वसन्तदर्शनप्राणदण्डः शिलातलादुत्थाय वसन्तं धर्त्तुं व्यव-सित आसीत्। वसन्तः 'मदन्तिकादपेहि गमिष्यस्यन्यथा वीरविक्रम-गतिमि'त्युवाच केशवम्। केशवेन तु तद्वचस्यदत्तकर्णेनापराधदण्डितो नरो धृतः। वसन्तस्तं न्यवारयत्। अथ तयोर्जन्यं समजनि। केशवो भूमौ निहतः शेते स्म। ततो गृहीतदीपेन केशवो निहत इति दृष्टं वसन्तेन। विदर्भादागमनसमये पथि श्रुतनलिनीकेशवपरिणयसम्बन्धो दुर्भाग्यसहचरत्वाद्धृतोपरतकेशवपाणियुगलोऽहं त्वां सह नलिन्या भस्मीक-रोमीति व्याहृत्य गत्वाऽन्तर्गृहं प्रणयिनीं तत्र शायितामपश्यत्। नलिन्या अतुलनीयसौन्दर्यलवपरिवर्त्तने मृत्योः का नाम शक्तिः। तद्रूपं निरीक्षमाणो मृत्युस्तस्यां प्रणयं बबन्ध। अथवा शीर्णो घृण्यो जघन्यो मृत्युः स्वानन्दाय तामरक्षत।

चुम्बितप्रणयिनीदन्तच्छदः स्वविग्रहापनीताशेषसम्मानकेतनो निपीत-तद्विक्रेतृप्रदत्तप्राणापहारियथार्थहलाहलः सञ्जातः। नलिनीनिपीतहलाहलः परमार्थतो हलाहलो नासीत्। क्रमेण तिरोहितविषमोहा 'वसन्तो यथासमयं नागत' इति मनस्यकरोन्नलिनी। तपोधनोक्तनलिनीप्रबोधनसमयः समुपा-गतः। तत्प्रेरितपत्रजातं सन्देशहरस्य विलम्बतया वसन्तेन नासादितमिति स मनसि चकार तपोधनः। अतः स नलिनीं द्रष्टुं तदुद्यानमाजगाम। स तत्र ज्वलद्दीपमसिलतामसृक् तथा वसन्तकेशवयोर्जीवितशून्यकलेवरद्वयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरीक्ष्यातीव चित्रीयमाणः सञ्जातः। तद्भीषणदैवघटनकारणानुमानात् प्रागेव नलिनी लब्धसंज्ञा वसन्तविषयकं जिज्ञासते स्म। अस्मिन्नेव समये नलिनी तस्या हृदयङ्गमप्रणयिवसन्तं पात्रपाणिमपश्यत्तदा विषपाणेन तस्य मृत्युः समजनीत्यज्ञासीदसौ। वसन्तपीतावशिष्टविषं तस्मिन् पात्रेऽदृष्ट्वा तदधरविषपिपासूस्तं चुचुम्ब। ततो बहुलोकागमनकलकलभिया तत्र पतितचन्द्रहासेनाऽऽत्मानमाहत्य यथार्थप्रणयिपार्श्वशया प्राणान् जहौ।

अत्रान्तरे शान्तिरक्षकास्तत्र प्राप्ताः। केनचित् केशवबालभृत्येन तत्प्रभुवसन्तयोर्जन्यमवलोक्य सर्वत्र प्रकाशीकृतम्। यदा युद्धवार्त्ता नगरनिवासिनां मध्ये प्रकाशीभूता तदा ते काञ्चनपुरराजपथे इतश्चेतो धावन्तः केशववसन्तनलिनीनां नामधेयानि व्याहरन्तः स्थिताः। वसन्तनलिन्योः पितरौ तदा परित्यक्तशयनौ तत्कोलाहलकारणनिर्धारणाय सह राज्ञा तत्स्थानमासेदतुः। वेपमानविग्रहं दीर्घं निश्वसन्तं तथाश्रु मुञ्चन्तं तपोधनमुद्यानान्निर्गच्छन्तं कश्चिच्छान्तिरक्षको धृतवान्। अधुनाऽप्युद्यानं बहवो जनाः समवेता आसन्। ततो नृपतिर्वर्णनाय तदद्भुतभीषणवृत्तस्य तपोधनमादिदेश।

तत्र नलिनीवसन्तपित्रोः समक्षं तयोः प्रेमविषया मृषोद्यकाहिनीं तथा सुचिरस्थायिविवादप्रशमनाभिलाषेण नलिनीवसन्तप्रणयव्यापारे स्वगृहीतभूमिकामपि च यथायथं वर्णयामास। स इत्थं वर्णयितुं प्राक्रमत। 'अयं मृतवसन्तो नलिनीभर्त्ता, इयञ्च नलिनी वसन्तस्य साध्वी पत्नी। तयोः परिणयवार्त्ताप्रकाशनावसरात् प्रागेव सम्बन्धान्तरं स्थिरीकृतं नलिनीविवाहस्य। अपरपरिणयपापकृत्यनिवारणाय मदनुशासनेन निपीतभेषजा भावितविषवेगा सञ्जाता नलिनी। स्वकृतकमरणसन्देशवाहिनी पत्रिका वसन्तस्यान्तिकं प्रेषिता। परन्तु मन्दभाग्यतया नासादिता पत्रिका सा वसन्तेन सन्देशहरस्य चिरायितात्वात्। नालमभूत्तपोधनोऽतः परं वर्णयितुम्। केवलं 'मया नलिन्या उद्धरणायागतेनेदमेव वृत्तं दृष्टमित्युक्तम्। वर्णितस्तदा केशवबालभृत्येन तपोधनवर्णितावशेषः। सह वसन्तेन काञ्चन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरमागताय भृत्याय पत्रमेकं दत्त्वा "मम मरणादूर्ध्वं त्वयैव पत्रमिदं मे पितुर्हस्ते दातव्यमित्युवान वसन्तः। तत्पत्रेण तापसवाक्यस्य सत्यता प्रमाणीकृता।

"आत्मनो नलिन्या सह विवाहवार्त्ताप्रकाशान्तरं पित्रोः क्षमां प्रार्थयामास। वसन्तोऽमुष्य निर्धनभेषजविक्रेतुर्विषक्रयवार्त्तामपि तत्पत्रे लिखितवान्। एतद्वृत्तमालोच्य तपोधनो निर्दोष इति प्रमाणीकृतम्।

अथ नरपतिर्नलिनीवसन्तयोः पित्रोरभिमुखं व्यावृत्य तयोर्नृशंसान्याय्यवैरस्य कृते भर्त्सयामास। कीदृग् भीषणं दण्डितं भगवता तयोर्दोषादिति दर्शितं तेन राज्ञा। अन्योऽन्यानैसर्गिकजुगुप्सयैतयोः सन्तानद्वयप्रेम्णा तौ भगवानशिषत। नाविद्यत विरोधोऽनयोः प्रतिद्वन्द्विनोः। ता अन्योन्यमुपगूहत स्म केवलम्। परस्परं भ्रातृसम्बोधनेन चाजुहवतुः। ततो वसन्तस्य पिता "नलिन्याः स्वर्णमयी प्रतिकृतिर्मया निर्मातव्या। यावत् काञ्चनपुरस्य नाम स्थास्यति तावन्नराः साध्व्या नलिन्याः स्वर्णमयप्रतिकृतिसौन्दर्यं शिल्पनैपुण्यञ्च प्रशंसिष्यन्ती"ति व्याजहार। नलिन्याः पितापि "अहं वसन्तस्य प्रतिकृतिं निर्मास्यामी"त्युक्तवान्। इत्थं तयोरन्वययोः सम्मेलनं सञ्जातम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

एकविंशः सर्गः

[निबन्धकः—श्रीनित्यगोपाल-विद्याविनोदः]

निष्पाद्य कृत्यं नृपतिः स्वकीयं विश्रामधाम्नीव किरीटमर्कः ।
सायं शिरोरत्नमपास्य शृङ्गेऽस्ताद्रेस्तमोहृद् भवनं विवेश ॥१॥
निशागता भालिमनोज्ञमाल्या स्निग्धांशुशीतांशुरुदैच्च कान्तः ।
संग्रामभूमौ ज्वलितः कृशानुः सौमित्रिपार्श्वे भुवि राघवोऽभूत् ॥२॥
अश्रूणि रक्तैरनुजस्य सार्द्धं सिञ्चन्ति पृथ्वीं दधते विचित्राम् ।
गिरेः स्रवद्गैरिकमिश्रितस्य तलस्थितस्योत्सवरस्य शोभाम् ॥३॥
विभीषणो भीषण आजिमध्ये हनूमदाद्याश्च कपिप्रवीराः ।
विषण्णचित्ता जलपूर्णनेत्रा बभूवुरुद्दीप्तशुगग्निदग्धाः ॥४॥
अवाप्य चैतन्यमुवाच रामः सुदुःखितो लक्ष्मण ऋद्धराज्यम् ।
हित्वा यदाहं वनवासमागां तदात्मना मे समदुःख आसीः ॥५॥
रात्रौ भवान् पर्णगृहस्य धन्वी द्वारे विनिद्रः समरक्षदेनम् ।
अद्यापदब्धौ पतितं निरीक्ष्य कथं न्विमं न स्मरसि प्रवीर ॥६॥
भुवि स्थितस्त्वं कथमेषि तृप्तिं कस्त्रास्यते मां विपदोऽद्य वन्धि ।
उत्तिष्ठ नाज्ञां मम तात जातु विधातुमालस्यमगा गुरोस्ते ॥७॥
अभाग्यतश्चेदजहा विपन्नं मामद्य भाषस्व कुतोऽपराधात् ।
रोरुद्यते सा नियतं स्मरन्ती त्वां देवरं राक्षसरुद्धसीता ॥८॥
सा वा कथं ते स्मृतितो विलुप्ता सिषेविषे त्वं जननीसमां याम् ।
भो रामवाञ्छालतिकालवाल कुलाङ्गनां वो निरुणद्धि रक्षः ॥९॥
सहायहीनोऽहमृते भवन्तं रथीव चक्रैर्विकले शताङ्गे ।
निःसंज्ञमालोक्य भवन्तमार्त्ता जाता हनूमत्प्रमुखाः सहायाः ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदण्डयित्वा युधि तस्करन्तं कथं नु शेषे ज्वलदग्निकल्पम् ।
वीर्येण निर्जित्य विपक्षपक्षं रक्षायशःसागरमग्नवंशम् ॥११॥
श्रान्तो यदि त्वं समरेऽतिकृच्छ्रे प्रतिव्रजाद्यैव वनं न कृत्यम् ।
रणेन सीता प्रतिमोचनेन न रक्षसां वा वधसाधनेन ॥१२॥
माता सुमित्रा रुदती त्वदर्थं कथं नु दर्श्येत मुखं मया सा ।
किं वा समुच्येत यदेक्ष्य मां सा चैकाकिनं प्रक्ष्यति ते प्रवृत्तिम् ॥१३॥
भो रामभद्रास्ति कुतो मणिर्मे नेत्रस्य ते भक्तसुतो गृणीहि ।
उक्त्वेति सा बाष्पपरीतनेत्रा यदोपगन्ता किमहं प्रवक्ष्ये ॥१४॥
प्रबोधयिष्यामि वधूं कथं वा पौराञ्जनांस्त्वं व्यजहा मदर्थे ।
प्रेम्णा यदीयेन विसृज्य राज्यम् आगा वनं तं विजहासि केन ॥१५॥
नेत्रे इमे प्रेष्ठ जलेन पूर्णे पश्यन्नरोदीर्मम मृष्टवांश्च ।
बाष्पैर्निषिक्तं प्रचुरैः समीक्ष्य मामद्य तोषं कथमास्थितोऽसि ॥१६॥
सौभ्रात्रशीलो भुवि विश्रुतस्त्वं माध्यस्थ्यमेवं त्वयि शोभते किम् ।
आजन्म देवानयजे ततस्ते फलं किमेतत् प्रददुः प्रसन्नाः ॥१७॥
दयार्द्ररात्रे कुसुमं निदाघे शुष्कं सजीवं विदधासि नित्यम् ।
सुधाकर त्वञ्च सुधां वितीर्य सौमित्रिमाजीवय राघवेण ॥१८॥
एवं व्यलापीद्रघुवंशकेतुरुतसङ्ग आधाय कनिष्ठमार्त्तम् ।
द्रुमाः प्रणुन्ना इव मरुतेन निशश्वसुस्ते रथिनो विषण्णाः ॥१९॥
कैलासशैलेऽसुखिता भवानी क्रोडस्थपादाम्बुजमश्रुसिक्तम् ।
करोति शम्भोरुषसीव पद्मं तुषारसिक्तं नितरां बभूव ॥२०॥
पप्रच्छ शम्भू रुदितं किमर्थं करोषि शैलेशसुते गृणीहि ।
किमस्ति वेद्यं तव नैव देव वक्ष्ये तथापीति जगाद गौरी ॥२१॥
सुवर्णलङ्कानगरेऽद्य रामः सौमित्रिशोकाहत एवमार्त्तः ।
विलापखिन्नो लुठति क्षमायां को वेह विश्वे मम यागमिच्छेत् ॥२२॥
लज्जासमुद्रे निदधासि मान्त्वं नामापि मे रुद्र बभूव मग्नम् ।
कलङ्कसिन्धौ किमु दण्डितेयं दासी त्वया भग्नतपोऽपराद्धा ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवेन्द्र आगान्मम सन्निधानं क्षणेऽतिमन्दे रघुनन्दनोऽपि ।
आनर्च मां मानभरेण देवीत्युवाच शम्भुं स पुनर्जगाद ॥२४॥
अर्थेन तुच्छेन कथं विषण्णा नगेन्द्रकन्ये चपलं नु रामः ।
संप्रेष्यतां याम्यपुरं समायो विशेच्च तत् सोऽनुगृहीत आशु ॥२५॥
प्राणान् कथं तस्य पुनर्लभेत भ्रातेति तस्मै जनको ब्रुवीत ।
जहीहि दुःखं हरिणाङ्कवक्त्रे मायां समाहूय ददस्व शूलम् ॥२६॥
तमोमयं देशमिदं ज्वलिष्यत् स्थूणेव वह्नेर्द्युतिमत् प्रकुर्वत् ।
शूलं प्रजाशासनदत्तमेवं भक्त्या समर्चिष्यति भूतसंघः ॥२७॥
सस्मार दुर्गा निजशक्तिमायां सागत्य तूर्णं प्रणनाम पादौ ।
मृदुस्वरं प्राह च गच्छ देवी मायेऽद्य लङ्कां भवमोहिनीशे ॥२८॥
सीतापती रोदिति लक्ष्मणार्थं प्रबोधय त्वं मधुभाषया तम् ।
प्रेतालयं प्राप्य तत्र तातः पन्थानमादेक्ष्यति केन जीवेत् ॥२९॥
मृताः ससौमित्रिबहुप्रवीरा गृहाण शूलं गिरिशस्य दोर्भ्याम् ।
प्रेतालयं दीप्तमिदं विधाता श्रुत्वेति माया प्रणता प्रतस्थे ॥३०॥
रूपेण तस्या मलिनेव छाया छायापथस्यैव हसिताश्च ताराः ।
मध्ये मणीनां बहुवर्णभाजां प्रदीप्तसूर्यांशुविभासितानाम् ॥३१॥
स्वदीप्तिरेखामभिविष्णुवर्त्म माया किरन्ती तरणीव सिन्धौ ।
जगाम लङ्कां कतिभिर्मुहूर्तैरध्यासितां राघवसैन्यवृन्दैः ॥३२॥
लङ्का प्रपूर्णाऽजनि दिव्यगन्धैर्जगाद मायाऽस्फुटवाणि रामम् ।
अश्रूणि संमृड्ढि महारथीन्द्र भ्राता प्रियस्ते भविताऽसुयुक्तः ॥३३॥
स्नात्वाऽप्सु सिन्धोर्मयका प्रयाहि कृतान्तधामाऽद्य शिवप्रसादात् ।
त्वमद्य याया भवनं यमस्य सहैव ते दिव्यकलेवरेण ॥३४॥
पन्थानमाख्यास्यति तं पिता ते येनानुजस्ते श्वसितं समीयात् ।
भो भीमबाहो चल भूमिमध्यं सुरङ्गमार्गं सुमते करिष्ये ॥३५॥
निर्भीकचित्तो विश तत् सुरङ्गमहं भविष्यामि तवाग्रगन्त्री ।
सुग्रीवमुख्या रथिनोऽत्र सर्वे सौमित्रिदेहं परिपालयन्तु ॥३६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधाय नेतॄनवधानयुक्तान् सुविस्मितो राघव एत्य तीर्थम् ।
वगाह्य देवानतृपच्च तोयैः पितॄन्निवेशं समगात्तथैकः ॥३७॥
ददर्श रामो गृहमुज्ज्वलं तद् त्रिभाभिरंशीभिरपूर्वदृष्टम् ।
देवीं समानर्च कृताञ्जलिः सन् पुष्पाञ्जलीन् भक्तिभरैर्वितीर्य ॥३८॥
सुवीरभूषाभिरलङ्कृतः स सुरङ्गमार्गेण विशङ्कचित्तः ।
कृतान्तवेश्म प्रति सम्प्रतस्थे प्रसन्नदेवोह्यकुतोभयः स्यात् ॥३९॥
तमोवृतोऽरण्यपथेन रामः पान्थो यथा गच्छति मध्यरात्रे ।
जगाम तादृग् विपिनं जहास सुधांशुभानुप्रकरैः प्रकीर्णम् ॥४०॥
माया पुरोऽगादवलम्ब्य जोषं कल्लोलमाकर्णितवान् कियद्भिः ।
क्षणैश्च रामश्चकितः सहस्रैः रुष्टैः समुद्रैरिव जन्यमानम् ॥४१॥
अपश्यदारान्नगरीं सुभीमां गाढान्धकारेण चिराय गूढाम् ।
नदी सुभीमा रुधिरावहैका तां वेष्टमाना वहति प्रचण्डम् ॥४२॥
न पुष्पवन्तावुदितोऽन्तरीक्षे न तत्र तारा निबिडा घनाली ।
भीमाग्निराशिं किरती समन्ताद् बम्भ्रम्यते शून्यपथेन नित्यम् ॥४३॥
सविस्मयं राघव ऐक्षतास्यां सेतुं तटिन्यां ज्वलदग्निदीप्रम् ।
धूमावृतं वा रुचिरञ्च हैमं प्रतिक्षणं विष्णुमिवान्यरूपम् ॥४४॥
पप्रच्छ रामो वद देवि माये किं सेतुराप्नोति विचित्ररूपम् ।
अगण्यजन्तुः किमु वाऽग्निकुण्डं पतङ्गवत्तं प्रति विद्रवन्ति ॥४५॥
जगाद माया शृणु रामभद्र सेतुर्महाशक्तिधरो विचित्रः ।
पापात्मनां धूममयः कृशानुः पुण्यात्मनां काञ्चननाकमार्गः ॥४६॥
पश्यस्यमूनात्मन आयतोऽङ्ग प्रेतालयं त्यक्ततनून् धरण्याम् ।
भोक्तुं फलं प्राक्तनकर्मलब्धं देशे कृतान्तस्य नयेन शिष्टे ॥४७॥
पुण्या नराः सेतुपथेन पूर्वं द्वारं प्रतीच्यं प्रविशन्त्युदीच्यम् ।
अहर्निशं वैतरणीं नदीञ्च क्लेशेन पापाः सततं तरन्ति ॥४८॥
आघ्नन्ति कांश्चित् पुलिने यमस्य दूतास्तथा तैल इवाप्सु तप्ते ।
ज्वलन्ति केचित् कृतपापदग्धा ईक्षिष्यसे तान् मयका प्रगच्छ ॥४९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्यन् ययौ मन्थरयानरामो मायाऽग्रतः काञ्चनदीपिकेव ।
सेतोः समीपे समपश्यदेकं स दण्डपाणिं यमकिङ्करञ्च ॥५०॥
पप्रच्छ दूतो यमलोकशास्तुर्गम्भीरध्वनिः कोऽसि कथं प्रविष्टः ।
सदेह एतद् यमराजराज्यं ब्रूह्याशु नो चेद् विनिपातयामि ॥५१॥
दूतं त्रिशूलं समदर्शयत्तं माया हसन्ती नतशीर्षदूतः ।
प्रणम्य तत्पादसरोजयुग्मं प्रोवाच कोऽलं भवतीं निरोद्धुम् ॥५२॥
सेतुः स्वयं स्वर्णमयः प्रजातस्तवागमात् पश्य यथोषसाभ्रम् ।
तेनैवमुक्तौ तटिनीं विलङ्घ्य लौहीं पुरद्वारमपश्यतां तौ ॥५३॥
चक्राकृतिं वह्निमपश्यदुग्रं घूर्णन्तमश्रान्तमदृष्टपूर्वम् ।
आशासु सर्वासु रघुप्रवीर आग्नेयवर्णं वरतोरणेऽपि ॥५४॥
धावन्ति पापाश्चिरदुःखदेशमनेन मार्गेण तमिस्रपूर्णम् ।
एतं प्रविश्याद्य भवन्ति सर्वे क्लिष्टा भृशं पापनिधौ प्रयुक्ताः ॥५५॥
ऐक्षिष्ट स द्वारि कृशं त्वगस्थिमात्रं ज्वराख्यं भयदञ्च रोगम् ।
विकम्पमानं हिमतस्तथैव दन्दह्यमानं प्रबलप्रदाहात् ॥५६॥
पित्तानिलाभ्यां कफतश्च रुग्णस्तस्यान्तिके तिष्ठति दीर्घतन्द्रः ।
आद्यून एको गिलति प्रकामं वान्तं भुजाभ्यां गलितं स्वभोज्यम् ॥५७॥
तत्पार्श्ववर्त्ती स्तिमिताक्षियुग्मो मदात्ययो नृत्यति रोदितीद्धः ।
गायत्यथो धावति हासमुच्चैः करोति वैरञ्च पुनर्विधत्ते ॥५८॥
विश्लिष्टसर्वाङ्गसुदुष्टकामः शवो यथा पापरतस्तथैव ।
यक्ष्मापि तत्पार्श्वमसृङ्निषिक्तं करोति कासैः प्रबलैरजस्रम् ॥५९॥
विसूचिका तत्र मुखेन वान्तं गुह्येन वर्चांसि भृशं त्यजन्ती ।
अङ्गग्रहैस्तर्षविदाहतापैर्द्वीपीव जीवान् दशति प्रमीतान् ॥६०॥
तत्पार्श्व आस्ते च महानुदग्र उन्मादरोगो हविषेव वह्निः ।
उदर्चिरुग्रो धृतभूषणश्च नग्नः कदा वा युधि कालिकेव ॥६१॥
स गीतमत्तः सहहस्तताल: सहास उच्चै रुदितेन युक्तः ।
छिनत्ति कण्ठं विषमर्त्तितीव्रं समूत्रवर्चोऽत्ति विमिश्रमन्नैः ॥६२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीरः क्वचिद्दामनिबद्ध उग्रोऽपवायुवीचीरहिता नदीव ।
एवंविधा रोगगणाः सुभीमास्तिष्ठन्ति तस्मिन् विषये समन्तात् ॥६३॥
ददर्श रामोऽनलवर्णभीमे रथे स्थितं क्रोधमसृक्समार्द्रम् ।
वस्त्रं दधानं खरखड्गपाणि युद्धस्य सारथ्यमिवाऽऽचरन्तम् ॥६४॥
अथाऽऽत्महत्यां स ददर्श घोरां विलोलजिह्वामनिमीलिताक्षीम् ।
दोदुल्यमानां विटपे द्रुमस्य दुश्छेदपाशावृतकण्ठदेशाम् ॥६५॥
सम्भाष्य रामं समुवाच माया दृष्टास्त्वया ये यमराजदूताः ।
एते किराता इव काननेषु मृगेप्सवो गच्छ पुरीं यमस्य ॥६६॥
त्वां वीक्षयामीह कृतान्तपुर्यां जीवान् स्वकर्माप्तविचित्रदुःखान् ।
द्वारेऽत्र नाना नरकस्य देशास्तिष्ठन्ति पापा निवसन्ति यत्र ॥६७॥

रामो विवेश नगरं शमनस्य भीमं
दावाग्निना वनमिव ज्वलितं वसन्तः ।
ध्वान्तावृता तु नगरी शवदेहपूर्णा
लक्षाणि ते विदुरिताः सुगतिं लभन्ते ॥६८॥

इति श्रीमेघनादवधे महाकाव्ये श्रीरामचन्द्रस्य नरकप्रवेशो नाम
एकविंशः सर्गः ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यासागरचरितम्

[निबन्धकः— श्रीसुधांशुशेखर-काव्यतीर्थः]

विद्यासागर ईश्वरचन्द्रविद्यासागरो वहुजनाकीर्णमेदिनीपुरजेलान्तःपातिवीरगणसुशोभितवीरसिंहजनपदे जन्म परिगृह्य सार्थकीकृतवान् तं ग्रामम्। स क्षीरनिधौ शशधर इव भुवनहितायावतीर्णः। धन्यः खलु ठाकुरदासवन्द्योपाध्यायः यो नाम एवम्भूतं पण्डितकुलशिरोमणि त्रिभुवनप्रथितकीर्त्तिं सुतमणिमजनयत्। धन्या च भगवतीव भगवतीदेवी या किलोदरे एवं सर्वलक्षणोपेतं तनयं दधार। पञ्चवर्षोऽसौ पाठशालां प्रविष्टः, तत्रासौ गुरुमहाशयसमीपे वर्षत्रयं विद्यामभ्यस्तवान्। अथासौ समापितपाठशालापाठः पित्रा सह कलिकातामाससाद, तत्र च राजकीय-संस्कृतमहाविद्यालये संस्कृतं पठितुमारेभे। तत्र च प्रतिवर्षमसौ सर्वास्वेव परीक्षासु लब्धप्रथमस्थानः काव्यव्याकरणालङ्कारस्मृतिश्रुतिपुराणादि-निखिलशास्त्रपारङ्गमः प्राप्तसर्वाचार्यगणसविशेषप्रशंसावादो गच्छता कालेन विद्यासागर इति महतो महीयांसमुपाधिमलङ्कृतवान्। आसीदसौ परममातापितृभक्तः शिक्षकगणभक्तियुक्तः परमसुशीलः सच्चरित्रः खर्वकाय - सितवर्णो बालकः। बाल्ये वयसि विद्यमाने तस्मिन् तद्विद्यावत्ताप्राप्त-परिचयेनाचार्यकुलचूडामणिना प्रोक्तम् "ईश्वरसदृश! ईश्वर! कालेन प्रतिभाशालिना लब्धकीर्त्तिना भवितव्यं त्वये"ति। अथासौ समापितवरिष्ठ-विद्यालयपाठः संस्कृतकलेजाध्यापकपदवीमलञ्चकार। तत्रासौ कतिपयवत्सराण्यवस्थाय सर्वोच्चाध्यक्षपदं लेभे, समुचितदक्षतया च वर्षषट्कं तत्पद-मलङ्कृतवान्। तदा च तत्सुचारुसुनिपुणशिक्षापद्धतिमवलोक्य विमुग्धाः सर्वे छात्रा अध्यापककुलतिलकमहोदयाश्च। प्रातःस्मरणीय-परमश्रद्धा-भक्तिप्रीतिभाजन-तत्कालीन-प्रधानतमशासकः ह्यालिडे इत्यभिहितः श्वेत-कायपुङ्गवस्तस्मिन् नितरां स्निह्यति स्म। तदसाधारणस्वाधीनभावतया,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असाधारणकर्त्तव्यज्ञानेन, विद्यावत्तया अलोकसामान्यभुवनतलदुर्लभप्रतिभा-सम्पत्त्या चासौ परमविस्मयरसाप्लुतो बभूव, नितरां च तस्मिन् तुतोष। श्रूयते तावदियं कथा—एकदा लम्बमाने दिवाकरे, तच्चरमरश्मिजाल समुच्छ्वसिते चाशामुखे, भागीरथीनिर्झरसलिलमुखरितायां कलिकाता-नगर्यां स्वस्वकुलायं प्रयाते विहगकुले, हाम्बारवमुखरित-गोष्ठगेह-प्रत्यागमनोत्सुके धेनुकुले गोपालकमोहनमुरलीध्वनिमुखरिते च दिङ्मण्डले विद्यासागरः प्रतिभाचन्द्रावतंसः स्वदेशमुकुटमणिर्विद्यासागरः चर्मपादुका-मात्रं परिधाय सरलानाडम्बरवेशः शासकप्रवरतुषारधवलतोरणपार्श्व-माससाद। तदा प्रहरी प्राकृतजनोचितवेशसज्जितं जनमेकमवलोक्य तस्यान्तः प्रवेशं नानुमोदितवान्। अथ वलभीदेशोत्सङ्गाच्छासकतिलको दृष्ट्वा तं मनीषितिलकं तत्क्षणादेव द्वारपालं "प्रवेशय तावदमुमि"त्यकथ-यत्। अथासौ तेन सह सुचिरं राष्ट्रसंक्रान्तविविधालापान् कृतवान्, अन्यांश्च उच्चपदस्थजनान् सर्वान् व्यसर्जयत्। एकदा तेन सह कस्मि-श्चिद् विषयेऽधिकारिणां मतद्वैधं सञ्जातम्, तेनाहतसम्मानोऽसौ पञ्चशत-मुद्रादासत्वमप्यनायासेन परितत्याज। ततः प्रभृत्यसौ "सीतावनवास-वेतालपञ्चविंशत्यनुवादशकुन्तलोत्तरचरितानुवादप्रथमद्वितीयभागबोधोदयेति-हासप्रभृतीनि पुस्तकानि व्याकरणकौमद्युपक्रमणिकादीनि पुस्तकानि च सर्वाणि विरचय्य कीर्त्तिमतुलामुपलेभे, ततः प्रभृति पौर्णमासीशशधर इव तत्कीर्त्तिवल्ल्या दिङ्मण्डलं व्यानशे। स हि पण्डितकुलमुकुटमणि-र्वङ्गभाषाजनयितेत्यभिधीयते। व्याकरणकौमुदीविरचनं हि तस्यान्यतमा कीर्त्तिः, स चेत् तत्पुस्तकं नारचयिष्यत् तेन एतैरेवाहोभिः प्रायेण लुप्त-प्रायाऽभविष्यत् सुरसरस्वती।

असति तस्मिन् वङ्गभाषापि लुप्तप्रभावा अनाथा विधवा रमणीव अरो-दिष्यत्, तेनैव हि तत्तद्भाषासु प्राणास्तावत् सञ्चारिताः। अहो तन्नैपुण्यम्, मधुरविलक्षणप्रगाढरचनाचातुर्यम्, सुललितपदरचनाभङ्गी; असाधारण-चातुरी च। किमिव माधुर्यमयाणि हि महापुरुषचरितानि, यतः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥" (उत्तरचरितम्)
उक्तश्च कविमुख्येन कालिदासेन—
"न प्रभातरलं ज्योतिरुदेति वसुधातलात्"

अथासौ विधवाविवाहप्रचलनव्यापारे आत्मानं नियोजयामास, कथञ्चिच्च साफल्यमभजन्नस्य प्रयत्नाः। अनाथेषु दरिद्रेषु चासीत् तस्य असाधारण-करुणा, कति नामानाथा विधवा निःसहाया जनाश्च तत्साहाय्यलाभा-नन्दिता बभूवुः, तद्धि अवर्णनीयम्। श्रूयते तावदिदमुपाख्यानम् :— एकदासौ दयार्णवः करुणानिधिर्विद्यासागरो मार्गमतिक्रामति स्म। तदा मार्गाभ्यासे कश्चिद् विवर्णवदनः शीर्णशरीरः खर्वकायो जराभार-प्रशिथिलकलेवरो विसूचिकारोगग्रस्तः अनवरतमुद्वमन् जनस्तन्नयनपथ-पथिको बभूव। अन्यः कोऽपि जनस्तमवलोक्य मुखं परावृत्यागमिष्यत्, परं नासीत् तादृग् विद्यासागरः। स तमुत्सङ्गतले स्थापयित्वा स्वगृहं च नीत्वा तच्छुश्रूषामकरोत्, तदसाधारणसेवया, अलौकिकशुश्रूषया, स्वर्गीयसुशीतलकरपल्लवस्पर्शेन मरणपथयात्री तद्रोगी प्राणानलभत। एवं कति नाम न विद्यन्ते तत्करुणाया निदर्शनानि। तस्य मातृभक्तिविषये श्रोत्रपथमायाति एतद्रमणीयोपाख्यानम् :—एकदा समुपागते तत्कनिष्ठ-विवाहोत्सवव्यापारे तन्मात्राऽसौ स्वदेशगमनायानुरुद्धः, परं प्रथमावेदनपत्रेण उपरितनकर्मचारी कश्चिच् श्वेताङ्गपुङ्गवस्तं गमनायानुमन्तुं नैच्छत, तत्-क्षणादसौ मातृभक्तश्रेष्ठो विराट्पुरुषः प्रचुरवर्त्तनयुक्ततत्कार्यत्यागाय कृतसङ्कल्पो बभूव, तद्दृष्ट्वाऽसौ तदात्व एव गमनमनुमतवान्। अथासौ महापुरुषः स्वदेशाभिमुखम् अमन्दगतिः प्रतस्थे। क्रमेण चासौ भैरवनादि-तरङ्गमालासङ्कुलपद्मिनीषण्डमण्डितदामोदरतीरमाससाद। तदा समुत्थितो हि प्रबलझञ्झावातः, धारासारैर्महती वृष्टिर्बभूव, मुहूर्त्तेन च धरित्री प्रलय-ङ्करश्याममूर्त्तिं दधार, समग्रावनितलं लोललेलिहानरसनापाशेन ग्रसितुं समुद्यता। एवम्भूते महाभयङ्कराशुभसमये प्रदोषतिमिरपटलसमाच्छन्ने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशामुखे न कापि तरणी तटिनीं तर्त्तुं समुद्यता। तदवलोक्य मातृभक्त्यैक-हृदयो विद्यासागरो लीलया स्रोतस्वतीमतिक्रमितुं कृताध्यवसायो बभूव, न किमपि तं व्यवसायादस्मान्निवारयितुं प्रबभूव। यतः—

"क ईप्सितार्थे स्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्"।

अथासौ कृती पुरुषः सन्तरणकुशलश्चिरात् तटान्तरमाससाद, क्रमेण चासौ मातृसन्निधानमासाद्य राजीवराजीराजितमोक्षलाभोपयुक्तत्चरणयोः पपात। माता च तमवलोक्य हर्षाश्रुपूर्णकमलदललोचना बभूव। अल-मतिविस्तरेण। भारताकाशोज्ज्वलतमनक्षत्रं भीष्म इव दृढप्रतिज्ञः, बृहस्पतिरिव सुपण्डितः, कविमानसहंसः, नारायण इव शङ्खचक्रलाञ्छनः, त्र्यम्बक इव धवलकान्तिरसौ नरशार्दूलस्त्रिनवत्यधिकाष्टादशशताब्देषु मरधाम विहाय अमराक्षयानुपमस्वर्गलोकमगमत्, तदासीत् सप्ततिपरो वृद्धः। आसीदसौ प्रियदर्शनो मधुरभाषी शान्तः शिष्टः सज्जनहृदयैक-चन्द्रमाश्छात्रजनबान्धवः समुद्र इव विराट् कायो हिमाद्रिरिव महान् जनः। तमवलोक्य मनसि भावोऽयं समुदेति :—

न हि मानुषेषु स्यादस्य नरस्य सम्भवः।
"न प्रभातरलं ज्योतिरुदेति वसुधातलात्" इति शाकुन्तले।*

———

* मद्विरचितसंस्कृतसाहित्यप्रसूनद्वितीयभागपुस्तकस्य प्रबन्धोऽयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्ममीमांसा

(पूर्वानुवृत्तिः)

[निबन्धकः—श्रीगोपालकृष्ण-वेदान्ताचार्यः]

त्रयो लोकास्त्रयो वेदा आश्रमाश्चत्वारोऽग्नयः।
एतेषां रक्षणार्थाय संसृष्टा ब्राह्मणाः पुरा ॥ इति।

आश्रमाश्चत्वार एव। वेदज्ञब्राह्मणेनान्यार्थं सम्पादितं तादृशब्राह्मणानुज्ञातं स्वयं सम्पादितं च कर्म सफलतां गच्छति। तदाह शातातपः।

जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि।
सर्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः॥
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः।
सर्वदेवमया विप्रा न तद्वचनमन्यथा॥
उपवासो व्रतश्चैव स्नानं तीर्थफलं तपः।
विप्रैः सम्पादितं सर्वं सम्पन्नं तस्य तत् फलम्॥

इति। केवलं वेदाध्ययनेनैव न परमार्थसिद्धिः, तदर्थानुगतानुष्ठानमपि कर्तव्यमित्याहोशना। यथा—

योऽधीत्य विधिवद् वेदं वेदान्तं न विचारयेत्।
स सान्वयः शूद्रकल्पः स पाद्यं न प्रपद्यते॥
न वेदपाठमात्रेण सन्तुष्टो वै द्विजोत्तमः।
पाठमात्रावसानस्तु पङ्के गौरिव सीदति॥ इति।

मनुरप्याह—

सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः।
नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी॥

सुयन्त्रितः शास्त्रनियमितः। वेदाध्ययनविरहितस्य ब्राह्मणस्य निन्द्यत्वमाहतुः शङ्खकात्यायनौ। तथाच—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाके पत्रे फले मूले वनवासे सदा रतः ।
निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ॥

मुनिर्ब्राह्मण इत्यर्थः ।

वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत् ।
सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥

द्विजशब्दोऽत्र ब्राह्मणवाचकः । विप्रब्राह्मण इत्यर्थः स्वभावापन्नत्वान्न पुनरुक्तिः ।

अस्त्राहताश्च धन्वानः संग्रामे सर्वसम्मुखे ।
आरम्भे निर्जिता येन स विप्रः क्षत्र उच्यते ॥
कृषिकर्मरतो यश्च गवाञ्च प्रतिपालकः ।
वाणिज्यव्यवसायश्च स विप्रो वैश्य उच्यते ॥
लाक्षालवणसम्मिश्रकुसुम्भक्षीरसर्पिषाम् ।
विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते ॥
चौरश्च तस्करश्चैव सूचको दंशकस्तथा ।
मत्स्यमांसे सदा लुब्धो विप्रो निषाद उच्यते ॥

चौरः स्वामिनोऽज्ञातसारेण धनहारकः । तस्करो बलाद्धनापहारी। सूचकः कुपरामर्शदाता । दंशकः कटुभाषी ।

ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्वितः ।
तेनैव स च पापेन विप्रः पशुरुदाहृतः ॥
वापीकूपतडागानाम् आरामस्य सरःसु च ।
निःशङ्कं रोधकश्चैव स विप्रो म्लेच्छ उच्यते ॥

आराम उपवनम् , रोधकः साधारणव्यवहारप्रतिबन्धक इत्यर्थः ।

क्रियाहीनश्च मूर्खश्च सर्वधर्मविवर्जितः ।
निर्दयः सर्वभूतेषु विप्रश्चण्डाल उच्यते ॥

इति । ज्ञातव्यान्तराणि आश्रमधर्मविवरणे वक्ष्यन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ क्षत्रियधर्मः ॥

तत्र विष्णुस्तेषाञ्च धर्मा इत्युपक्रम्याह क्षत्रियस्य शस्त्रनित्यता द्विजानां यजनाध्ययने। अथैषां वृत्तयः क्षत्रियस्य क्षितित्राणमिति। अत्र शस्त्र-नित्यता इत्यनेन क्षत्रियस्य सर्वथैव रक्षाधिकारित्वमुक्तम् क्षतात् त्राणात् क्षत्रियत्वमित्यर्थनिर्वचनात्। ब्राह्मणवैश्ययोस्तु शस्त्रधारणमापदि प्रयोजन-विशेषे वा। अतस्तेषां तस्यानित्यता। तथा चाह वशिष्ठः—आत्मत्राणे वर्णसंस्कारे वा ब्राह्मणवैश्यौ शस्त्रमाददीयाताम्, क्षत्रियस्य तु तन्नित्यमेव रक्षणाधिकारादिति। यजनाध्ययनयोस्तु ब्राह्मणादित्रयाणामेव साधारण-धर्मत्वादुक्तं द्विजानां यजनाध्ययने इति। एतेन क्षत्रियवैश्ययोरध्यापन-याजननिषेध एवेत्यायातः। याज्ञवल्क्येन पुनरेतत् स्पष्टत एवोक्तम्। तथाच—

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथेति ॥

अत्रिस्तु क्षत्रियवैश्ययोर्याजनाध्यापनादीनां पातित्यजनकत्वमाह। तथाच—

प्रतिग्रहोऽध्यापनञ्च तथाऽविक्रेयविक्रयः।
याज्यं चतुर्भिरप्येतैः क्षत्रविट्पतनं स्मृतम् ॥

इति। न च "ब्राह्मणादध्ययनमापत्काले विधीयते" इत्यादिमनुवचनात् क्षत्रियवैश्ययोरध्यापकत्वमापत्काल उक्तम्, आपत्कालत्वञ्च ब्राह्मणा-ध्यापकाभावपरत्वम्; तयोश्चाध्यापनस्य पातित्यजनकत्वे कथं ताव-ध्यापयेतामिति वाच्यम्, यतो ब्राह्मणस्य वृत्तित्वेन निर्दिष्टानि याजनाध्याप-नादीन्येवात्रिणा निषिध्यन्ते। याजनाध्यापनादिजन्यवृत्त्यग्रहणे तु क्षत्रिय-वैश्ययोरध्यापनादिकं न पातित्याय भवतीति। ब्राह्मणादीनां सर्वेषामेव वृत्तिं वक्तुकाम आह—अथैषां वृत्तय इति। क्षत्रियस्य वृत्तिमाह क्षत्रियस्य क्षिति-त्राणमिति। प्रजापालनमित्यर्थः। अत्रिस्तु धर्मवृत्ती अभेदेनाह। यथा—

क्षत्रियस्यापि यजनं दानमध्ययनं तपः।
शस्त्रोपजीवनं भूतरक्षणञ्चेति वृत्तयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र स्वजातिकर्त्तव्यत्वाभिप्रायेणोक्तम् । यत्तु शङ्खेनोक्तम्—

दानमध्ययनञ्चैव यजनञ्च यथाविधि ।
क्षत्रियस्य तु वैश्यस्य कर्मेदं परिकीर्त्तितमिति ॥

तत् पुनर्धर्मानुष्ठानाभिप्रायेणैव, न जीविकात्वेनापीति विज्ञेयम् ।

अथ क्षत्रियधर्मान्तर्भावाद्राजधर्मः संक्षेपेण विविच्यते । तथाच विष्णुः—अथ राजधर्माः । प्रजापरिपालनम् । वर्णाश्रमाणां स्वे स्वे धर्मे व्यवस्थापनमिति । राजसृष्टिमाह मनुः—

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य धर्मस्य राजानमसृजत् प्रभुः ॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥

इत्यादि । राजा सर्वथा श्रद्धेयः पूजनीयश्चेत्याह स एव—

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥

इति । वर्णाश्रमाणां स्वे स्वे धर्मव्यवस्थापनमिति यद्राजधर्म उक्तस्तत् पुना राजा दण्डेन कुर्यात् । तदाह मनुः—

स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणञ्च धर्मस्य प्रतिभुः स्मृतः ॥

इति । दण्डस्य शासकत्वं सर्वतो रक्षकत्वञ्चाह यथा—

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्मं विदुर्बुधाः ॥

सुप्तेषु निद्रितेष्वपि रक्षिवर्गेषु दण्ड एव केवलं जागर्त्ति । यतस्तद्भयादेव चौरादयो न प्रवर्त्तन्त इत्यर्थः । (क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat.

Executive Committee for 1936-37.

President.

Mahamahopadhyaya Durgacharan Sankhya-Vedantatirtha.

Vice-President.

Mahamahopadhyaya Anantakrishna Sastri.
,, Sitikantha Vachaspati.
,, Phanibhushan Tarkavagish
Dr. Adityanath Mukherjee, M. A., Ph. D.
Pandit Dwarikanath Nyayasastri.
,, Sitanath Siddhantavagish.
Raja Bhupendranarayan Singh Bahadur.

Secretaries.

Dr. Amareswar Thakur, Vedantashastri, M. A., Ph. D.
Sj. Jatindra Nath Basu, M. A., M. L. C.

Assistant Secretaries

Pandit Dinabandhu Sahityashastri.
,, Rasamay Chatterjee, M.A.
,, Ramkrishna Chakravartty, M. A.
,, Ashokanath Bhattacharjee, M.A, P.R.S., Vedantatirtha.

Members.

Pandit Jagadish Chandra Vedavyas.
,, Jaganmohan Jyotirvinod.
,, Bamapada Vidyaratna.
,, Dakshinacharan Bhattacharjee, M. A.
,, Janakinath Sahityashastri.
,, Kalipada Tarkacharyya.
,, Bamacharan Kavyatirtha.
,, Chintaharan Chakravartty, M. A., Kavyatirtha.
Pandit Jogendramohan Vidyaratna.
Pandit Dakshinacharan Bhattacharjee.
Sj. Kasinath Bhattacharjee, B. Sc. (Engr.)
Dr. Bhupendranath Basu, M.B.
Sj. Rajendra Narain Banerjee, B. L.
Pandit Chintamani Sahityacharyya.
,, Vanamali Vedantatirtha, M. A.
Sj. Kshitish Chandra Chakravartty, M. A., B. L.
Pandit Durgamohan Kavya-Sankhya-Puranatirtha, M.A.
,, Kalipada Vyakaranatirtha,
,, Kshitish Chandra Chatterjee, M. A.
Dr. Suniti Kumar Chatterjee, M. A., D. Lit.
Sj. Bhupati Roy Chowdhury, Kavyatirtha.
Sj. Brajendrakishor Bhattacharjee.
Pandit Upendramohan Sankhyatirtha.
,, Chandicharan Tarkatirtha.
Dr. Upendranath Ghoshal, M. A., Ph. D.
Sj. Ramaprasad Mukherjee, M. A., B. L.
,, Damodardas Khanna.
Kaviraj Bimalananda Tarkatirtha.
Sj. Prabodh Chandra De, I.C.S., Siddhantasindhu.
Sj. Prabodh Kumar Das, M.A., B.L.
Pandit Gaurinath Bhattacharjee, M. A., P. R. S.
Dr. Prabodh Chandra Bagchi, M. A., D. Lit.
Pandit Taranath Nyaya-Tarkatirtha.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SANSKRIT SAHITYA PARISHAT

Departmental Office-Bearer for 1936-37

Editor of the Journal

Mahamahopadhyaya Anantakrishna Shastri.

Asst. Editor of the Journal

Pandit Upendramohan Sankhyatirtha.

Librarian

Pandit Janakinath Sahityashastri.

Professor of the tol

Pandit Sitanath Siddhantavagish.

Dramatic Directors

Pandit Jaganmohan Jyotirvinod.

Pandit Bamapada Vidyaratna.

Dramatic Asst. Directors

Pandit Kshetranath Vidyaratna.

Sj. Kartic Chandra Chakravartty.

Sj. Brajendrakishore Bhattacharyya.

Music Master

Sj. Satish Chandra Datta.

Accountant

Pandit Ramkrishna Chakravartty, M. A.

Auditors

Sj. Janardan Chandra Chakravartty, B. Com., G. D. A., R. A.

Sj. Anathnath Ghosh.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

संस्कृतसाहित्यपरिषत्

Vol. XIX, No. 7] [November, 1936.

१८५८ शकीये कार्त्तिके १९श-वर्षस्य ७म-संख्या

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता ।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat.

Executive Committee for 1936-37.

President.

Mahamahopadhyaya Durgacharan Sankhya-Vedantatirtha.

Vice-Presidents.

Mahamahopadhyaya Anantakrishna Sastri.
,, Sitikantha Vachaspati.
,, Phanibhushan Tarkavagish
Dr. Adityanath Mukherjee, M. A., Ph. D.
Pandit Dwarikanath Nyayasastri.
,, Sitanath Siddhantavagish.
Raja Bhupendranarayan Singh Bahadur.

Secretaries.

Dr. Amareswar Thakur, Vedantashastri, M. A., Ph. D.
Sj. Jatindra Nath Basu, M. A., M. L. C.

Assistant Secretaries

Pandit Dinabandhu Sahityashastri.
,, Rasamay Chatterjee, M.A.
,, Ramkrishna Chakravartty, M. A.
,, Ashokanath Bhattacharjee, M.A, P.R.S., Vedantatirtha.

Members.

Pandit Jagadish Chandra Vedavyas.
,, Jaganmohan Jyotirvinod.
,, Bamapada Vidyaratna.
,, Dakshinacharan Bhattacharjee, M. A.
,, Janakinath Sahityashastri.
,, Kalipada Tarkacharyya.
,, Bamacharan Kavyatirtha.
,, Chintaharan Chakravartty, M. A., Kavyatirtha.
,, Jogendramohan Vidyaratna.
,, Dakshinacharan Bhattacharjee.
Sj. Kasinath Bhattacharjee, B. Sc. (Engr.)
Dr. Bhupendranath Basu, M.B.
Sj. Rajendra Narain Banerjee, B. L.
Pandit Chintamani Sahityacharyya.
,, Vanamali Vedantatirtha, M. A.
Sj. Kshitish Chandra Chakravartty, M. A., B. L.
Pandit Durgamohan Kavya-Sankhya-Puranatirtha, M.A.
,, Kalipada Vyakaranatirtha.
,, Kshitish Chandra Chatterjee, M. A.
Dr. Suniti Kumar Chatterjee, M. A., D. Lit.
Sj. Bhupati Roy Chowdhury, Kavyatirtha.
Sj. Brajendrakishor Bhattacharjee.
Pandit Upendramohan Sankhyatirtha.
,, Chandicharan Tarkatirtha.
Dr. Upendranath Ghoshal, M. A., Ph. D.
Sj. Ramaprasad Mukherjee, M. A., B. L.
,, Damodardas Khanna.
Kaviraj Bimalananda Tarkatirtha.
Sj. Prabodh Chandra De, I.C.S., Siddhantasindhu.
Sj. Prabodh Kumar Das, M.A., B.L.
Pandit Gaurinath Bhattacharjee, M. A., P. R. S.
Dr. Prabodh Chandra Bagchi, M. A., D. Lit.
Pandit Taranath Nyaya-Tarkatirtha.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

November, 1936. | १८५८-शकीये कार्त्तिके १९श-वर्षस्य ७म-संख्या | Vol. XIX No. 7

सर्वसाम्यवादः

[निबन्धकः—श्रीअनन्तकृष्णशास्त्री]

सर्वसाम्यवादमधिकृत्य महाभारते शान्तिपर्वणि राजोत्पत्तिप्रकरण एवमाम्नायते ।

युधिष्ठिरः—

य एष राजराजेति शब्दश्चरति भारत ।
कथमेष समुत्पन्नस्तन्मे ब्रूहि पितामह ॥
तुल्यपाणिभुजग्रीवस्तुल्यबुद्धीन्द्रियात्मकः ।
तुल्यदुःखसुखात्मा च तुल्यदृष्टिशिरोधरः ॥
तुल्यशुक्रास्थिमज्जा च तुल्यमांसासृगेव च ।
निश्वासोच्छ्वासतुल्यश्च तुल्यप्राणशरीरवान् ॥
समानजन्ममरणः समस्सर्वैर्गुणैर्नृणाम् ।
विशिष्टबुद्धीन् शूरांश्च कथमेकोऽधितिष्ठति ॥
कथमेको महीं कृत्स्नां शूरवीरार्यसंकुलाम् ।
रक्षत्यपि च लोकोऽस्य प्रसादमभिवाञ्छति ॥
एकस्य तु प्रसादेन कृत्स्नो लोकः प्रसीदति ।
व्याकुले चाकुलः सर्वो भवतीति विनिश्चयः ॥
एतदिच्छाम्यहं श्रोतुं त्वत्तो हि भरतर्षभ ।
सर्वं तन्मे यथातत्त्वं प्रब्रूहि वदतां वर ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैतत् कारणमत्यल्पं भविष्यति विशांपते ।
यदेकस्मिन् जगत्सर्वं देववद् याति सन्नतिम् ॥

भीष्मः—

नियतस्त्वं नरश्रेष्ठ शृणु सर्वमशेषतः ।
यथा राज्यं समुत्पन्नमादौ कृतयुगेऽभवत् ॥
नैव राज्यं न राजासीन् न दण्डो न च दाण्डिकः ।
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम् ॥
पालयानास्तथाऽन्योन्यं नरा धर्मेण भारत ।
दैन्यं परमुपाजग्मुस्ततस्तान् मोह आविशत् ॥
ते मोहवशमापन्ना मनुजा मनुजर्षभ ।
प्रतिपत्तिविमोहाच्च धर्मस्तेषामनीनशत् ॥
नष्टायां प्रतिपत्तौ च मोहवश्यास्तदा नराः ।
लोभस्य वशमापन्नाः सर्वे भारतसत्तम ॥
अप्राप्तस्याभिमर्शन्तु कुर्वन्तो मनुजास्ततः ।
कामो नामापरस्तत्र प्रत्यपद्यत वै प्रभो ॥
तांस्तु कामवशं प्राप्तान् रागो नामाभिसंस्पृशत् ।
रक्ताश्च नाभ्यजानन्त कार्याकार्ये युधिष्ठिर ॥
अगम्यागमनं चैव वाच्यावाच्यं तथैव च ।
भक्ष्याभक्ष्यं च राजेन्द्र दोषादोषं च नात्यजन् ॥
विप्लुते नरलोकेऽस्मिंस्ततो ब्रह्म ननाश ह ।
नाशाच्च ब्रह्मणो राजन् धर्मो नाशमथागमत् ॥
नष्टे ब्रह्मणि धर्मे च देवास्त्रासमथागमन् ।
ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः ॥
ब्रह्मणस्तु प्रणाशेन धर्मो व्यनशदीश्वर ।
ततस्तु समतां प्राप्ता मर्त्यैस्त्रिभुवनेश्वराः ॥
... ...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ देवास्समागम्य विष्णुमूचुः प्रजापतिम् ।
एको योऽर्हति मर्त्येभ्यः श्रैष्ठ्यं तं वै समादिश ॥
ततः सञ्चिन्त्य भगवान् देवो नारायणः प्रभुः ।
तैजसं वै विरजसं सोऽसृजत् मानसं सुतम् ॥
विरजास्तु महाभागः प्रभुत्वं भुवि नैच्छत ।
न्यासायैवाभवद् बुद्धिः प्रणीता तस्य पाण्डव ॥
कीर्तिमांस्तस्य पुत्रोऽभूत् सोऽपि मर्त्याधिकोऽभवत् ।
कर्दमस्तस्य पुत्रोऽभूत् सोऽप्यतप्यद् महत्तपः ॥
प्रजापतेः कर्दमस्य अनङ्गो नाम वीर्यवान् ।
प्रजानां रक्षिता साधुर्दण्डनीतिविशारदः ॥
अनङ्गपुत्रोऽतिबलो नीतिमानभिगम्य च ।
अभिपेदे महाराज्यमथेन्द्रियवशोऽभवत् ॥
प्राप्य नारीं महाभागां रूपिणीं काममोहितः ।
प्रख्याता त्रिषु लोकेषु या सा वेनमजीजनत् ॥
... ...
मन्त्रपूतैः कुशैर्जघ्नुर् ऋषयो ब्रह्मवादिनः ॥ इति ॥

एतैर्हि वचनैरिदमवगम्यते—यत् भारतवर्षमिदं कदाचन विना राजानं विना दण्डं विना च शिक्षकं स्वयं प्रजाभिरेव धर्मपरतन्त्रतामेवात्मनः परमस्वं मन्वानाभिः परिपाल्यमानमासीत्, यदा देवा अपि सर्वासां प्रजानां भूतिमेवान्वकाङ्क्षन्। यदा तु परस्परं परिपाल्यमानानां प्रजानां कामक्रोधलोभादिपारवश्यम्, धर्मस्यापि नियन्त्रणे प्रवृत्तिश्चोदपद्यत, समतां च प्राप्तुमभिलषन्ति स्म देवैरपि सर्वाः प्रजाः, तदा भीतभीताः सर्व एव देवा राज्ञः कस्यचन नियन्तुः त्रय्यान्वीक्षिकीवार्तानदीष्णस्य धर्मरक्षैकदीक्षस्य सर्जनार्थं ब्रह्माणं शरणं ययुः, यतः सर्वसाम्यवादोऽयं देवैरपि विपत्तयेऽमन्यत, इदानींतनास्तु स एव नाम भारतीयानामुन्नतय इति केचन नेतारो मन्यन्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वसाम्यवादोऽयं न केवलमगम्यागमनादिव्यवस्थाद्वारा जातिव्यवस्थाम्, किन्तु तत्तत्कुलमात्रविश्रान्तधनाधिकारं स्वस्वश्रद्धाशक्त्याद्यनुसारं स्वधर्मानुष्ठानसमादरं च दूरीकरोति, इति व्यवस्थापकसभायां सांप्रतिक्यामसवर्णाविवाहनियमनप्रस्तावः, कुलान्तरं गतानामपि स्त्रीणां निवृत्तपितृगोत्राणामपि पितृधनाधिकारनियमनप्रस्तावश्च मार्गान्तरेण नामान्तरेण वा साम्यवादमेवाङ्कुरयतः ।

जातिसंकरो हि—

"संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ।" इति भगवान मन्यते सर्वप्रजोपघातायेति, 'भगवानदास'स्तु—स एव नूनं सर्वासां प्रजानां समुन्नतय इति ॥

राजनीतिप्रकरणं हि शान्तिपर्वराजोत्पत्तिप्रकरणगतम्—

"अर्थशास्त्राद्धि बलवद् धर्मशास्त्रमिति स्थितिः ।"

इति नीतिमनुसरन्त्येव राजनीतिः सुखोदर्का, न तु तद्विपरीतेति गमयति, यतो वेनः स्वशासनावसरे मनूक्तरीत्या बहूनधर्मान् शास्त्रमप्युल्लङ्घ्य स्वसंकल्पमात्रेण नियमयन महतीं विपत्तिमभजदिति महाभारतवाक्यमेवात्रोद्धृतं प्रमाणयति ॥

विश्वसिमः—धर्मभूमिप्रथां भारतवर्षस्य महर्षिवर्यसुरक्षितो धर्मः, धर्मैकजीवितो भगवांश्च—धर्मो रक्षति रक्षितः"

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥"

इति वचनानुसारं सुरक्षिष्यतः येन धर्मैकजीवातवः श्रुति-स्मृति-पुराणेतिहास-काव्य-नाटकाख्यानकाख्यायिकादिसंस्कृतसाहित्यनिबन्धाः, तद्रक्षणैकदीक्षा संस्कृतसाहित्यपरिषच्च चिरं जीव्यासुः, सोत्साहाश्च संस्कृतसाहित्यपरिषतसदस्याः संस्कृतभाषाप्रचारैकदीक्षाणि सोदरसंस्कृतसाहित्यसंस्थानान्तराणि च कृतकृत्यानि धन्यधन्यमात्मानं मन्येरन् ॥

अन्ते पुनरिदं निवेदयामः—यत माकिमूनविंशतिवत्सरान सम्यक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतनैः पण्डितप्रकाण्डैरस्मत्सुहृद्वर्यैश्च श्रीकालीपदतर्काचार्यैः स्वनामधन्योत्साहमूर्तिपण्डितप्रवरश्रीक्षितीशचन्द्रचट्टोपाध्यायैश्च सम्यगेवोन्नतिं नीता संस्कृतसाहित्यपरिषत्पत्रिकेयं तेषामेव करुणाकटाक्षेण समुन्नतिमधिकां प्राप्स्यति, इति यथावसरं स्वपुत्रीतुल्यायामस्यां पत्रिकायां स्वीयगभीरार्थनिबन्धानां प्रकाशनेन तेऽपि नाम सम्यगुपकुर्वन्तु, सर्वतः प्रकाशतां चेयमेव नीतिः—

"न जातु कामाद् न भयाद् न लोभाद्
धर्मं जह्याद् जीवितस्यापि हेतोरि"ति

———

कोऽयमुत्पद्यते

[कलकत्ता विश्वविद्यालय-संस्कृतविभागाध्यक्षः
महामहोपाध्याय-श्रीविधुशेखरभट्टाचार्यः]

संस्कृतामृततृप्तेभ्यः पालिप्राकृतवाङ्मयम् ।
किं स्वदेतेति किञ्चित्तदुद्धृत्येह प्रदर्श्यते ॥
मिलिन्दो नाम राजाऽभूद् यवनाधिपतिः पुरा ।
तर्कातिकर्कशमतिः प्रतिस्पर्धिभयङ्करः ॥
स्वतन्त्रः स्वीयसिद्धान्ते बौद्धानां धुरि कीर्तितः ।
भदन्तो नागसेनोऽस्मै सर्वथाऽलंबभूव च ॥
यस्तयोरतिगम्भीरः संवादो विविधोऽभवत् ।
स्तोकमात्रं ततः किञ्चित् पालितोऽत्र समर्प्यते ॥

राजा आह—'भदन्त नागसेन! य उत्पद्यते स एव सः, उताहो अन्य एव ।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थविर आह। 'न च सः, न अन्यः।'

'औपम्यं कुरु।'

'तत्किं मन्यसे, महाराज! यदा त्वं दहरस्तरुणो मन्द उत्तानशाय्यभवः, स एव त्वमेतर्हि महान्।'

'न हि, भदन्त! अन्यः स दहरस्तरुणो मन्द उत्तानशाय्यभवद् अन्योऽहमेतर्हि महान्।'

'एवं सति खलु, महाराज! मातापि न भविष्यति पितापि न भविष्यति आचार्योऽपि न भविष्यति शिल्पवानपि न भविष्यति शीलवानपि न भविष्यति। किं नु खलु, महाराज! अन्यैव कललस्य माता अन्याऽर्बुदस्य अन्या पेश्या माता अन्या घनस्य माता अन्या क्षुद्रकस्य माता अन्या महतो माता। अन्यः शिल्पं शिक्षयते अन्यः शिक्षितो भवति। अन्यः पापकर्म करोति अन्यस्य हस्तपादौ छिद्येते।'

'न हि भदन्त! त्वं पुनर्भदन्त! एवमुक्ते किं वदेः।'

'अहमेव खलु, महाराज! दहरोऽभवं तरुणो मन्द उत्तानशायी, अहमेवैतर्हि महान्। इममेव कायं निश्रित्य सर्वे ते एकसंगृहीताः।'

'औपम्यं कुरु।'

'यथा, महाराज! कश्चित्प्रदीपं प्रदीपयेत्। किं स सर्वरात्रं दीप्येत।'

'आम्, भदन्त! सर्वरात्रं दीप्येत।'

'किं नु खलु, महाराज! या प्रथमे यामेऽर्चिः सा मध्यमे यामेऽर्चिः।'

'न हि, भदन्त!'

'या मध्यमे यामेऽर्चिः, सा पश्चिमे यामेऽर्चिः।'

'न हि, भदन्त!'

'किं नु खलु, महाराज! अन्यः सोऽभूत्प्रथमे यामे प्रदीपः, अन्यो मध्यमे यामे प्रदीपः, अन्यः पश्चिमे यामे प्रदीपः।'

'न हि भदन्त! तमेव निश्रित्य सर्वरात्रं प्रदीपः।'

'एवमेव खलु, महाराज! धर्मसन्ततिः सन्धत्ते (सन्धीयते)। अन्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्पद्यते अन्यो निरुध्यते । अपूर्वमचरममिव सन्धत्ते । तेन न च सः, न चान्यः पश्चिमविज्ञानसंग्रहं गच्छति ।'

'भूय औपम्यं कुरु ।'

'यथा, महाराज ! क्षीरं दुह्यमानं कालान्तरेण दधि परिवर्तेत । दधितो नवनीतम् । नवनीततो घृतं परिवर्तेत । यो नु, महाराज ! एवं वदेद्—यदेव क्षीरम्, तदेव दधि, तदेव नवनीतम्, तदेव घृतमिति । सम्यङ् नु खलु सः, महाराज ! वदन् वदेत् ।'

'न हि, भदन्त ! तदेव निश्रित्य सम्भूतम् ।'

'एवमेव खलु, महाराज ! धर्मसन्ततिः सन्धत्ते । अन्य उत्पद्यते, अन्यो निरुध्यते । अपूर्वमचरममिव सन्धत्ते । तेन न च सः, न चान्यः पश्चिमविज्ञानसंग्रहं गच्छति ।'

'कल्योऽसि, भदन्त नागसेन !'

राजा आह—'भदन्त नागसेन ! कः प्रतिसन्धत्ते[1] ?

स्थविर आह—'नाम-रूपं[2] खलु, महाराज ! प्रतिसन्धत्ते ।'

'किमिदमेव नामरूपं प्रतिसन्धत्ते ।'

'न खलु, महाराज ! इदमेव नामरूपं प्रतिसन्धत्ते । अनेन, महाराज ! नामरूपेण कर्म करोति शोभनं वा पापकं वा, तेन कर्मणा अन्यद् नामरूपं प्रतिसन्धत्ते ।

'यदि, भदन्त ! नेदमेव नामरूपं प्रतिसन्धत्ते, ननु स मुक्तो भविष्यति पापकेभ्यो धर्मेभ्यः ।'

'यदि न प्रतिसन्धीत, मुक्तो भवेत्पापकेभ्यो धर्मेभ्यः । यस्माच्च खलु, महाराज ! प्रतिसन्धत्ते, तस्मान्न मुक्तः पापकेभ्यो धर्मेभ्यः ।'

'औपम्यं कुरु ।'

'यथा, महाराज ! कश्चित्पुरुषोऽन्यतरस्य पुरुषस्याम्रमपहरेत । तमेत-

---

१ । प्रतिसन्धिं पुनर्जन्म गृह्णाति । जायते इत्यर्थः ।

२ । वेदना-संज्ञा-संस्कार-विज्ञान-स्कन्धा नाम । रूपस्कन्धो रूपम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माम्रस्वामिको गृहीत्वा राज्ञे दर्शयेत्—अनेन, देव ! पुरुषेण ममाम्राण्यपहृतानि । स एवं वदेत्—नाहं देवास्याऽऽम्राण्यपहरामि । अन्यानि तान्याम्राणि, यान्यनेन रोपितानि, अन्यानि तान्याम्राणि, यानि मयाऽपहृतानि । नाहं दण्डप्राप्तो भवेयम् । किं नु खलु, महाराज ! स दण्डप्राप्तो भवेत् ।

'आम्, भदन्त, स दण्डप्राप्तो भवेत् ।'

'केन कारणेन ?'

'किञ्चापि स एवं वदेत् । पूर्वम्, भदन्त ! आम्रमप्रत्याख्याय (जातेन) पश्चिमेनाऽऽम्रेण स पुरुषो दण्डप्राप्तो भवेत् ।'

'एवमेव खलु, महाराज ! अनेन नामरूपेण कर्म करोति शोभनं वा पापकं वा, तेन कर्मणाऽन्यन्नामरूपं प्रतिसन्धत्ते । तस्मान्न मुक्तः पापकेभ्यो धर्मेभ्यः ।'

'भूय औपम्यं कुरु ।'

'यथा, महाराज ! कश्चित्पुरुषोऽन्यतरस्य पुरुषस्य शालिमपहरेत् । इक्षुमपहरेत् । यथा, महाराज ! कश्चित्पुरुषो हैमन्तिके कालेऽग्निं ज्वालयित्वा सेवित्वा निर्वाप्य प्रक्रमेत । अथ खलु सोऽग्निरन्यतरस्य पुरुषस्य क्षेत्रं दहेत् । तमेवं क्षेत्रस्वामिको गृहीत्वा राज्ञे दर्शयेत्—अनेन, देव ! पुरुषेण मम क्षेत्रं दग्धमिति । स एवं वदेत्—नाहम्, देव ! अस्य क्षेत्रं दहामि । अन्यः सोऽग्निर्यो मयाऽनिर्वापितः, अन्यश्च सोऽग्निः, येनास्य क्षेत्रं दग्धम्, नाहं दण्डप्राप्तो भवेयम् । किं नु खलु, स महाराज ! दण्डप्राप्तो भवेत् ।'

'आम्, भदन्त ! दण्डप्राप्तो भवेत् ।'

'केन कारणेन ?'

'किं चापि स एवं वदेत् । पूर्वम्, भदन्त ? अग्निमप्रत्याख्याय (जातेन) पश्चिमेनाग्निना स पुरुषो दण्डप्राप्तो भवेत् ।'

'एवमेव खलु, महाराज ! अनेन नामरूपेण कर्म करोति शोभनं वा पापकं वा, तेन कर्मणाऽन्यन्नामरूपं प्रतिसन्धत्ते, तस्मान्न मुक्तः पापकेभ्यः कर्मभ्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'भूय औपम्यं कुरु ।'

'यथा, महाराज ! कश्चित्पुरुषः प्रदीपमादाय मालम् (गृहस्योपरिभूमिम्) अधिरुह्य भुञ्जीत । प्रदीपो ज्वलंस्तृणं दहेत् । तृणं दह्यमानं गृहं दहेत् । गृहं दह्यमानं ग्रामं दहेत् । ग्रामजनः पुरुषं गृहीत्वैवं वदेत्—कस्मात्त्वम्, भोः पुरुष ! ग्रामं दहसि । स एवं वदेत्, नाहं भो ग्रामं दहामि । अन्यः स प्रदीपाग्निर्यस्याहमालोकेनाभुञ्जि । अन्यस्तु सोऽग्निः, येन ग्रामो दग्धः । तौ विवदमानौ तवान्तिक आगच्छेताम् । कस्य त्वम्, महाराज ! अर्थं धारयिष्यसि ।

'ग्रामजनस्य, भदन्त !'

'किं कारणम् ?'

'किञ्चापि स एवं वदेत् । अपि च तत एव सोऽग्निर्निर्वृत्तः ।'

'एवमेव खलु, महाराज ! किञ्चाप्यन्यन्मरणान्तं नामरूपम्, अन्यत् प्रतिसन्धौ (पुनर्जन्मनि) नामरूपम् । अपि च, तत एव तन्निर्वृत्तम् । तस्मान्न मुक्तः पापकेभ्यः कर्मभ्यः ।'

'भूय औपम्यं कुरु ।'

'यथा,महाराज ! कश्चित्पुरुषो दहरां दारिकां वृत्वा शुल्कं दत्त्वा प्रक्रमेत । साऽपरेण समयेन महती स्याद् वयःप्राप्ता । ततोऽन्यः पुरुषः शुल्कं दत्त्वा विवाहं कुर्यात् । इतर आगत्यैवं वदेत्—कस्मात्पुनर्मे त्वम्, हंहो पुरुष ! भार्यां नयसीति । स एवं वदेत्—नाहं तव भार्यां नयामि । अन्या सा दारिका दहरा, या त्वया वृता च दत्तशुल्का च । अन्येयं दारिका महती वयःप्राप्ता मया वृता च दत्तशुल्का चेति । तौ विवदमानौ तवान्तिकमागच्छेताम् । कस्य त्वम्, महाराज ! अर्थं धारयिष्यसि ।'

'पूर्वस्य, भदन्त !'

'किङ्कारणात् ?'

'किञ्चापि स एवं वदेत् । अपि च तत एव सा महती निर्वृत्ता ।'

'एवमेव खलु, महाराज ! किञ्चाप्यन्यन्मरणान्तं नामरूपमन्यत्प्रतिसन्धौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामरूपम् । अपि च, तत एव तन्निर्वृत्तम् । तस्मान्न परिमुक्तः पापकेभ्यः कर्मभ्यः ।'

'भूय औपम्यं कुरु ।'

'यथा, महाराज ! कश्चित्पुरुषो गोपालकस्य हस्तात् क्षीरघटं क्रीत्वा तस्यैव हस्ते निक्षिप्य प्रक्रमेत—श्वो गृहीत्वा गन्तास्मीति । तदपरेद्युर्दधि सम्पद्येत । स आगत्यैवं वदेत्—देहि मे क्षीरघटमिति । स एवं वदेत्—अजानतो मे क्षीरं दधि भूतमिति । तौ विवदमानौ तवान्तिकमागच्छेताम् । कस्य त्वम् महाराजार्थं धारयिष्यसीति ।'

'गोपालकस्य, भदन्त !'

'किङ्कारणात् ?'

'किञ्चापि स एवं वदेत् । अपि च तत एव तन्निर्वृत्तम् ।

एवमेव खलु, महाराज ! किञ्चाप्यन्यन्मरणान्तं नामरूपम्, अन्यत् प्रतिसन्धौ नामरूपम्, अपि च तत एव तन्निर्वृत्तम् । तस्मान्न परिमुक्तः पापकेभ्यः कर्मभ्यः ।'

'कल्योऽसि, भदन्त नागसेन !'

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायसभा

(निबन्धकः—आर. रङ्गाचार्य-शिरोमणिः)

साक्षी	राजपुरुषः	अधिकरणिकः	कारावासी	उपाध्यायः

अधिकरणिकः — प्रथमो बालः
राजपुरुषः — द्वितीयो बालः
कारावासी — तृतीयो बालः
नीतिज्ञः — चतुर्थो बालः
साक्षिणः — पञ्चमाद् दशमान्ता बालाः

अधिकरणिकः। अयं कारावासी अतीतमिथुनमासस्य अष्टादशे दिने प्रातर्दशवादनसमये कक्ष्यायाः स्थण्डिले शीर्णान् कागदखण्डान् विकीर्णवानित्यमुं प्रत्यभियोगः प्राप्तः। असौ नामग्राहम् आहूयताम्।

(राजपुरुषः। रामम् उभाभ्यां रक्षिभ्यां बालाभ्यां पुरो नीयमानं प्रवेशयति सभाम्।)

अधिकरणिकः। कः प्रथमः साक्षी।

राजपुरुषः। पञ्चमो बालः। केशव ! केशव ! केशव !

केशवः। (प्रविश्य)अयमहं भोः।

रा। सत्यंकारमुच्चैरभिधीयताम्। सत्यं ब्रवीमि। नासत्यं ब्रवीमि। नातत्त्वं ब्रवीमि।

नीतिज्ञः। अपि जानीष इमं कारावासिनं प्रति यत्किञ्चित्।

के। आम्। जाने।

नी। किमिमं कारावासिनं कदापि नातिचिरात् त्वमपश्यः।

के। अपश्यम्।

नी। कदा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

के। अतीतस्य मिथुनमासस्याष्टादशे दिवसे।

नी। किं सत्यमपश्यः।

के। सत्यम्। अपश्यम्। नियतमात्मीयाभ्यां चक्षुर्भ्याम्।

नी। कुत्र त्वमपश्यः।

के। वीथ्याम्।

नी। तदायं किं कुर्वन्नासीत्।

के। पाठशालां गच्छन्नासीत्।

नी। तदानीं कियान् समयः।

के। तदा सार्धनवघटिकाः।

अधि। द्वितीयः साक्षी समाहूयताम्।

रा। षष्ठो बालः। माधव! माधव! माधव!

मा। (प्रविश्य) एषोऽस्मि भोः।

रा। सत्यं ब्रवीमीत्यभिधीयताम्।

मा। सत्यं ब्रवीमि भोः!

नी। किमिमं कारावासिनं कदापि त्वं दृष्टवान्।

मा। आम्। अतीतमिथुनमासस्य अष्टादशे दिने।

नी। कुत्र!

मा। कावेर्यास्तीरे

नी। तत्र किं कुर्वाणमपश्यः।

के। परिक्रीडमानम्।

नी। कः समयः।

के। दशवादनसमयः।

नी। अपि स्मरसि किं तद्दिनम् तदिति।

के। स्मरामि। तत् मिथुनसप्तदशदिनमिति।

अधि। असौ गच्छतु। तृतीयः समागच्छतु।

रा। सप्तमो बालः। कृष्णशर्मन्! (त्रिः)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रु। अयमहं सन्निहितः।

नी। कस्त्वम्।

क्रु। अहं विद्यार्थी।

नी। कस्तवाभिजनः

क्रु। तञ्जापुरम्

नी। किं पाठशालायां पठसि।

क्रु। आम्। भोः !

नी। कस्याम् ?

क्रु। संस्कृतविद्यायाः।

नी। कस्यां कक्ष्यायाम्

क्रु। पञ्चम्याम्

नी। किम्।

क्रु। पाणिनीयम्।

नी। किं त्वमिमं कारावासिनं जानासि।

क्रु। आम्।

नी। कथम्।

क्रु। मदीयः सतीर्थ्यः किल।

नी। किमयमतीतमिथुनमासस्याष्टादशे दिने पाठशालायां संनिहित आसीत्।

क्रु। आम्। संनिहितः।

नी। कदा।

क्रु। यदायं पाठशालाया द्वारं प्रविशन्नासीत्।

नी। तदा कः समयः।

क्रु। पादोनदशवादनसमयः।

नी। कतमत् तद्दिनम्। अपि जानीषे—अष्टादशम्, उत सप्तदशम्।

क्रु। नियतमष्टादशम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधि। चतुर्थः साक्षी।

रा। अष्टमो बालः। वरद! (त्रिः)

व। अयमहं भोः स्वामिनः।

रा। सत्यं ब्रवीमीत्यभिधीयताम्।

व। सत्यं ब्रवीमि

नो। किं त्वमिमं कारावासिनं वेत्सि?

व। आम्।

नी। कथम्।

व। प्रत्यहमनेनैव सह पाठशालां यामि।

नी। कदा।

व। उपदशवादनतः।

नी। पाठशालायां कथमसौ आचरति।

व। कदाचित्पठति। कदाचिद्विहरति। कदाचिद् गायति।

नी। किं पाणौ धरन विहरति।

व। पुस्तकम् कागदखण्डान वा।

नी। कुत्र।

व। कक्ष्याया द्वारे, बहिः, अन्तश्च।

अधि। पञ्चमः साक्षी।

रा। नवमो बालः। शङ्कर! (त्रिः)

शं। भोः। अयमञ्जलिः।

रा। सत्यं वदामीत्युच्यताम।

शं। सत्यं वदामि।

नी। किमिमं कारावासिनं पाणौ कागदखण्डान धरन्तमपश्यः।

शं। अपश्यम।

नी। कदा।

शं। यदायं मां दृष्ट्वा हो हीति हसन् कक्ष्यायाम् अन्तः प्रविवेश।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधि। अन्यः साक्षी।

रा। दशमो बालः। गोपाल! (त्रिः)

गो। अयमहं भोः।

नी। किं कदापि त्वं पाठशालायां विकीर्णान् कागदखण्डान अपश्यः।

गो। अपश्यम्

नी। कस्मिन् दिने

गो। मिथुनमासस्याष्टादशे दिने

नी। तदायं कारावासी कुत्र गच्छन्नासीत्।

गो। कक्ष्याया बहिर्निःसरन्नासीत्।

अधि। कोऽन्यः साक्षी।

रा। नारायणः। नारायण! (त्रिः)

(नारायणः सभां प्रविश्य साञ्जलिः)

नी। कदा त्वं पाठशालां गच्छसि।

ना। अन्येषां बालानामागमनात्पूर्वमेव।

नी। तदा के तत्र सन्निहिताः।

ना। एकद्वा बालाः।

नी। किमयं कारावासी तदा तत्र संनिहितः।

ना। आम्।

नी। तदानीमयं किमाचरन्नासीत्।

ना। कक्ष्याया अन्तरुपविशन्नासीत्।

नी। किमयमेकः। उत अन्योऽपि।

ना। अयमेक एव।

कारावासी। भो भो अधिकरणमिश्राः। नाहं तथा अकरवम्। नाहं कागदखण्डान विकीर्णवान।

अधिकरणिकः। अहो! साक्षिणः सर्वेऽपि सम्यक् परीक्षिताः। सर्वेऽपि प्रायश एकवाक्यं ब्रुवते। तत्राहं विश्वसिमि। तस्मादमुं कारावासिनं रामं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डयं पश्यामि। अयं दण्डो विधीयते। अद्य प्रभृति सप्त दिनानि इयं कक्ष्या अनेन प्रतिदिनं प्रातः सम्मार्जनीया। * (निष्क्रान्ताः सर्वे:)।

———

धर्ममीमांसा

(पूर्वानुवृत्तिः)

[निबन्धकः—श्रीगोपालकृष्ण-वेदान्ताचार्यः]

शास्त्रानरूपितो दण्डः सर्वथा विधेयः। अन्यथा तस्य निन्द्यत्वमाह यथा—

समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः॥ इति।

अत एव लोकस्थितिमुद्दिश्य वर्णाश्रमधर्मरक्षणाय च लोकसृष्टिं विधाय दण्डमपि सृष्टवान परमेश्वरः। तदाह मनुः—

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।
ब्रह्मतेजोमयं दण्डमसृजत् परमेश्वरः॥
तस्य सर्वाणि भूतानि स्थावराणि चराणि च।
भयाद् भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च॥

इति। तस्यार्थे इति॥ तस्य राज्ञः प्रयोजनसिद्धय इत्यर्थः। आत्मजमित्यनेन च धर्मस्वरूपं पुत्रमित्यर्थो विवक्षितः। ब्रह्मतेजोमयमिति ब्रह्मणस्तेजस्तेन

---

* कारावासी तु रामः सन्तुष्ट एव स्यात्, यतोऽधिकरणिकोऽपि स-पादधूलिकाकदखण्डादीनां शीर्णानां सप्ताहं संमार्जनव्याजेन विकरणव्यवस्थापनेनाधिकं शिक्षितः स्यात्, न्यायसभाया अवसरान्तरे, यदा रामो न्यायाधिपतिः स्यात्, प्रथमो बालश्चाभियुज्येत। (सः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्मितमपाञ्च भौतिकम्, तेजोमयमित्यर्थः। तस्येति॥ दण्डस्य भयादित्यनेनान्वयः। क्षत्रियाणां प्रजापालनस्य प्राशस्त्यमनुत्तमधर्मत्वञ्चाह हारीतः—

राज्यस्थः क्षत्रियश्चापि प्रजा धर्मेण पालयन्।
कुर्यादध्ययनं सम्यग् यजेद् यज्ञान् यथाविधि॥
धर्मेण यजनं कार्यमधर्मपरिवर्जनम्।
उत्तमां गतिमाप्नोति क्षत्रियोऽप्येवमाचरन्॥ इति।

पराशरश्चाह—

क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रचण्डवत्।
विजित्य परसैन्यानि क्षितिं धर्मेण पालयेत॥ इति।

अत्रिस्तु राज्ञां प्रजापालनस्य यागादिविहितधर्मेभ्योऽपि श्रेष्ठत्वमाह। यथा—

यत् प्रजापालने पुण्यं प्राप्नुवन्तीह पार्थिवाः।
न तु क्रतुसहस्रेण प्राप्नुवन्ति द्विजोत्तमाः॥ इति।

द्विजोत्तमा ब्राह्मणा इत्यर्थः। याज्ञवल्क्योऽपि क्षत्रियाणां प्रजापालनस्यैव प्राधान्यमाह। तद् यथा—

प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्।
कुसीद-कृषि-वाणिज्यं पाशुपाल्यं विशः स्मृतम्॥ इति।

क्षत्रियाणां युद्धे मरणमपि स्वर्गाय भवति। यदाह विष्णुः—

नास्ति राज्ञां समरे तनुत्यागसदृशो धर्मः इति। पराशरोऽप्याह—

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदकौ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखे हतः॥
यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः।
अक्षयाँल्लभते लोकान् यदि क्लीबं न भाषते॥ इति।

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्ता

नवमः परिच्छेदः

तद् दिनमारभ्येयमाशा विजयाया मनस्यनुक्षणं तृष्णेवाभूज्जागरिता, यत् अपरिचितः स जनो गमनात् पूर्वमन्ततः सकृदपि तस्य बन्धुना सहानुनेतुमागमिष्यतीति। यावत्यः कथास्तेषामभूवन्, सर्वास्तास्तस्या अन्तरनुस्यूता जाताः, तासामेकमक्षरमपि सा न प्रास्मरत्। सा तानि मनस्यहर्निशं पर्यालोच्याबुध्यत, यत् सा तादृशीमेकामपि वाणीं नोदैरयत्, यया तत्सविधे आशास्थानं तद्बन्धोरेकान्तत एव किञ्चन नास्तीति तस्य प्रतीतिरुपजायेत। परं स्फुटमेव तस्या मनसि जागर्ति, यन्नरेन्द्रस्तस्याः पितृबन्धुपुत्र इति सा प्राकाशयत्, समयत ऋणनिर्यातनस्य सामर्थ्यमस्ति न वेत्यपृच्छच्च ; एवं स्थिते यस्य सर्वस्वं नाशोन्मुखं वर्तते, तस्यैतावतापि किं कश्चन प्रतिकारविषयो नासीत्! यत्र कापि प्रत्याशा न वर्तते, तत्राप्यात्मीया बन्धवश्च यत्नविधानमुपदिशन्ति। तथा सति तस्य बन्धुरयं किमेकान्तत एव सृष्टेर्वहिर्भूतः ?

नदीतीरस्य पथि न पुनः साक्षात्कारोऽभूत्। परं सा प्रातरारभ्य सन्ध्यापर्यन्तं प्रत्यहमिमामाशामपुषत्, यत् कदाचित् स आगमिष्यत्येव। परं दिनं गच्छति,—नागतं तेन, नागतं तस्याद्भुतेन चिकित्सकबन्धुना।

वृद्धेन रासविहारिणा साक्षात्कारे, स इतोऽन्तरा पुत्रेण सह कापि वार्ता जातेत्यस्याभासमात्रमपि न प्राकटयत्। परमिङ्गितेनेममेवाभिप्रायं प्रकाशयति, यत् सङ्कल्पो भूयसा सिद्ध एव। इदमाश्रित्यान्यविधं किञ्चनान्दोलनं भवितुमर्हतीति न तस्य मनसि जागर्तव्यमिव। विजया स्वयमपि सङ्कोचवशात् कथां नोत्थापयितुमशकत्। आग्रहायणोऽवसितः, पौषस्य प्रथमदिन एव पितापुत्रौ सहैवादृश्येताम्। रासविहारिणोक्तम्, मातर्नातोऽधिकं दिनं वर्तते, एतदवकाश एव सर्वं सुसज्जित-सुविहितं कर्तव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् सत्यं विजया किञ्चिद् विस्मिता सती प्राह, तत्र भवति स्वेच्छया गेहं विहायाप्रस्थिते तु किमपि न भवितुमर्हति।

विलासविहारी मौनमुद्रया ईषदहसत्,—तस्य पित्रोक्तम्, कस्य वार्तामात्थ मातः, जगदीशपुत्रस्य ? स तु ह्य एव गृहमजहात्।

वार्तेयं यथार्थत एव विजयाया वक्षसोऽन्तस्तलपर्यन्तमाहतवती। सा तदात्व एव विलासात्तथा परावर्तत, यथा स कथमपि तस्या आननं नावलोकितुमर्हेत। इत्थं क्षणं स्तब्धा सती तमाघातं सुसहं विधाय शनैः रासविहारिणमपृच्छत, तस्य द्रव्यादीनां का वार्ता ? सर्वं गृहीत्वागात् ?

विलासः पृष्ठतः परिहासभङ्गया प्राह, सतां [वस्तूनां] मध्ये एका त्रिपदा खट्वासीत्, मन्ये तत्रैव तस्य शयनं निष्पद्येत, मया सा बहिर्वृक्षमूले न्यक्षिप्यत, तेन यथाभिलषितं नेतुं शक्यते, कापि विप्रतिपत्तिर्नास्ति।

विजया तूष्णीमासीत्, परं तस्या मुखे वेदनायाः स्पष्टं चिह्नमालक्ष्य रासविहारी तिरस्कुर्वतेव कण्ठेन पुत्रमाह, विलास, अयन्ते दोषः। मानवो यथैवापराध्यतु, यावन्तं वा दण्डं भगवांस्तस्योपकल्पयतु, तस्य दुःखेनासमाभिर्दुःखीयितुं समवेदना प्रकाशयितुं युज्यते। न मयैतत् प्रतिपाद्यते, यत्त्वमन्तस्तदर्थं क्लेशं नानुभवसीति ; परं बहिरपि तत् प्रकाशयितव्यम्। अपि नाम जगदीशपुत्रेण साकं ते साक्षात्कारो जातः ? सकृन्मया सह साक्षात्काराय कथं न तमुक्तवानसि ? पश्येयम् यदि किञ्चन— ।

पितुर्वचनमवसानं नासादयत्,—पुत्रस्तस्येङ्गितमेकान्ततोऽपार्थं विधाय मुखे कञ्चन शब्दमुत्पाद्यावदत्, तेन साकं साक्षात्कृत्य निमन्त्रणमन्तरेण मम तु कर्मान्तरं नासीत्तातपाद ! त्वया किमुच्यते, तस्य निर्णयो नास्ति। अपरञ्च, मम गमनात् पूर्वमेव चिकित्सकपुङ्गवस्तस्य पेटिकां यन्त्रादिकञ्च संहृत्य प्रातिष्ठत। आङ्ग्लभूमेश्चिकित्सकः ! कश्चन काचितकः स्वयं-गर्वितोऽपदार्थः ! इत्युक्त्वा सोऽन्यदपि किञ्चन वक्तुं प्राक्रमत, परं रासविहारी विजयाया मुखं प्रति कूणितचक्षुषालोक्य क्रुद्धेन कण्ठेनावदत, मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावद् विलास, तवेदृश आलापो न मया मर्षणीयः। आत्मीयेन व्यवहारेण त्वया लज्जितव्यम् , अनुतप्तव्यम्।

परं विलासो लेशतोऽपि लज्जितोऽनुतप्तश्चाभूत्वा प्रत्याह, कथमिति शृणोमि ? परदुःखेन दुःखायितस्य परक्लेशनिवारणस्य च शिक्षा मम वर्त्तते, परं यः खलु दाम्भिको जनो भवनमागत्यावमत्य प्रयाति, तमहं न क्षमे। नैतावती भण्डता मयि वर्तते।

तस्योत्तरमाकर्ण्योभावेव साश्चर्यौ जातौ। रासविहारी प्राह—कः पुनस्त्वां भवनमेत्यावमतवान ? कमधिकृत्य त्वं ब्रवीषि ?

विलासो गाम्भीर्योपधिना प्राह, जगदीशमहोदयस्य सुपुत्रं नरेन्द्रमहोदयमेवाधिकृत्य ब्रवीमि तात ! स एवैकदाऽस्मिन्नेव गृह उपविश्य मामवमतवान। तदा तं नाभिज्ञातवानस्मीति— इत्युक्त्वेङ्गितेन विजयां निर्दिश्यावोचत्—अन्यथेमामपि सोऽवमन्तुं नोदासीत—अपिनाम ज्ञायते युष्माभिः सा वार्ता ?

चकितायां विजयायां मुखं प्रत्यावृत्यावलोकयन्त्यामेव विलासस्तामेवोद्दिश्य प्रोक्तवान, पूणमहोदयस्य भागिनेयत्वेनात्मानं प्रकाश्य यः खलु मामप्यवामन्यत, कस्तावत् सः ? यत्र नाम तदानीमतीव प्रश्रयं प्राकाशयः ! स एव नरेन्द्रमहोदयः। तदानीं स यदि आत्मीयमवितथं परिचयं प्रकाशयितुमुदसहिष्यत, तर्ह्येव तं पुमानिति वक्तुमशक्ष्यम्। भण्डः खलु कुतस्त्यः !

इत्युक्तवत्युभावेवापश्यताम्, विजयायो वदनमण्डलं मुहूर्तमन्तरा वेदनयैकान्ततो विशुष्कं विवर्णञ्चाभूत।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषदो विंशतिवर्षीयकार्यविवरणम्

[निबन्धकः—श्रीअमरेश्वरठाकुर-वेदान्तशास्त्री]

आदौ तावन्निखिलविद्याधिष्ठात्रीं वाग्देवीं भूयो भूयः प्रणम्य संस्कृत-साहित्यपरिषदः परिपोषकान् समागतान् सुधीवर्यांश्च यथायोग्यमभिवादन-प्रमोदपरिष्वङ्गं विज्ञाप्य सभापतिमहोदयस्य समाज्ञया संस्कृतसाहित्य-परिषदो विंशवार्षिककार्यजातं विवरीतुमुत्सहामहे ॥

प्रारम्भ एव सर्वजनपूजितानां भारतहितैकप्राणानां महामान्यानाम् अकाले कालकवलं गतानां सम्राड्महोदयाणां पञ्चमजर्ज-इत्येतेषां कृते गभीरः शोकः प्रकाश्यते। तज्ज्येष्ठसुतः अष्टम-एडओयार्ड इति नाम परिगृह्य राजसिंहासनं समारूढः, इति कोऽप्यनिर्वचनीय आनन्दः प्रकट्यते। अतः परं शोकभारपर्याकुलमानसैरस्माभिः परिषदं प्रत्यकृत्रिमम् अनु-रागं प्रकटितवतां केषाञ्चन महापुरुषाणां वियोगवार्त्ता भवतां पुरतः सम-वतार्यन्ते। ये नामासन् परिषदः सहकारिसभापतिपदमलङ्कुर्वाणा विद्या-चारित्र्यसमृद्धा नैयायिककेसरिणो महामहोपाध्यायपदभाजः कुञ्जविहारि-तर्कसिद्धान्तमहोदयाः, येऽप्यासन् परिषदः सहकारिसभापतिपदमधिरूढ-पूर्वा वैष्णवशिरोमणयो विद्वदग्रगण्यो महामहोपाध्यायपदभाजो भागवत-कुमारशास्त्रिमहोदयाः, येऽप्यासन् परिषदो भूतपूर्वाः सहकारिसभापतयः पाण्डित्येन विनयेन च लोकचित्तहारिणो विद्वद्वर्या राधारमणविद्याभूषण-महोदयाः, येऽप्यासन् परिषदोऽशेषहितसाधकाः शास्त्रीयग्रन्थसम्पादने आवि-ष्कृतपाटवाः स्मार्त्तप्रवराः कृष्णचन्द्रस्मृतितीर्थमहोदयाः, येऽप्यासन् परिषदः परमहितैषिणः स्मार्तधुरन्धरा दक्षिणाचरणस्मृतितीर्थमहोदयाः, ते सर्वे एव परिषत्संसृष्टानस्मान् दुःखमहाम्बुधौ निमज्जितान् कृत्वा द्युलोकं प्रस्थितवन्तः। परिषदः परमबान्धवानामेषां वियोगेन या हानिः संवृत्ता,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न जानीमः पुनस्तस्याः पूर्तिः कथं भविष्यतीति । वयमेषां पुण्यां गतिं तु कामयामहे ।।

मान्या भद्रमहोदयाः, विंशतिवर्षेभ्यः प्राग् अस्यामेव नगार्यां केषाञ्चन दरिद्राणामध्यापकानां छात्राणाञ्च प्रयत्नेन परिकल्पितेयं संस्कृतसाहित्य परिषत् । जानन्त्येव भवन्तः कीदृक् प्रयत्नो वर्त्तते सर्वदेव विद्वत्सु तत्तद्-देशीयभाषाणां समुन्नत्यर्थम् । या संस्कृतभाषा श्रुतिस्मृतिपुराणादिशास्त्राणां धात्रीरूपा, या च भारतीयभाषानिवहानां जननी, या भाषा सर्वावयव-परिपुष्टा सर्वसमृद्धिशालिनी, या भाषा सौन्दर्येण गौरवेण भावगाम्भीर्येण च जागतिकभाषाजातेषु कामपि प्रतिष्ठां किमपि वैशिष्ट्यञ्चाधिकरोति, या भाषा देवभाषेति भारतीयैरार्यैराद्रियते च पूज्यते च, या खलु भाषा तत्तत्प्रदेशवासिन आर्यान् एकस्मिन्नेव सूत्रे ग्रथितुं प्राभवत्, यया खलु भाषया निखिलानाम् आर्यधर्मावलम्बिनां आजन्ममरणानुष्ठानानि सम्पाद्यन्ते, तस्या भाषायास्तन्निबद्धसाहित्यस्य च संरक्षणप्रसारौ कर्त्तव्याविति संस्कृतसाहित्यपरिषत्प्रतिष्ठापकानामुद्देश्यमासीत् । तदुद्देश्यं साधयितुं परिषदियं काञ्चनोपायान् अवलम्बितवती । उपायेषु तेषु प्राधान्येन वर्तन्ते—

(१) साधारणसभाधिवेशनविधानम्, बाहुल्येन संस्कृतभाषया कार्याणां परिचालनम्, मासिकाधिवेशनेषु संस्कृतभाषोपनिबद्धानां निबन्धानां पाठश्च ।

(२) चतुष्पाठीसंस्थापनेन शास्त्राध्यापनम् ।

(३) ग्रन्थागारस्थापनम्, तत्र मुद्रितानां हस्तलिखितानाञ्च संस्कृत-ग्रन्थानां संरक्षणम् ।

(४) अप्रकाशितपूर्वाणां संस्कृतग्रन्थानां प्रकाशः ।

(५) संस्कृतभाषामय्याः पत्रिकायाः प्रचारः ।

(६) संस्कृतरूपकाभिनयः ।

(७) संस्कृतप्रतिष्ठानान्तरयोगः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८) शास्त्रव्याख्या च।

महाभागाः, उपायानिमानुपजीव्य परिषदियं विगते वर्षे किं किं कर्म कृतवती साफल्यञ्च कियल्लब्धवती, तत् सर्वं भवतां विज्ञानार्थम् उपन्यस्यते।

(१) सभाधिवेशनानि।

(क) वार्षिकसभा—विगते वर्षे सौराश्विनस्य सप्तमदिवसे 'युनिभार्सिटी-इन्ष्टिटिउट' इत्याख्ये भवने परिषद ऊनविंशवार्षिकमहोत्सवो यथारीत्यन्वष्ठीयत। तत्राऽऽध्यक्ष्यमासीत् सुगृहीताभिधानानां संस्कृतभाषायां संस्कृतशास्त्रे च श्रद्धावतां नसीपुराधिपानां राजेत्युपाधिमलङ्कुर्वाणानां श्रीमतां भूपेन्द्रनारायणसिंहमहोदयानाम्। विविधविद्यानिष्णातानां सुरभारत्यां श्रद्धाशीलानां संस्कृतसाहित्यरसलोलुपानाञ्च सामाजिकानां समागमेन परिषत् किमप्यपूर्वं गौरवं समधत्त। सभापतिमहोदयेन स्वर्गतानां विद्यासागरविद्यालयाध्यक्षाणां सारदारञ्जनरायमहोदयानां प्रतिकृतेरावरणोन्मोचनं कृतम्। महात्मनाममीषां विद्यावत्त्वं ग्रन्थसम्पादनापाटवं अन्यांश्च बहून् सद्गुणान् समुत्कीर्त्य बहव एव विद्वांसस्तत्र सामाजिकानां चेतांसि श्रद्धायुक्तान्यकुर्वन्। अन्ते च परिषत्सदस्यैर्भूतपूर्वपरिषदाचार्य-सुकवि-श्रीमत्कालीपदतर्काचार्यकृतस्य 'नलदमयन्तीयम्' इत्याख्यस्य रूपकस्याभिनयेन सर्वेषां चेतांसि समावर्जितानि समुपार्जिताश्च भूयांसः साधुवादाः। साध्वभिनयेन समाह्लादिताः केचन सामाजिका दमयन्तीन्द्रसेन-विदूषक-पद्मपाद-नल-कलिभूमिकास्ववतीर्णेभ्यः श्रीमद्भ्यः कामाख्याचरणभट्टाचार्य-सत्येशचन्द्रचक्रवर्त्ति-क्षेत्रनाथविद्यारत्न-प्रफुल्लकुमारवसुत-कार्तिकचन्द्रचक्रवर्त्ति-व्रजेन्द्रकिशोरभट्टाचार्येभ्यः पदकदानं प्रतिश्रुतवन्तः।

(ख) साधारणसभा—विगते वर्षे साधारणसभाधिवेशनानि दश सञ्जातानि। तत्र तत्र विपश्चिद्भिः सारगर्भाः संस्कृतभाषामया निबन्धाः पठिताः सम्यक् पर्यालोचिताश्च। तेषु केचन परिषत्पत्रिकायां प्रकाशमुपनीताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ग) कार्यनिर्वाहकसमितिः—विगते वर्षे कार्यनिर्वाहकसमिते-रेकादशाधिवेशनानि सञ्जातानि। तत्र तत्र तदधिकृताः प्रायः सर्व एव सदस्याः साग्रहं सम्भूय परिषदः कृत्यजातं सम्पादितवन्तः परिचालितवन्तश्च कर्तव्यमप्रमादेन।

(घ) विशेषाधिवेशनम्—विगते वर्षे सौरभाद्रस्याष्टाविंशदिवसे परिषत्-सदस्यानां सकलशास्त्रार्थकुशलानां सुगृहीतनामधेयानां प्रभातचन्द्रचक्रवर्त्ति-महोदयानाम् अकालमृत्युं निमित्तीकृत्य महामहोपाध्यायपदभाजां श्रीमतां दुर्गाचरणसांख्यवेदान्ततीर्थमहोदयानामाध्यक्ष्येण परिषद एकं विशेषाधि-वेशनं संवृत्तम्। अपरमपि विशेषाधिवेशनं संवृत्तमासीत्, तेषामेव सांख्य-वेदान्ततीर्थमहोदयानामाध्यक्ष्येण सौराश्विनस्य प्रथमदिवसे। तत्र राजकीय-संस्कृतकालेज इत्याख्यो विद्यालयः प्रेसिडेन्सीकालेज इत्याख्यो विद्यालयश्च सम्मिलितौ भवेतामिति प्रस्तावस्य प्रतिवादः कृतः।

(२) चतुष्पाठी—पण्डितप्रकाण्डानां परिषदाचार्याणां धीमतां सीतानाथसिद्धान्तवागीशमहोदयानाम् अध्यापनपाटवं बहूनेव विद्यार्थिनः परिषदं प्रति समाकृष्टानकार्षीत्, आलोच्यवर्षे काव्य-व्याकरण-दर्शनादि-शास्त्रेषु त्रिंशदधिकाश्छात्राः कृतपरिश्रमा वर्त्तन्ते, तेषु संस्कृत-एसोसियेसन-गृहीतविभिन्नपरीक्षासु षडेव समुत्तीर्णाः सञ्जाताः।

विद्यार्थिनः खलु गुरुगृहमेत्य तत एव आहार्यं वासस्थानञ्च आसाद्य विद्याग्रहणसौकर्यं लभन्त इति सुप्राचीनेयं भारतीया नीतिः। साम्प्रतम् अध्यापकानां दारिद्र्यातिशयेन क्रमशो विलोपमापद्यमानाया अस्या रीतेः कथञ्चित् संरक्षणार्थं परिषत् प्रतिवर्षं छात्रेभ्यो यथाशक्ति वृत्तिं प्रददाति। परन्त्विदानीमपि प्रयोजनानुरूपार्थागमविरहाद् वृत्तेः परिमाणं वर्धयितुं नैव परिषत् शक्नोति। अत्यन्तापेक्षितं छात्रावासनिर्माणं चिरादभीप्सितमपि नैव सम्भवति। अत्रार्थे वदान्यतमानां समवधानं कामयामहे। चतुष्पाठीसाहा-यकविधौ कलिकाता-कर्पोरेशन इत्याख्यसंसद् अस्मभ्यं विंशत्यधिकशतमुद्राः प्रायच्छत, एतदर्थं तदधिकृताः पुरुषा अस्माकं धन्यवादान् अर्हन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) ग्रन्थागारम्—ग्रन्थागारस्य परिपुष्टिः समुन्नतिश्च यावच्छक्ति विधीयेते। विगते वर्षे शताधिकसप्तनवतिसंख्याका मुद्रितग्रन्था विंशति-संख्याका हस्तलिखितग्रन्थाश्च ग्रन्थागारे संगृहीताः। अन्यत्र दुष्प्रापा बहवो ग्रन्था अत्र वर्तन्ते। अनुसन्धाननिरताश्छात्रा अध्यापका अन्ये च विद्वांसः स्वाभिमतग्रन्थप्राप्तौ प्रायो वैफल्यं न भजन्त इत्यनल्पमिदं प्रमोदपदं परिषत्-परिचालकवर्गाणाम्। परिषद्ग्रन्थानां सुविस्तृतं विवरणं यथा प्रकाशमुपा-गच्छेत, तदर्थमस्माभिः प्रयत्यते। परम् अर्थकृच्छ्रतानिबन्धनः प्रत्यूहः कथम-प्यतिक्रमितुं न शक्यते। कलिकाता-कर्पोरेशन-इत्याख्यसंसदः परिषद् विगते वर्षे ग्रन्थागारोन्नयनार्थं रौप्यकाणां सार्द्धषट्शतीं प्राप्तवती। अतस्तदधि-कृतेभ्यो हार्दिकान् धन्यवादान् वितरामः।

(४) ग्रन्थप्रकाशः—अर्थाभावेन ग्रन्थप्रकाशविधौ समुल्लेखार्हं किमपि कृत्यं निष्पादयितुं नाशक्नुम। परिषत्पत्रिकायां वररुचिकृता 'लिङ्गवृत्तिः' समाप्तिं गता, पृथग् ग्रन्थाकारेण प्रकाशिता च; अजयपालकृतो 'नानार्थसंग्रहः' पत्रिकायामेव मुद्राप्यमाणो वर्त्तते, सम्पूर्णतां नीतः सन् पृथग्ग्रन्थाकारेण प्रकाशं नेष्यते च।

(५) परिषत्पत्रिका—ऊनविंशतिवर्षान् यथारीति प्रचरद्रूपं संस्कृतसाहित्यपरिषन्नाम परिषदो मासिकं मुखपत्रं भारतवर्षीयनानाप्रदेश-वास्तव्यानां सुधियां निबन्धजातैः परिगुम्फितं विनोदयति संस्कृतरसास्वाद-लुब्धचित्तानां विदुषां चेतांसीति विदितमेव सर्वेषाम्। सप्त वत्सरान् यावदियं पत्रिका कलिकाता-विश्वविद्यालयाध्यापकेन नानाशास्त्रेषु लब्ध-प्रावीण्येन श्रीमता क्षितीशचन्द्रचट्टोपाध्यायमहोदयेन सम्पाद्यमाना बाहुल्येन तस्यैव लेखैरलङ्कृता संस्कृतपत्रिकानिवहेष्वनन्यविलक्षणां प्रतिष्ठाम् अर्जयन्ती वैशिष्ट्यं प्रतिष्ठाञ्च धत्ते इत्यत्र नात्युक्तिरस्माकम्। एष खलु सुधीप्रवरः पत्रिकात्रितयं स्वव्ययेन परिचाल्यापि एतां पत्रिकां एतावन्तं कालं नावधीरयति स्मेति महदाश्चर्यमेतत्। पत्रिकायाः समुन्नति-विधौ सर्वदैव समवधानमनेन प्रादीयत, साफल्यञ्च प्रयत्नानुरूपं लब्धमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतज्ञतानिर्भरेण चेतसा वयं तस्मै अशेषान् धन्यवादान वितरामः। इतः प्रभृति भारतविश्रुतनामानो महामहोपाध्यायपदभाजः श्रीमन्तः अनन्तकृष्ण-शास्त्रिमहोदयाः पत्रिकायाः सम्पादकपदं ग्रहीष्यन्ति। विज्ञातमेव परिषत्-सदस्यानाम्, यद् एत एव पण्डितधुरन्धराः पत्रिकाया प्रथमसम्पादका आसन, तेषामेव प्रयत्नेन पत्रिकाप्रकाशः आत्मानमलभ।

(६) रूपकाभिनयः—सुरभारतीं प्रति जनानामनुरागसञ्जननार्थं परिषदा तत्सदस्यैः रूपकाणामभिनयो विधीयते। अद्य यावत सप्तविंशति-संख्याकानि नाटकप्रहसनान्यभिनीतानि। तेषु अनेकान्येवानभिनीतपूर्वाणि। प्राचीननाट्यकलायाः समुत्कर्षसाधने सवत्रैव परिषत्सदस्या अपूर्वं नैपुण्यम् आविष्कृतवन्तः, येन वङ्गविषयेभ्यो बहिरपि तैरासादितः समादराति-शयः।

(७) प्रतिष्ठानान्तरयोगः—पूर्वेष्विव वर्षेषु विगते वर्षेऽपि पूर्ववङ्ग-सारस्वतसमाजाधानपरीक्षा परिषदः परिचालनेन निरपद्यत। अत्रा-स्माकं धन्यवादान वहन्ति काशीमबाजार-पलिटेकनिक-विद्यालयाध्यक्षः, यतस्ते तद्विद्यालयभवने परीक्षास्थानव्यवस्थां विहितवन्तः। संस्कृत-एसोसियेशन इत्याख्यसंसदापि परिषदो योगोऽस्ति। परिषदाचार्याः श्रीमन्तः सीतानाथसिद्धान्तवागीशमहोदयाः परिषद एव निर्वाचनं लब्ध्वा संस्कृत-एसोसियेशन इत्यस्य सदस्या वर्तन्ते। एते हि पण्डितवर्याः काउन्सिल इत्याख्य-समितेरपि सदस्या निर्वाचिताः। एतत्तु परिषदो महते गौरवाय, आशास्महे परिषदो गौरवं तत्र तत्र सभायां तैः सुरक्षितं स्यादिति।

(८) शास्त्रव्याख्या—मातृभाषायां शास्त्रार्थव्याख्याश्रवणसमुत्सुकानां तृप्तिविधानाय परिषद्भवने प्रतिसप्ताहं मातृभाषया शास्त्रव्याख्या प्रचलति, अत्राधिकृता वर्त्तन्ते विभिन्नशास्त्रेषु लब्धप्रवेशाः समासादितप्रावीण्याश्च श्रीमन्तो जानकीनाथशास्त्रिमहोदयाः। विगते वर्षे महाभारतीय-विराट-पर्व व्याख्यायते स्म। तद्व्याख्यया समागतानां शास्त्ररसपिपासूनां धीसु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनानां महान् उपकारस्तृप्त्यतिशयश्च समजायतामिति परिषदो महत् प्रमोदस्थानम्। मान्या महाभागाः, परिषदो विगतवर्षीया कृत्यावली भवतां सकाशे संक्षेपेणोपस्थापिता।

साम्प्रतं देशव्यापिन्यर्थकृच्छ्रता वर्त्तते। तेन परिषदो योऽर्थागम आसीत् सदस्यानां वृत्तिरूपेण, तस्य लाघवं सञ्जातम्। पूर्ववर्ष इव विगतवर्षेऽपि गवर्णमेण्टसकाशादस्माभिर्मुद्राणां पञ्चशती लब्धा। स्वल्पमेवेदं साहायकं प्रयोजनापेक्षया। कतिपयेभ्यो वर्षेभ्यः प्राङ् मुद्राणां सहस्रत्रितयमपि गवर्णमेण्टसकाशादलभ्यत। नातिचिरमेव कृत्यगौरवमुपलभ्य गवर्णमेण्ट अत्रार्थे सानुग्रहां दृष्टिं पातयिष्यतीत्याशास्महे। अपरं किञ्चन प्राप्तं साहायकमत्र समुल्लेखमर्हति। परिषदो विशिष्टसदस्याः श्रीमन्त उपेन्द्रनाथघोषालमहोदया वार्षिकोत्सवाभिनयदर्शनतृप्तचित्ताः परिषदे पञ्चविंशतिरूप्यकाणि प्रदत्तवन्तः। तेभ्योऽस्माकमान्तरिकान् धन्यवादान् प्रयच्छामः।

ये तावदपरे महात्मानो विगते वर्षे धनप्रदानेन ग्रन्थागारसमृद्ध्यर्थं ग्रन्थप्रदानेन च परिषदमनुगृहीतवन्तस्तेभ्यः, तथा यानि वृत्तान्तपत्राणि सामयिकपत्रिकादीनि च परिषदुदन्तजातप्रकाशनेनास्माकमुपकृतवन्तः, तदधिकृतेभ्यश्च कृतज्ञताविज्ञापनपूर्वकं शतशो धन्यवादान् वितरामः।

अर्थाभावप्रपीडिता परिषद् गृहकोषादृणमादाय अधुनापि कथञ्चित् कार्यं निर्वाहयति। अपेक्षितार्थागमविरहे परिषदः का गतिर्भविष्यतीति तु न जानीमः। परिषदः स्वकीयभवननिर्माणमत्यन्तमेवापेक्षितं वर्तते। भवनाभावाद् दिने दिने परिपोषमापद्यमानस्य सुविशालग्रन्थागारस्य तथा चतुष्पाठीविभागस्य च कृत्यावलीपरिचालना क्रमशो दुष्करतामवगाहते। महता प्रयत्नेन संगृहीतानां मुद्रितामुद्रितामूल्यग्रन्थरत्नानाम् तथा महतो द्रविणराशेर्विनियोगेन विनिर्मितानां तैलचित्राणाञ्च संरक्षणं संभविष्यति न वेति महतीयं चिन्ता समाक्रामत्यस्माकं चेतांसि। मनोहरपुकुरवर्त्मनि परिषदः स्वकीयमेकं भूमिखण्डं वर्तते, इति विदितमेव भवताम्। तच्चेत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषत्कर्मणि विनियुक्तं न स्यात्, ततोऽस्माकमधिकारो विलोपमापद्येतेति निर्दिष्टमासीत् इम्प्रुवमेण्ट इत्याख्यसमित्या। अतोऽस्माभिस्तत्र भूमौ प्रायः सहस्रमुद्राव्ययेनैकं कुटिरं निर्मापितम्, यत्र काचित् परिषच्चतुष्पाठी-शाखा प्रतिष्ठापिता भविष्यति तत्र च चतुष्पाठीशाखायाम् अध्यापकत्वेन वृताः पण्डितप्रवराः श्रीयुक्त-जानकीनाथशास्त्रिमहोदयाः।

मान्याः सदस्याः, भवद्भ्यः पुनरपि यथायोग्यमभिवादन-सम्भाषणादिकं विज्ञाप्य विरमामो वयम्। केवलं प्रार्थयामहे—सुरक्षन्तु भवन्तो भवदीयामेव कन्याकल्पां परिषदमिमामिति।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषदो विंशतिवर्षीयो महोत्सवः

(निबन्धकः—श्रीरामकृष्ण-चक्रवर्त्ती, एम्.ए.)

व्यतीते सौराश्विनस्य चतुर्दशविमिते बुधवारे सायं सार्धपञ्चवादन-समये युनिवार्सिटि इन्ष्टिट्यु ट् भवने संस्कृत-साहित्य-परिषदो विंशो वार्षिक-महोत्सवो महता समारम्भेण सुसम्पन्नोऽभूत्। सुपङ्गाधिपतेर्महाराजस्य श्रीमतो भूपेन्द्रचन्द्रसिंहमहोदयस्य नायकत्वेनानुष्ठितायामस्यां सभायां समवेतेषु परःसहस्रेषु सभ्येषूपरिष्टान्निर्दिष्टा महात्मानो विशेषेणोल्लेख-मर्हन्ति—महाराज-श्रीयुक्तयोगेन्द्रनाथरायमहोदयाः (नाटोर), राज-वाहादुर-श्रीयुक्तभूपेन्द्रनारायणसिंहमहोदयाः (नसीपुर), कुमार-श्रीशरत्कुमाररायमहोदयाः (दीघापातिया), महामहोपाध्यायाः श्रीयुक्त-दुर्गाचरण-साङ्ख्यवेदान्ततीर्थमहोदयाः। म० म० श्रीयुक्तफणिभूषण-तर्क-वागीशमहोदयाः, म० म० श्रीयुक्तानन्तकृष्णशास्त्रिमहोदयाः, म०म० श्रीयुक्त-सीतारामशास्त्रिमहोदयाः। म० म० श्रीयुक्त-शकलनारायणशास्त्रि-महोदयाः, म० म० श्रीयुक्त-विधुशेखरशास्त्रिमहोदयाः, श्रीयुक्त-रमा-प्रसादमुखोपाध्यायाः, डक्टर-श्रीयुक्त-सुनीतिकुमारचट्टोपाध्यायाः, डक्टर-श्रीयुक्त-उपेन्द्रनाथघोषालमहाशयाः, डक्टर-श्रीयुक्त-सातकडिमुखो-पाध्यायाः, डक्टर-श्रीयुक्ताशुतोषशास्त्रिणः, विश्वविद्यालयस्य गणिताध्या-पकाः सस्त्रीकाः फ्रेडारिक् लेभिमहोदयाः, अध्यापक-श्रीयुक्तरसमयभट्टा-चार्याः, अध्यापक-श्रीयुक्त-दुर्गामोहनसाङ्ख्यतीर्थाः, अध्यापक-श्रीयुक्त-वटुकनाथभट्टाचार्याः, पण्डित-श्रीयुक्त-कालीपदतर्काचार्याः, श्रीयुक्त-तारानाथन्यायतर्कतीर्थाः, श्रीयुक्तसीतानाथसिद्धान्तवागीशाः, कविराज-श्रीयुक्त-योगेन्द्रनाथतर्कव्याकरणषड्दर्शनतीर्थाः, भिषक्शिरोमणयः श्रीयुक्त-विमलानन्दतर्कतीर्थाः, रायवाहादुरश्रीयुक्तदेवेन्द्रनाथ-लाहिडीमहाशयाश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुगायकेन श्रीमता विष्णुपददत्तेन गीतेनोद्बोधितायां सभायां परिषदोऽन्यतरसम्पादकेन श्रीमता अमरेश्वरठाकुर-वेदान्तशास्त्रिणा पठितं परिषदो विंशवर्षीयकार्यविवरणम्। सहकारिसम्पादकान्तरेण श्रीमता-दीनबन्धुसाहित्यशास्त्रिणा च विंशवर्षीयाणां कार्यपरिचालकानां नामानि प्रकाशितानि। व्यतीतवर्षे श्रीमतः कालीपदतर्काचार्यस्य कृतौ नलदमयन्तीये रूपके आभिनयिके वस्तुन्युत्कर्षविशेषमाविष्कुर्वद्भ्यस्तेभ्यस्तेभ्यः शैलूषेभ्यस्तैस्तैर्महात्मभिः प्रतिश्रुतानि पदकान्यस्मिन्नेवावसरे सभापति-महोदयेन प्रविभक्तान्यासन्। समनन्तरञ्च सभापतिभिः स्वर्गतस्य कविराजशिरोमणेः श्यामादासवाचस्पतिमहोदयस्य प्रतिकृतिरुन्मोचिता।

परिषदोऽन्यतम-सह-सभापतेर्महामहोपाध्यायस्य डक्टर-भागवतकुमार-शास्त्रिमहोदयस्य, तथा परिषद आजीवन-सदस्यस्य भूस्वामिनः सूर्य-कान्तरायचतुर्धुरीण (टाकी) महोदयस्य च कृते शोकः प्रकाशितः। अतः परं सभापतिमहोदयेन स्वकीयमभिभाषणं प्रकटीकृतम्। तत्र च तेन संस्कृतशिक्षाया उन्नतिविधौ यतमानया संस्कृतसाहित्यपरिषदा (१) चतुष्पाठी (२) संस्कृतग्रन्थागारम् (३) अप्रकाशितसंस्कृतग्रन्थानां प्रकाशः (४) संस्कृतभाषया मासिकपत्रस्य प्रकाशः (५) संस्कृतभाषया प्रबन्धपाठ-समालोचने (६) शास्त्रव्याख्या (७) संस्कृतरूपकाभिनयश्चेत्येतेषु विषयेषु यन्नाम साधु प्रयत्यते तस्य भूयसी प्रशंसा कृता। स्वकीयस्य भवनस्या-भावेन दुष्प्रापाणां मुद्रितानाममुद्रितानाञ्च ग्रन्थानां संरक्षणं यादृशमसु-करमभूत्, तदुल्लिख्य च तेन परिषत् सदस्यैः क्रियमाणे गृहनिर्माणव्यवसाये समवेतानां भद्रमुखानां दृष्टिराकृष्टा। समुपस्थितया दैशिक्या दुरवस्थया समुत्पन्नाद् गवर्णमेण्टवृत्तेरेककालीनदानस्य च ह्रासात परिषदोऽवश्य-कर्तव्येष्वपि केषुचित् कर्मस्विदानीं महती बाधा जातेति तेन दुःखमान्तरिकं प्राकाशि।

डक्टर-श्रीयुक्ताशुतोषशास्त्रिणा सभापतेर्धन्यवादे प्रदत्ते सभाभङ्गो जातः। समनन्तरं परिषत्सदस्यैर्महाकवेर्भासस्य कृतेर्बालचरितनाटकस्य,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधायनकवेः कृतेर्भगवदज्जुकीयप्रहसनस्य चाभिनयेनानुरञ्जिताः सर्वे एव सदस्याः। बालचरिते वसुदेवस्य कंसस्य दामकस्य वृद्धगोपस्य चाभिनयः प्रशंसामभजत। परामेवानन्दकोटिमधिरूढाः समवेता दर्शका अभिनयदर्शनेन। आसमाप्ति सर्वे एव मन्त्रमुग्धा इव व्यराजन्निति शम्।

संदेशः

त्रिवाङ्कुरसंस्थानेऽवर्णानामपि मन्दिरप्रवेशव्यवस्था

त्रिवाङ्कुरसंस्थानेऽनन्तशयनाख्येऽवर्णानामपि मन्दिरप्रवेशाविरोधसमुद्घोषेण महाराजानामवर्णाः परिवर्तनपक्षपातिनः सुधारकाश्च केचन नितरामानन्दिताः, अपरिवर्तनवादिनश्च सनातनधर्मिणः प्रायेण सर्वे एव नितरां दुःखिताः, कोचिन्-(गोश्री)महाराजा अपि नितरामेव दुःखिताः, येषु मन्दिरेषु संस्थानद्वयस्यापि समोऽधिकारः, तेषां यावत्पुनरादेशमनुद्घाटनं व्यवस्थापयामासुः। 'पद्मनाभदासः' इति बिरुदमनन्तशयनमहाराजानामिदानीं बहुव्रीहिसमासेन घटते, यत्त्वेतत्-पर्यन्तं षष्ठीतत्पुरुषेणैव पूर्वतनैरनन्तशयनमहाराजैरात्मनोऽनुगुणममन्यत। अनन्तशयनसंस्थाननिवासिनो जनाः षष्ठीतत्पुरुषेणैव 'पद्मनाभदासाः' भवितार इति तु सुदृढोऽयमस्माकं विश्वासः, इतः परमपि—"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" "श्रुति-स्मृती ममैवाज्ञे" इति वचने एव समाद्रियमाणाः॥

महदिदमाश्चर्यनिदानम्—यद् धर्मभूमिभारतवर्षचक्रवर्तिपदमपि स्वनामधन्येनाष्टमैडवेर्डमहोदयेन स्वाभिलषितायाः स्त्रियाः कृते तृणाय मन्यते, प्रजात्वमेव च स्वस्यापि श्लाघनीयं मन्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं त्वानन्दनिदानमेव—यद् भारतवर्षचक्रवर्तिनोऽपिविवाहेऽवान्तर-विभागपरिपालननियमेन बद्धाः। विवाहोऽयं पाश्चात्यानामपि स्वावान्तरविभागनियमेनैव प्रचलतीति।

विश्वसिमः—सुगृहीतनामधेयाः श्रीमन्तोऽड् युक आफयार्कमर्यादया: चक्रवर्तिपदेऽवस्थाय धर्मस्यापि रक्षणे जागरूका भवितार इति।

१४।१२।३६

स्वागतम्

अभिनन्दयामो वयं सादरमेव पण्डितप्रकाण्ड-मीमांसाशिरोमणि-किञ्चवडेकर-वामनशास्त्रिणां संपादकत्वेनाचिरप्रकाशितां मीमांसाप्रकाशाख्यां गभीरार्थबहुलां मासिकपत्रिकां पुनानगरस्थयमीमांसामहाविद्यालयेन मीमांसाशास्त्रस्य सकल्पसूत्रस्य न केवलमध्ययनाध्यापनप्रकाराभ्याम्, किन्तु सम्यगेवाचरणप्रचारणप्रकाराभ्यामपि रक्षणैकदीक्षेण दत्तावलम्बां च, यस्याः प्रथमा सञ्चिकाऽस्माकं सांप्रतमेव हस्तं गता। कियतश्चन कालादारभ्य पण्डितगोष्ठ्यां विप्रतिपद्यमानं मण्डन-सुरेश्वरयोर्भेदमधिकृत्य महामहोपाध्यायश्रीगङ्गानाथझामहोदयानां लेखः, महामहोपाध्याय-मीमांसाकण्ठीरवश्रीवैद्यनाथशास्त्रिणां लेखः, तेषां चरितसारश्च कस्य वा तत्त्वगवेषणैकचित्तस्य चित्तं नाकर्षयिष्यति। मण्डन-सुरेश्वरयोर्भेदाभेदचिन्ता हि प्रसन्नगम्भीरा चिन्ता, यामधिकृत्याचिरेण वयमपि स्वीयं वक्तव्यं प्रकाशयितुमभिलषामः।

धन्यवादः

ब्रह्मदेशवास्तव्येन सनातनधर्मनिष्ठेन व्यवहाराजीवेन श्रीमता नन्दलालघोषालमहोदयेन पाश्चात्यसाहित्यविषयाणां व्यवहारसम्बन्धिनाञ्च ग्रन्थानां पञ्चशती परिषद्ग्रन्थागारे प्रदत्तेति, परिषदियं स्वीयामधमर्णताप्रकाशनेनात्मानं कृतकृत्यं 'मन्यते'॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषारत्नम्

(श्रीकणादतर्कवागीश-प्रणीतो नव्यन्यायमतसिद्ध-पदार्थ-प्रतिपादको ग्रन्थः)

कलिकाता-राजकीयसंस्कृतमहाविद्यालय-न्यायशास्त्रान्यतराध्यापक-

श्रीयुक्त-कालीपद-तर्काचार्य-

सम्पादितम्

एष ग्रन्थः सरलया सरण्या तर्कशास्त्रप्रसिद्धान् पदार्थान् प्रतिपादयन् सुबहुप्राचीनकालात् प्रभृत्येव परिण्डतसमाजे सुविश्रुतो लक्ष्यते। अत्र पदार्थसिद्धौ समपेक्षिता युक्तयः सुगमया दिशा परिगृहीता महान्तमुपकारं जनयन्ति तर्कशास्त्रं प्रविविक्षताम् विद्यार्थिनां सुखेनावगमाय सम्पादकमहोदयेनात्र सरला काचित् टीकापि संयोजिता। अत्र विस्तृता **विषयसूची** भूमिकायां न्यायमतसिद्धानेक-पारिभाषिक-पदार्थविवृतिश्च सन्निवेशिता, येन संस्करणस्यास्य नितरामुत्कर्षः समजनि।

एष ग्रन्थ इतःपूर्वं कदापि केनापि न प्रकाशितः। अतः अप्रकाशितपूर्वस्यास्य ग्रन्थस्य परमोपादेयस्य लाभेन विद्यार्थिनः अध्यापकाश्च सुतरामुपकृता भविष्यन्तीति निःसंशयो वादः।

२५४ पृष्ठात्मकोऽयं ग्रन्थः साम्प्रतमेव प्रकाशितः, तत् सत्वरा भवन्तु श्रीमन्तस्तर्कपदार्थविज्ञानरसिका येन कालातिक्रमो नाभिलषितसिद्धिं प्रतिबध्नीयात्।

मूल्यम् { साधारणानाम्—३॥०
परिषत्सदस्यानाम्—३)

अस्य प्राप्तिस्थानम्—

संस्कृत-साहित्य-परिषत्-कार्यालयः

१७, आर. जि. कर रोड, श्यामवाजार, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সুলভে পুস্তক বিক্রয়

কোনও পুস্তক-বিক্রেতার নিকট হইতে পরিষৎ কয়েক কপি নিম্নলিখিত পুস্তক পাইয়াছেন, পুস্তকগুলি শীঘ্র বিক্রী করিয়া ফেলার জন্য সর্ব্বসাধারণকে আগামী ২৯শে পৌষ পর্য্যন্ত শতকরা ২৫৲ টাকা হারে কমিশন দেওয়া হইবে। পুস্তকগুলি বোর্ড বাঁধান।

সাংখ্যদর্শনের আদ্য পরীক্ষায় পাঠ্য—

যোগসূত্রবৃত্তি—

(মণিপ্রভা টীকা, হিন্দী ও বঙ্গভাষানুবাদ, সূত্রপাঠ ও সূত্রানুক্রমণিকা সহিত) মূল্য—১।৷০ স্থলে ১৷৵০

কাব্যের মধ্য পরীক্ষায় পাঠ্য—

কিরাতার্জ্জুনীয়ম্—

(মূল, অন্বয়, বাচ্যান্তর, অনুক্তালঙ্কার-নির্দ্দেশ, মল্লিনাথটীকা, হিন্দী ও বঙ্গভাষানুবাদ, বিস্তৃত সমালোচনা ও গ্রন্থকার-জীবনকথা সহ) মূল্য—৩৲০ স্থলে ২৷৵০

পুস্তক-প্রাপ্তির ঠিকানা—

সংস্কৃত-সাহিত্য-পরিষৎ

১৭, আর. জি. কর রোড, শ্যামবাজার

কলিকাতা।

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No C. 1073

Vol. XIX, No. 8] [December, 1936.

१८५८ शकीये अग्रहायणे १९श-वर्षस्य ८म-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

भारती भातु भारती

सम्पादकः—

महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम
Foreign price—7s

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषारत्नम्

(श्रीकणादतर्कवागीश-प्रणीतो नव्यन्यायमतसिद्ध-पदार्थ-प्रतिपादको ग्रन्थः)

कलिकाता-राजकीयसंस्कृतमहाविद्यालय-न्यायशास्त्रान्यतराध्यापक-

श्रीयुक्त-कालीपद-तर्काचार्य-

सम्पादितम्

ऐष ग्रन्थः सरलया सरण्या तर्कशास्त्रप्रसिद्धान् पदार्थान् प्रतिपादयन् सुबहुप्राचीनकालात प्रभृत्येव पण्डितसमाजे सुविश्रुतो लक्ष्यते। अत्र पदार्थसिद्धौ समपेक्षिता युक्तयः सुगमया दिशा परिगृहीता महान्तमुपकारं जनयन्ति तर्कशास्त्रं प्रविविक्षताम्। विद्यार्थिनां सुखेनावगमाय सम्पादकमहोदयेनात्र सरला काचित् **टीकापि** संयोजिता। अत्र विस्तृता **विषयसूची** भूमिकायां न्यायमतसिद्धानेक-पारिभाषिक-पदार्थविवृतिश्च सन्निवेशिता, येन संस्करणस्यास्य नितरामुत्कर्षः समजनि।

एष ग्रन्थ इतःपूर्वं कदापि केनापि न प्रकाशितः। अतः अप्रकाशित-पूर्वस्यास्य ग्रन्थस्य परमोपादेयस्य लाभेन विद्यार्थिनः अध्यापकाश्च सुतरामुपकृता भविष्यन्तीति निःसंशयो वादः।

२५४ पृष्ठात्मकोऽयं ग्रन्थः साम्प्रतमेव प्रकाशितः, तत् सत्वरा भवन्तु श्रीमन्तस्तर्कपदार्थविज्ञानरसिका येन कालातिक्रमो नाभिलषित-सिद्धिं प्रतिबध्नीयात्।

मूल्यम्—परिषत्सदस्यानाम्—३) साधारणानाम्—३॥०

प्राप्तिस्थानम्—**संस्कृत-साहित्य-परिषत्-कार्यालयः**

१७, आर. जि. कर रोड, श्यामबाजार, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

December, 1936. | १८५८-शकीये अग्रहायणे १९श-वर्षस्य ८म-संख्या | Vol. XIX No. 8

हिन्दुधर्मः

[निबन्धकः—महामहोपाध्याय-श्रीअनन्तकृष्ण-शास्त्री]

भारतीयानां धर्मो हि नामान्तरेण हिन्दुधर्मो नाम। तेषु प्रधानतमं प्रमाणमाम्नायाः, स्मृतिपुराणेतिहासादयस्तु तदविरोधेनैव मन्यन्ते प्रमाणानि। भारतीयानां हि वेदाः सर्वदा पुराणाः, न ते प्राचीननवीनविभेदमर्हन्ति, क्रैस्तवानां धर्मप्रमाणानि बैबिलूपदवाच्यास्तदीया वेदा इव। पाश्चात्यानां साहित्यग्रन्थास्तदीयवेदानुवादरूपा अपि वेदा एव तैर्मन्यन्ते, प्राच्यैस्तु भारतीयैर्नानुवादनिबन्धा अपि वेदानां वेदा नाम मन्यन्ते। पाश्चात्यानां निबन्धास्तदीयं वेदमाश्रित्यैव भारतीयानां निबन्धा अपि कयाचन प्रणाल्या स्वीयं वेदमेवाऽऽश्रित्य तदुपबृंहणेनैव सप्रयोजना नूनम्। काव्यनाटकादयोऽपि वेदार्थोपबृंहणेनैव सत्काव्यादयो भवन्ति, नान्यथा। अयमत्र निष्कर्षः—साधारणा विशिष्टाश्च भारतीयानां धर्मा एव साहित्यनिबन्धानां स्मृति-पुराणेतिहासादीनां च पौरुषेयाणामपि प्रतिपाद्यं तत्त्वम्॥

साधारणधर्मा हि अहिंसाऽस्तेयसत्यादयो मनुष्यधर्माः क्रैस्तव-मोहम्मदादिभिरपि स्वधर्मा एव मन्यन्ते तदीयेषु धर्मग्रन्थेषु। इयान् विशेषः—साधारणधर्मानुष्ठानमात्रेण मनुष्यत्वम्, विशेषधर्माणामपि परिपालनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु विशिष्टं भारतीयत्वम्। "जन्तूनां नरजन्म दुर्लभम्" इति शंकर-भगवत्पादानामुपदेशो मनुष्यधर्मेणानुष्ठितेनापि न हिन्दुत्वं हीयत इत्यादिशति। सति चैवं साधारणधर्माणामनुष्ठानेन सर्वं एव मानवा न हिन्दु-भावात् प्रच्यवन्ति, तदवान्तररूपाणि तु ब्राह्मणत्व-क्षत्रियत्व-वैश्यत्वादीनि विशेषधर्माणां परिपालनेनैव समभिव्यज्यन्ते। हिन्दुपदव्यपदेशस्तु, मन्यामहे, साधारणधर्माणामनुष्ठानेनापि न विरुध्यते, क्रैस्तवमोहम्मदादि-पदव्यपदेशस्तु तदीयान् विशेषधर्मान् तत्तन्मतदीक्षानिबन्धनान् विना न तैस्साधु मन्यते। क्रैस्तवादीनां देवता अपि परिच्छिन्नतत्तन्नामरूप-परित्यागेन परमात्मभावनयाऽनुसन्धीयमानाः प्राच्यशास्त्रदृष्ट्या हिन्दूनामपि न, न देवताः, परिच्छिन्ननामरूपादिभावना तु भारतीयानामपि गौण-धर्म एव, न मुख्यधर्मः। क्रैस्तवमोहम्मदादयोऽपि भारतीयरामकृष्णाद्यवतारार्चनायां तत्संकीर्तनादौ च प्रवृत्ताः कबीरदास-प्रभृतयो भक्तप्रवराः प्रातःस्मरणीया एव मन्यन्ते भारतीयैर्विनाऽपि हिन्दुमतदीक्षाम्। क्रैस्तवादिभिस्तु विना स्वमतदीक्षां परमात्मभावनया स्वदेवोपासका अपि न स्वात्मीया मन्यन्ते। अयमत्र निष्कर्षः—जातितो मोहम्मदा अपि अहिंसा-ऽस्तेयसत्यभगवद्भजनादिभिः साधारणधर्मैरनुष्ठीयमानैर्न धमतो हिन्दुभावात् प्रच्यवन्ते, हिन्दवस्तु परमात्मभावनया मतान्तरदेवतामप्युपासीनाः न क्रैस्तवादिभावाद् न प्रच्यवन्ते। अयमपरो विशेषः—यद् क्रैस्तवादिषु जातिभेदतदवान्तराश्रमविभागादिनिबन्धना न धर्मभेदाः, भारतीयेषु तु जातिव्यवस्था-तद्विभाग-तदवान्तराश्रमविभागादिप्रयुक्ता धर्मभेदा भक्तिमार्गस्य ज्ञानमार्गस्य वा विशेषत उपकुर्वाणाः व्यवस्थिताः स्वीक्रियन्ते। क्रैस्तवादिभावं विद्विषन्तो भारतीयत्वमात्मनो रिरक्षवश्च जातिव्यवस्था-दिकं विशेषधर्ममपि परिजहाना विशिष्टं भारतीयत्वं तृणाय मन्यन्ते, मनुष्यभावमात्रं च भारतीयानां पर्याप्तमिति। सति चैवं विशिष्टहिन्दु-भावरक्षायां तदीयव्यवस्थितजातिविभागतदवान्तरविभागादिप्रयुक्तेषु धर्म-भेदेषु परिवर्तनानर्हेषु श्रद्धोत्पादनमेव प्रधानो हेतुः, न तु तत्परिवर्तनम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातिर्नाम भारतीयानाम् जननम्, विश्वसिमः, मातापितृपरिवर्तनं विना नैकस्मिन्नेव जन्मनि मतविद्वेषेण धर्मविद्वेषेण गुणविद्वेषेण वा स्वाधीनेनाऽऽत्मानं लभते।

उमोवाच—भगवन् भगनेत्रघ्न कालसूदन शंकर।

इमे वर्णाश्च चत्वारो विहिताः स्वस्वभावतः॥
उताहो क्रियया वर्णाः संभवन्ति महेश्वर।
एवं मे संशयप्रश्नस्तमुच्छेत्तुं त्वमर्हसि॥

परमेश्वर उवाच—

स्वभावादेव विद्यन्ते चत्वारो ब्राह्मणादयः।
नैकजात्या सुदुष्प्रापमन्यवर्णत्वमागतम्॥
तच्च कर्मविशेषेण पुनर्जन्मनि जायते॥

इति प्रश्नोत्तररूपेण प्रवृत्तानि महाभारतानुशासनिकपर्वगतोमामहेश्वरसंवादरूपाणि वचनानि गुणकर्मकृता जातिपरिवृत्तिर्जन्मान्तर एव, न तु तस्मिन्नेव जन्मनीति प्रमाणयन्ति। तदेकवाक्यतया च—"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" इति भगवद्गीतावाक्यमपि पूर्वपूर्वजन्मगुणकर्मानुसारीण्युत्तरोत्तराणि जन्मानीति नीयते॥

सत्यम्, जातिधर्मा आश्रमधर्मा अनन्तश्रुतिस्मृतीतिहासपुराणाद्यध्ययनेनाशेषतो ज्ञातुमेव न शक्यन्ते, नतरामनुष्ठातुम्; तथापि "येनास्य पितरो याता येन याताः पितामहाः" इति वचनानुसारं पितृपितामहादिपरम्पराप्राप्ताः पूजागृहेषु भोजनस्थानेष्वन्येषु च स्थानेषु प्रत्यहमापरोक्ष्यं नीयमानाः सदाचाराः प्रमाणयिष्यन्ति स्वजात्याश्रमादिधर्मान्। मातापित्रो रुधिरेण तदीयेनास्थिमांसत्वगादिना तदीयेन धनेन तदीयेनैवाऽऽवसथेन स्वजीवयात्रानिर्वहणे साभिनिवेशाः सोत्साहाश्च संततयस्तदीयधर्मसंग्रहे परं ततो विमुखाः, इति ककुत्स्थग्रहणेऽभिमुखं रश्मिसन्नाहे पराङ्मुखं चाश्वमेवानुकुर्वन्ति।

सत्यम्, भारतीयधर्मपरिपालनैकदीक्षादीक्षिता वाङ्मात्रेण निग्रहानुग्रहप्रभवः साम्प्रतं स्वच्छा महर्षिकल्पाश्च भारतीया विरलविरलाः, नेयं तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपत्तिर्भारतीयधर्ममात्रस्य, किं तु सर्वेषां मतानाम्। नहि स्वच्छाः क्रैस्तवा मोहम्मदा बौद्धा जैना वा सांप्रतं न विरलविरलाः। माधवाचार्या हि कलिदोषप्रयुक्ता स्वधर्माचरणेष्वश्रद्धा कथंचन सोढव्यैव, प्रमादालस्यादि-निबन्धना त्वश्रद्धा विपरीता च प्रवृत्तिर्निरोद्धव्येति पराशरमाधवीये वदन्ति।

सन्ति हि मुख्यधर्मा गौणधर्मा आपद्धर्मा वा शास्त्रेषु भारतीयानामुप-दिष्टाः, येषामन्यतमानुष्ठानेन भारतीयत्वं न विशिष्टं क्षिणोति। तत्र मुख्यधर्माः शक्तान्, गौणधर्मास्तदशक्तान, आपन्नांश्चापद्धर्मा अधिकुर्वन्ति। शक्त्यशक्त्यापत्स्वरूपनिर्णये तु स्वयमेव सर्वे प्रभवन्ति, शक्तावत्यशक्ति-भावनया, अनापद्यपि आपद्भावनया वा यथेच्छानुष्ठानेनेतरे यद्यपि प्रतार-यितुं शक्यन्ते, स्वान्तरात्मा परमात्मा वा तु न प्रतारयितुं शक्यते। विश्वसिमः, आत्मानमपि प्रतारयितुं न कोऽपि बुद्धिपूर्वकारी प्रयतेतेति, सत्यां विपत्तौ प्राणरक्षार्थमनुष्ठीयमानोऽधर्मोऽपि तदात्वे धर्म एव। विपत्त्यतिक्रमेऽप्यापद्धर्माणामभ्यासः परं सर्वथा विगीयते, इति विस्तृतं स्थानं महत्तरमौदार्यं च भारतीयानां धर्मेषु वर्तते।

सत्यप्येवम्—द्वेषविशेषेण अभिनिवेशविशेषेण वा वैयक्तिकेन, अपरेण वा केनचन निमित्तेन हिन्दूनामपि सतामवर्णानां निष्प्रयोजनमेव मतान्तरे प्रवर्तनेन भारतीयत्वमप्यात्मन इदानींतनाः केचन विषमिव मन्वाना अपि भगवदनुग्रहेण स्वधर्माभिरुचिम्, अधर्माद्विरतिं चाचिरेण प्राप्यासुः, यतः—अनयैव नीत्या सर्वेऽपि भारतीयाः सर्वाणि मङ्गलकार्याण्युपक्रमन्ते—

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यश्शुभमस्तु नित्यं
लोकास्समस्तास्सुखिनो भवन्तु॥ इति॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकी विष्णुदेवता

[निबन्धकः—महामहोपाध्याय-श्रीसीताराम-शास्त्री

(कलकत्ता-विश्वविद्यालयाध्यापकः)]

लोके उपास्यमानाः पुराणेषु नैकधा प्रतिपाद्यमाना देवता वैदिक्य एव भवन्ति, अत एव पुराणानां

"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥"

इत्यादिना वेदार्थप्रतिपादकत्ववर्णनं संगच्छते। ताश्च वैदिक्यो देवता रूपकवर्णनया रूपान्तरविशिष्टा इव पुराणेषु प्रतिपाद्यन्ते, तावतैव वैदिक्योऽन्या देवताः पौराणिक्यश्चान्या इति वादोऽधुनातनः प्रादुर्भूतः। वैदिक्योऽपि देवता नानानामभिः प्रतिपाद्यमाना अपि न वस्तुतो विभिन्नरूपाः, किन्त्वेकस्या एव नानाविधवर्णनावशतो नानानामभिर्वर्णनं वेदे। अत एव यास्काचार्यः—'एकस्याऽऽत्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति' इति देवतैक्यं प्रदर्शयामास। श्रीमद्भिर्दुर्गाचार्यैरेतन्निरुक्तार्थ एवं विवृतः—"माहाभाग्यादेकस्य देवतात्मनः प्रकृतिभेदेन वाऽप्रकृतिभेदेन वेति चेतनाचेतनविकरणधर्मित्वादात्मानं विकुर्वतोऽस्यान्ये देवाः प्रत्यङ्गानि भवन्ति। अग्नीन्द्रसूर्याणां परस्परापेक्षमन्यत्वमनन्यत्वं चैकेन देवेन महता सह। तस्मादग्नीन्द्रसूर्यात्मकस्य देवतात्मनोऽङ्गानि जातवेदो-वायु-भगप्रभृतीनि शकुन्यश्वप्रभृतयश्च प्रत्यङ्गानि। स एव महानात्मा अग्नीन्द्रसूर्याद्यङ्गप्रत्यङ्गभावेन व्यूहमनुभवन्नेकोऽपि सन् बहुधा स्तूयते" इति।

"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति मन्त्रवर्णोऽपि उक्तार्थं स्पष्टं प्रतिपादयति ।

ऋग्वेदानुक्रमणिकाकारः शौनकस्तु उक्तमर्थमनुमोदमान एकात्मविषयेऽधिभूतं स्पष्टं रूपं प्रतिपादयन् पूर्वाचार्याणामेकात्मवादं विवृणोति—"एकैव वा महानात्मा देवता स सूर्य इत्याचक्षते, स हि सर्वस्याऽऽत्मा । तदुक्तमृषिणा—"सूर्य आत्मा जगतस्तस्थुषश्चे"ति । एवं च सूर्यस्यैव नानारूपाणि वेदे प्रतिपाद्यमाना नानादेवता वैदिक्यस्ता एव च पुराणादिषु प्रतिपाद्यमाना लोकेऽप्युपास्यमाना इति सिध्यति । तथा सति लोके उपास्यमानः पुराणेषु बहुधा वर्ण्यमानो विष्णुर्देवोऽपि सूर्य एव । द्वादशादित्येषु विष्णोर्गणनं तु प्रसिद्धमेव । तस्य च विष्णोः सम्बन्धेन हि वेदे वर्ण्यते—अयं पादविक्रमणत्रयं कृतवान्, तेन च विक्रमणत्रयेणासौ लोकत्रयं व्याप्नोति, अस्य विक्रमणद्वयमेव दृश्यते, तृतीयं तु न दृश्यते, अयं दक्षिणोत्तरसधस्थसम्बन्धीत्यादिकं "त्रेधा निदधे पदम्", "य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः"। "द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय...तृतीयमस्य न किरादधर्षति, "यो अस्कभायदुत्तरं सधस्थमि"त्यादिना । तथा अयं चतुर्नवतिसङ्ख्याकैर्नामभिरवस्थानैर्गमनैर्वा व्यतीन् वेपयतीति "चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपदि"त्यनेन उच्यते । तत्र चतुर्नवतिनामानि कानीति विषये विचारका नानाविधं कल्पनाजातमुपस्थापयन्ति ।

तत्र केचित्—अत्र नवतिशब्दो दिनपरश्चतुःशब्दश्च वेपनावृत्तिपरः । तथाचायं विष्णुर्नवतिसङ्ख्याकानि दिनानि चतुर्वारं वेपयति, आवर्तयति, कम्पयति, भ्रामयति वेति ।

एतेन वार्षिकी षष्ट्युत्तरत्रिशत्यात्मिका दिनानां सङ्ख्या अनेन मिषेण प्रतिपाद्यते । अत्र नवत्या एव किमिति चतुर्धा भ्रामणमुच्यते नान्यस्याः सङ्ख्याया इति विशयमृत्वभिप्रायेण समादधते—मासत्रयात्मकमृतुं गृहीत्वा वत्सरे ऋतुचतुष्टयवशतस्तथा वर्णनमिति । अत्र मते मन्त्रस्थस्य "व्यतीन्" इति पदस्य "अवीविपद्" इत्यस्य च स्वारस्यभङ्गः, ते च पदे वैपरीत्ये कम्पने च सार्थके । कम्पनं चैकस्यैव पुनः पुनः सम्बन्धे सम्भवति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नतु विभिन्नविभिन्नसम्बन्धे। वत्सरभेदेन यथाकथंचनोपपादनेऽपि वैपरीत्यस्य तावताऽनुपपत्तिरेव।

सायणाचार्यास्तु 'अयमादित्यात्मा विष्णुश्चतुर्भिः साकं नवतिं चतुर्नवतिमित्यर्थः। एतत्सङ्ख्याकान् कालावयवान् नामभिः स्वकीयनमनप्रकारैः प्रेरणविशेषैर्वृत्तं यथा भवति, तथा अवीविपत् कम्पयति ......के पुनस्ते कालावयवा उच्यन्ते? संवत्सर एकः, अयने द्वे, पञ्चर्तवः, द्वादश मासाः, चतुर्विंशतिरर्धमासाः, त्रिंशदहोरात्राः, अष्टौ यामाः, एकस्मिन्दिवसे पर्यावर्तमानानि मेषादिद्वादशलग्नानि इति (१+२+५+१२+२४+३०+८+१२=९४) मिलित्वा चतुरधिकनवतिसङ्ख्याकानवीविपत्' इति व्याचक्षते। अत्र संवत्सरायनर्तुपञ्चकद्वादशमासचतुर्विंशत्यर्धमासैः संवत्सरावृत्तिः, त्रिंशदहोरात्रैर्मासावयवाः यामलग्नैश्च दिनावृत्तिर्भवति। तत्र कुत एवमिम एव ग्रहीतव्या नान्ये इत्यनुयोगस्य दुःसमाधेयता। मन्त्रोक्तसङ्ख्यापूर्त्यनुसारेणेति तु न वाच्यम्; तस्याः संवत्सरायनर्तुपञ्चकर्तुमासद्वयचतर्विंशत्यर्धमासप्रतिदिनीयघटीषष्टिभिरपि (१+२+५+२+२४+६०=९४) उपपत्तेर्विनिगमनाविरहतादवस्थ्यात्। "व्यतीनि"ति पदस्य चास्वारस्यं तस्मादत्र चतुर्नवतिसङ्ख्याकास्तथा वेपनीया वक्तव्याः, यथा तत्कम्पने वैपरीत्यमपि सम्बध्यते, तथासत्येव मन्त्राक्षरानुगुण्यं स्यात्। वृत्तपदबोध्यमालारूपताऽपि स्यात्। तस्मादत्रादित्यो दक्षिणोत्तरायणसम्बन्धी विष्णुरिति यदि गृह्येत, तदा तस्य दक्षिणोत्तरदेशविप्रकर्षमानाभिप्रायेण मन्त्रोक्तसङ्ख्यादीनामुपपत्तिसम्भवः। तथाहि—

आदित्यो दक्षिणोत्तरायणे प्राप्नुवन्, दक्षिणोत्तरयोर्गच्छति। दक्षिणोत्तरशब्दयोश्च सावधिकार्थत्वेनावध्यपेक्षणे प्रकृत उभयमध्यवर्तिवैषुववृत्तमवधित्वेन गृहीत्वा तत उत्तरा दक्षिणा च गच्छतीति वचनीयम्। तस्माद्वैषुववृत्तादुत्तरत्र दक्षिणतश्च दक्षिणोत्तरवृत्तागतसार्द्धत्रयोविंशत्यंशपर्यन्तमेव स प्रतिपार्श्वं विप्रकृष्टो भवति।

तौ च पर्यन्तबिन्दू दक्षिणायनान्तोत्तरायणान्तबिन्दुशब्देन व्यवह्रियेते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं विषुवद्वृत्ततः प्रतिपार्श्वं सार्धत्रयोविंशत्यंशपर्यन्तं गमने एकस्मादन्त्यबिन्दोरपरान्त्यबिन्दोरन्तरं सप्तचत्वारिंशदंशाः सम्पद्यन्ते। एतावतामंशानामतिक्रमणेन आदित्येनैकमयनं पूर्यते। संवत्सरे चायनद्वयमपेक्ष्यते इति उक्तानामेवांशानां वैपरीत्येन पुनराक्रमणे द्वितीयायनसंपत्त्या संवत्सरः पूरितो भवति। तदिदं सप्तचत्वारिंशदंशानामनुलोमप्रतिलोमभावेन द्विराक्रमणं मन्त्रे चतुर्नवतिरूपेणाभिप्रेयते। अस्मिंश्च द्विराक्रमणे सप्तचत्वारिंशतां द्विः सम्बन्धेन द्वैगुण्ये चतुर्नवतिसङ्ख्या अंशानां गमनागमनयोरन्त्यबिन्द्वन्तररूपाणां सम्पद्यते, अंशाश्च वैपरीत्येनाप्याक्रम्यन्त इति वैपरीत्यस्यापि सम्बन्धाद् व्यतीनिति मन्त्रगतपदस्य न वैयर्थ्यम्। एकान्तबिन्दुतो निर्गत्य पुनस्तद्बिन्दुपर्यन्तमागमनाद् वृत्तापदबोध्यमालारूपतापि संपद्यते। कम्पनं गमनक्रियायाम् एकस्य पुनः पुनः सम्बन्धरूपं चोक्तानामंशानां गमनागमनयोर्द्विः सम्बन्धेन उपपन्नम्। एवं च दक्षिणोत्तरायणसम्बन्धी सूर्यो विष्णुस्तदीयगमनमार्गसम्बन्ध्यन्तरमशात्मकं चान्तमन्त्रे प्रतिपाद्यते इति भवति। मन्त्रान्तरे विष्णोः सहस्थानार्थक-सधस्थ-शब्दस्योत्तरादिविशेषणात् (यो अस्कभायदुत्तरं सधस्थम्) अपि विष्णोरुक्तविधसूर्यरूपताप्रतीत्याऽपि प्रकृतमन्त्रस्य वर्णनार्थ एव तात्पर्यं प्रतीयते। एवं वैष्णवसूक्तेषु वेदे वर्ण्यमानानां पादद्वयसन्दर्शनेन्द्रसाहित्ययोः, पादत्रयेण लोकत्रयव्याप्त्यादिकानां वशतोऽप्युक्त एवार्थो दृढीभवतीति, इन्द्रस्य शतक्रतुरिति वेदैकप्रसिद्धिर्वृत्रस्य नवनवतिदुर्गविनाशनादिकमपि उक्तार्थस्यैव साधकमिति च प्रपञ्चितमन्यत्र। एवं चोक्तमन्त्रवशतो दक्षिणोत्तरायणीयसूर्यो विष्णुरिति भवति। पुराणोक्तचतुर्भुजत्वादिवैशिष्ट्यमपि चोक्तरीत्या तस्यादित्यपरत्वे सङ्गच्छत इति प्रपञ्चनीयमन्यदा। एवमेव विष्णुवदपरा अपि देवता आदित्यात्मका एवेति विवेचयिष्यते इति दिक्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघनादवधम्

द्वाविंशः सर्गः

[निबन्धकः—श्रीनित्यगोपाल-विद्याविनोदः]

मुहूर्त्तैः कतिभी रामो ददर्श पुरतो ह्रदम् ।
यत्र वहति कालाग्निः कल्लोलेन जलाकृतिः ॥१॥
तरन्ति कोटिशस्तत्र हाहाकारेण जन्तवः ।
हा विधातः कथं सृष्टा वयं ते दुःखभागिनः ॥२॥
कथं न वा मृता मातुर्जठरे निष्ठुराशय ।
ईदृशान्नरकक्लेशान्मृत्युः श्रेयान् सहस्रशः ॥३॥
कुत्र देव दिनेशान सुधांशो वा निशेश्वर ।
तृप्येन्नेत्रं पुनर्दृष्ट्वा किं युवां देवसत्तमौ ॥४॥
कुत्र दाराः सुताः स्वे च स्वश्च वा कुत्र यत्कृते ।
कुकर्मानुष्ठितं घोरं मया धर्मं समुज्झता ॥५॥
पापिष्ठा व्यलपन्नित्थं ह्रदे तस्मिन् मुहुर्मुहुः ।
शून्यदेशोद्भवा वाणी तदैव प्रत्यवोचत ॥६॥
रे मूढधीः कथं दैवं वृथा निन्दसि बालिश ।
भुङ्क्षे फलं स्वकार्याणामत्र धर्मनिकेतने ॥७॥
स्वकर्मभिर्विपन्नो न दैवं निन्दितुमर्हति ।
प्रमादतो दशन् जिह्वां दद्भिः कस्मा असूयति ॥८॥
पापप्रलोभितो जाल्म कथं धर्मं विसृष्टवान् ।
विधेर्विधिः सुमङ्गल्यश्चिराय विदितो भुवि ॥९॥
दैववाण्यां विलीनायां भीषणो यमकिङ्करः ।
भिनत्ति कस्य मूर्द्धानं कीटो दशति कञ्चन ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मांसाशी शकुनिः कुत्र पतन्नूर्द्ध्वं नखैः खरैः ।
कृन्तत्यन्त्राणि हुङ्कारैर्हतानामार्त्तनादिनाम् ॥११॥
सम्भाष्य रघुपश्चास्यं मायाह शृणु राघव ।
ह्रदोऽयं रौरवो नाम्ना वह्निज्वालासमाकुलः ॥१२॥
परस्वं यो हरेन्मूढस्तस्य वासश्चिरादिह ।
अविचाररतश्चापि वसत्यस्मिन् विचारकृत् । १३॥
महापातकिनश्चान्ये तिष्ठन्तीह चिरं ह्रदे ।
सर्वदाऽग्निर्ज्वलत्यत्र दशन्ति कृमयश्च तान् ॥१४॥
नैष साधारणो वह्निर्यत्र प्रेता ज्वलन्ति ह ।
विधिरोषो ज्वलत्यत्र वह्निरूपेण दारुणः ॥१५॥
कुम्भीपाकं दर्शयामि पुरः सर महारथिन् ।
तप्ततैले यत्र दूता भृज्जन्ति पापिनोऽनिशम् ॥१६॥
नासारन्ध्रं मया रुद्धं भवतस्तिष्ठसीह हि ।
नो चेत् क्षणमपीह त्वं स्थातुं शक्नोषि राघव ॥१७।
यद्वाऽन्धतमकूपं भो गच्छ पश्याऽऽत्मघातिनः ।
क्रन्दन्ति पापिनो यत्र हाहाकारेण बन्दिनः ॥१८॥
रामः कृताञ्जलिः प्राह क्षमस्व सर्वमङ्गले ।
जहाम्यसूनहं सद्य ईक्षेयान्यासुखं पुनः ॥१९॥
अहो मातर्भवे कोऽस्मिन् गृह्णीयाज्जन्म दुःखदम् ।
सर्वशक्तिमयीं मायां रोद्धुञ्चेच्छक्नुयाज्जनः ॥२०॥
मायाह भेषजं नास्ति नाशयेद् गरलं न यत् ।
यस्त्वौषधमुपेक्षेत मृत्युस्तस्य शिरस्थितः ॥२१॥
कर्मक्षेत्रे सुमेधा यो युध्यते कल्मषैः सह ।
सहाया देवता धर्मवर्मणा तं सुरक्षति ॥२२॥
दण्डस्थानानि संद्रष्टुं विरतोऽसि यदीश्वर ।
दयार्णव ततो गच्छ पथैतेनाविलम्बितम् ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आराद्विवेश कान्तारं सोऽथ दीर्घारवान्वितम् ।
न कूजन्ति खगा यत्र न च वाति समीरणः ॥२४॥
न पुष्यन्ति च पुष्पाणि विशन्ति सूर्यरश्मयः ।
निर्भिद्य पत्रपुञ्जांश्च स्थानेषु रुग्नहास्यवत् ॥२५॥
लक्षाणि जन्तवस्तत्र सद्यस्तं पर्यवेष्टयन् ।
सविस्मयं रघुसिंहं क्षुद्रावनमध्यमत्रकम् ॥२६॥
पप्रच्छ वारुणं कश्चित्तं त्वं कः कैर्गुणैरिह ।
सशरीरं समागच्छो देवो वा मानवो वद ॥२७॥
गुणमन्दिर भाषस्व तोषयास्मान् महामते ।
वचनामृतवर्षेण चकोरानिव शीतगुः ॥२८॥
यस्मिन्नेवाहरन् प्राणान् दूता नो यमभूभृतः
तद्वासरप्रभृत्येव नाश्रृण्म रसनाध्वनिम् ॥२९॥
वराङ्गं वीक्ष्य ते वीर नेत्रे नस्तृप्तिमागते ।
कृपया तर्पय श्रोत्रे तद्वाक्यामृततर्पिते ॥३०॥
रक्षोरिपुर्वभाषेऽहं प्रेता रघुकुलोद्भवः ।
पिता दशरथो नाम कौशल्या जननी मम ॥३१॥
नाम्नाऽहं राम आदिष्टः शिवेन द्रष्टुमागतः ।
पितरं भाग्यदोषेण यमस्यास्मिन्निकेतने ॥३२॥
प्रत्याहान्यतमः प्रेतो जानेऽहं त्वां महाबलम् ।
पञ्चवट्यां त्यजामि स्म देहं त्वद्बाणपीडितः ॥३३॥
चकितो राघवोऽपश्यन्मारीचमशरीरिणम् ।
अपृच्छच्च कुतः पापाद् वनमेतत् समागमः ॥३४॥
अब्रवीच्च निराकारः प्राणी भो रघुकेशरिन् ।
पौलस्त्यस्य कृते युष्मद्वञ्चनाद् दुर्गतिर्मम ॥३५॥
रक्षांसि च खरादीनि दृष्ट्वा रामं रुषा ययुः ।
दूरं विषरदैर्हीना नकुलं वीक्ष्य सर्पवत् ॥३६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनं पूरितमारावैर्भैरवैः सहसा तदा ।
भूतानि च पलायन्त वात्यायां शुष्कपर्णवत् ॥३७॥
मायोवाच रघुसिंह पापाः प्रेता इमे सदा ।
वसन्ति नारके कुण्डे विलपन्ति तथा भृशम् ॥३८॥
तमैक्षताखिलं सीतावल्लभो भूतसञ्चयम् ।
पलायमानं पश्चाच्च धारितं यमकिङ्करैः ॥३९॥
क्षणैः कतिपयै राम आर्त्तनादमथाशृणोत् ।
सविस्मयमपश्यच्च नारीर्लक्षाणि निष्प्रभाः ॥४०॥
दीर्घकेशावलीं काश्चिच्छिन्दतीं ब्रुवतीन्तथा ।
अबध्नां वो मसृणिता बन्धुं कामिमनोगजम् ॥४१॥
दृष्ट्वा पापिगणान् रामो दुःखितान्नरकस्थितान् ।
मायायाश्चरणौ नत्वा प्रोवाच पुनरेव ताम् ॥४२॥
त्वत्प्रसादान्महादेवि मया दृष्टान्यनेकशः ।
आश्चर्याणि ब्रूहि कुत्र राजर्षिरस्ति मे पिता ॥४३॥
नय मां तत्र देवेशि भिक्षिष्ये तत्पदाम्बुजम् ।
किशोरलक्ष्मणं कालक्षेपः कार्यं विनाशयेत् ॥४४॥
सुस्मेरवदना चाह माया पुरी रघूत्तम ।
असीमैषा कियद्वाऽत्र त्वामहं समदर्शयम् ॥४५॥
वर्षाणि द्वादशास्याञ्चेद् भ्रम्येवाऽऽवामहर्निशम् ।
न तथापि शक्नुयात्र द्रष्टुमेतामशेषतः ॥४६॥
पतिव्रता वसन्त्यत्र पूर्वद्वारे सुखं सदा ।
पतिभिरतुला चेयं त्रैलोक्ये सर्वभोगदा ॥४७॥
सुरम्योद्यानहर्म्याढ्या सुपद्मसरसीयुता ।
नित्यमाधववाताद्रा पिकपञ्चमपूरिता ॥४८॥
रंरण्यते सुष्ठु वीणावेणुमुरजमन्दिरम् ।
दधिदुग्धघृतोत्साश्च प्रवहन्ति समन्ततः ॥४९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलन्त्यमृतकल्पानि फलानि सर्वदा वने ।
दत्तेऽन्नदा स्वयं स्वादु दिव्यमन्नं चतुर्विधम् ॥५०॥
यथेप्सितं समाप्नोति नरः कामदुघा पुरी ।
कल्पवल्लीसमा लोके द्वारं गच्छोत्तरं शुभम् ॥५१॥
गच्छन्तावुत्तरमुखौ तावुभौ सत्वरं तदा ।
अपश्यतां महाशैलान् नदीर्दग्धवनानि च ॥५२॥
तुषारमुकुटानद्रीन् गर्जतो वह्निमस्यतः ।
मरून् क्षेत्राणि वायूंश्च तप्तसैकतवाहिनः ॥५३॥
एवं मायाविलसितमद्भुतं वीक्ष्य राघवः ।
विश्रम्य च क्षणं भूयो जगाम मायया सह ॥५४॥
स्थित्वा बहुदिनं सिन्धौ नाविकस्तटसन्निधिम् ।
ज्ञात्वा चिह्नैर्यथा हर्षं धत्ते रामस्तथाऽभवत् ॥५५॥
शृण्वन् रघुवरोऽदूरे वाद्यध्वनिमरिन्दमः ।
ददर्श स्वर्णसौधानि माया चोवाच तं पुनः ॥५६॥
द्यारेऽत्र निहता युद्धे सम्मुखं वीरपुङ्गवाः ।
भुञ्जते दुर्लभान् भोगान् महाभागा महीभुजः ॥५७॥
वनाध्वना महाबाहो गच्छ सञ्जीवनीं पुरीम् ।
यशस्विनां यशोभिर्या पूर्णा गन्धैरिवाटवी ॥५८॥
पुण्यभूमिरियं शश्वदुज्ज्वला पुष्पवन्तयोः ।
भाभिर्हासैरिव स्रष्टुरिक्ष्वाकूणां कुलोद्वह ॥५९॥
एवमुक्त्वाऽग्रतो माया गच्छन्ती तन्निवासिनः ।
स्वैः स्वैः रामं तथावेद्य नामभिः प्राप वालिनम् ॥६०॥
साथ प्राह रघुव्याघ्र पश्य वीरं समागतम् ।
अहमन्तर्हिता वर्त्ते प्रीणयैनं सुखोक्तिभिः ॥६१॥
देव्यां तिरोहितायाञ्च राम ऐक्षिष्ट वालिनम् ।
तेजस्विनं महामायं शूलिनं गजगामिनम् ॥६२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरःसृत्याब्रवीद् वाली राघवं सकलेवरः ।
कथमायाः पुरीमेतां कूटयुद्धे निहत्य माम् ॥६३॥
सुग्रीवहितकामस्त्वं तिष्ठास्मिन्नकुतोभयम् ।
जितक्रोधा वयं सर्वे सञ्जीवन्यां जितेन्द्रियाः ॥६४॥
मनुष्यजीवनस्रोतः पृथ्व्यां वहति पङ्किलम् ।
स्वच्छं वहति तत्त्वत्र देशे मां विद्धि वालिनम् ॥६५॥
रामं लज्जाविनम्रास्यं दृष्ट्वा वाल्याह सस्मितम् ।
गच्छ वीर मया सार्द्धमुद्यानं निकषा स्थितम् ॥६६॥
जटायुर्नाम ते तातबन्धुस्त्वां वीक्ष्य राघव ।
अवाप्स्यति परां प्रीतिं पुण्यश्लोकः खगाधिपः ॥६७॥
सतीत्वधर्मरक्षार्थं प्राणांस्त्यक्त्वा महामतिः ।
अप्रमेयं यशो विन्दन् पूज्यतेऽत्र नरोत्तमैः ॥६८॥
यद्गर्भे जायते लोकस्ताश्चेद् धर्षति किंनरः ।
तत्क्षणं स निहन्तव्यो मर्त्तव्यं वा तदक्षमैः ॥६९॥
मातृरूपां स्त्रियं वीक्ष्य धर्षितां दुर्जनैः पुरः ।
यस्तान् दण्डयितुं नालं धिक् तं कापुरुषं शतम् ॥७०॥
सतीगौरवरक्षार्थं दत्तप्राणः खगाधिपः ।
वयं तत्सहवासेन धन्याः पूताश्च सर्वथा ॥७१॥
एवं विश्रम्भ-संलापैर्जग्मतुस्तावुभौ ततः ।
जटायुषं महाभागं रामोऽदर्शत् सुराकृतिम् ॥७२॥
दन्तिदन्तासने दिव्ये रत्नमण्डलमण्डिते ।
सुखासीनं वितानादि-शोभिते रत्नमण्डपे ॥७३॥
रघुनाथं स्निग्धकण्ठं पक्षीन्द्र आह राघव ।
पश्यंस्त्वां मित्रपुत्रं मे नयने तृप्तिमाप्नुतः ॥७४॥
रत्नगर्भा प्रसूस्ते त्वां गर्भेऽधत्त शुभे क्षणे ।
धन्यो दशरथो मित्रं यस्त्वां पुत्रमजीजनत ॥७५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियत्वाद् देववृन्दानामत्राऽऽगच्छः सविग्रहः ।
ब्रूहि वत्स रणोदन्तं मृतः किं रावणो रणे ॥७६॥
नत्वा रामोऽवदत्तात त्वत्प्रसादान्महायुधि ।
रक्षांसि हतवांस्त्वेकः पापो जीवति रावणः ॥७७॥
तच्छराहतसौमित्रिरद्य तेन सुदुःखितः ।
दासोऽगादिह संदिष्टः करुणाकरशम्भुना ॥७८॥
सदयं ब्रूहि दासाय कुत्रास्ति ते सखा प्रियः ।
पिता मे वीक्ष्य तत्पादौ याचे लक्ष्मणजीवितम् ॥७९॥
जटायुराह याहि त्वं पश्चाद्द्वारि मया सह ।
राजर्षिमण्डले यत्र स राजर्षिर्विराजते ॥८०॥
इत्युक्त्वै कैकशो रामो जटायुषा प्रदर्शितः ।
तांस्तान् राज्ञस्तथा देशान् हृष्टः पितरमागमत् ॥८१॥
पित्रा सह सुतं दृष्ट्वा सङ्गतं पक्षिपुङ्गवः ।
प्रत्ययादथ रामश्च तातपादाववन्दत ॥८२॥
बाहुभ्यां सम्परिष्वज्य सिक्तोरस्कोऽश्रुभिः सुतम् ।
राजर्षिराह किं वत्स सम्प्राप्तो दीर्घकालतः ॥८३॥
द्रवत्ययो यथा वह्नितेजसाऽहं तथा तव ।
शोकाग्निना विगलितान् प्राणाच्छरीरतोऽत्यजम् ॥८४॥
मत्कुकर्मफलेन त्वं धार्मिकोऽपि विपद्गतः ।
कैकेयी मत्तमातङ्गी चिच्छेदाऽऽशालतां मम ॥८५॥
शूरो दशरथो ह्येवं विललाप सगद्गदम् ।
तूष्णीं रुरोद तच्छ्रुत्वा धीरो दाशरथिर्भृशम् ॥८६॥
उवाच पितरं रामस्तात दुःखमहार्णवे ।
अधुनाऽहं निमग्नोऽस्मि को मां समुद्धरेदितः ॥८७॥
विदितं सर्वमेवैतत् पितस्ते पादपद्मयोः ।
भाषे तथापि यद्धेतोरद्य दास इहागतः ॥८८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घोरे रणे प्रियो भ्राता हतोऽद्य रावणेन मे ।
न लभेय पुनस्तश्चेत् प्रतियायां न ते शपे ॥८९॥
पुत्रदुःखेन दुःखी स नृपः प्राह प्रियात्मज ।
जाने केन निमित्तेन त्वमद्येह समागमः ॥९०॥
स्वसुखं पृष्ठतः कृत्वा पूजयामि निरन्तरम् ।
धर्मराजमिहाहं ते कल्याणार्थमहर्निशम् ॥९१॥
सुलक्षणं लक्ष्मणं तं नूनं प्राप्स्यसि पुत्रक ।
अद्यापि सन्ति तत्प्राणा देहे कारास्थबन्दिवत् ॥९२॥
गन्धमादनशृङ्गाग्रे विशल्यकरणी लता ।
फलत्योषधिरव्यर्था तया जीवय तेऽनुजम् ॥९३॥
मम पूजास्वतिप्रीतो यमराजः स्वयं सुत ।
उपायमिममव्यर्थमभ्यधान्मां सुरेश्वरः ॥९४॥
दासं हनूमन्तमाशुगात्मजमाशुगम् ।
प्रेरयाऽऽशु भेषजन्तदानेष्यति स सत्वरम् ॥९५॥
हनिष्यसि यथाकालं रावणं त्वं महामृधे ।
वंशस्तस्य भवेल्लुप्तः कल्पान्ताब्धौ यथा जगत् ॥९६॥
रघुलक्ष्मीर्वधूः सीता गृहं प्रोज्ज्वलयिष्यति ।
पुनस्ते सुखभुक्तिश्च भाग्ये नैव घटिष्यते ॥९७॥
गन्धो धूपस्य दग्धस्य हसन्यां पूरयेद् यथा ।
दिशस्तथा सुरभितं तव कीर्त्त्या भवेज्जगत् ॥९८॥
विधात्रा मम पापेन दण्डितस्त्वं गुणार्णवः ।
तव विच्छेदशोकाग्नावहौषं पापविग्रहम् ॥९९॥
अर्द्धं गता निशेदानीं भुवि गच्छाविलम्बितम् ।
आनाययौषधं तूर्णं रात्रौ जीवय लक्ष्मणम् ॥१००॥
रामोऽचेष्टत संस्प्रष्टुं भक्त्या पितृपदाम्बुजम् ।
पुत्रस्य विफलां चेष्टां दृष्ट्वाह सुस्वरं नृपः ॥१०१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वं त्वया ममायं न दृष्टो देहः प्रियात्मज ।
छायेवाप्सु दर्पणे वा लङ्कामाशु प्रतिव्रज ॥१०२॥
प्रणम्य मायासहितो रघूत्तमः
क्षणैरुपातिष्ठत यत्र लक्ष्मणः ।
बभूव चक्राहतिनष्टचेतनः
शुगर्तिदुःखाहतवीरवेष्टितः ॥१०३॥

इति श्रीमेघनादवधे महाकाव्ये प्रेतपुरीदर्शनं नाम
द्वाविंशः सर्गः ॥२२॥

शोकप्रकाशः

व्यतीते सौराग्रहायणस्य द्वादशदिवसे सायं पञ्चमघटिकायां स्वीय-भौतिकशरीरपरित्यागेन परमपदं प्राप्ताः प्रातःस्मरणीयाः पण्डितप्रकाण्डाः महामहोपाध्याया नवद्वीपविबुधरञ्जनीसभाप्रधानसंपादकाः कलकत्ता-राजकीयसंस्कृतमहाविद्यालयस्य भूतपूर्व-स्मृतिमीमांसाविभागप्रधानपण्डिताः कलकत्ता-विश्वविद्यालयस्याप्यामरणमध्यापकपदमलंकृतवन्तः श्रीशितिकण्ठ-वाचस्पतिमहोदयाः संस्कृत-साहित्यपरिषदः सह-सभापतयो जीवातवश्च हठादस्मान् तत्सन्ततिवर्गांश्च किंकर्तव्यतामूढानकुर्वन् स्वीयेनाचिन्तितेन वियोगेन । सर्वथा तु तेषामात्मा शान्तिं निर्वाणपरमां परमात्मसंस्थामधि-गच्छत्विति सविनयमाशंसामहे ।

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्ममीमांसा

(पूर्वानुवृत्तिः)

[निबन्धकः श्रीगोपालकृष्ण-वेदान्ताचार्यः]

रणमरणस्यार्थवादिकप्रशंसामप्याह स एव। यथा—

जितेन लभते लक्ष्मीं मृतेनापि सुराङ्गनाः।
क्षणविध्वंसिकेऽमुष्मिन का चिन्ता मरणे रणे॥
यस्य छेदक्षतं गात्रं शरशक्त्यृष्टिमुद्गरैः।
देवकन्यास्तु तं वीरं गायन्ति च रमन्ति च॥
वराङ्गणासहस्राणि शूरमायोधने हतम्।
नागकन्याश्च धावन्ति मम भर्ता भवेदिति॥

यं यज्ञसंघैस्तपसा च विद्यया स्वर्गैषिणो वात्र यथैव विप्राः।
तथैव यान्त्येव हि तत्र वीराः प्राणान् सुयुद्धेन परित्यजन्तः॥ इत्यादि।

ननु "यजेत् यज्ञान यथाविधि" इत्यादिभिर्वाक्यैर्हारितादिभी राज्ञां यज्ञानुष्ठानमुक्तम्, व्यवहारादिदर्शनपराणां युद्धादिव्यापृतानाञ्च तेषां यथाकालविधेयं यज्ञाद्यनुष्ठानं कथं सम्भवति इति चेत्, न; यतो गृह्यादिकर्म-परिचारणाय क्षत्रियः पुरोहितं वरीत्वा तेनैव तत् सम्पादयेत्। तथाचाह विष्णुः—वेदेतिहासधर्मशास्त्रकुशलं कुलीनमव्यङ्गं तपस्विनं पुरोहितञ्च वरयेत। इति। मनुरपि—

पुरोहितञ्च कुर्वीत वृणुयादेव चर्त्विजम्।
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च॥ इति।

अत्र तु क्षत्रियाणां पुरोहितवरणं सप्रयोजनत्वादवश्यकर्तव्यतया निर्दिष्टम्। क्षत्रियस्यात्रोपलक्षणतया वैश्यस्यापि प्रयोजनसत्त्वे पुरोहितो वरणीयः। स्वकर्मनिष्ठानां ब्राह्मणानां तु स्वयं सम्पाद्ये कर्मणि कदापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरोहितवरणं न विहितं शास्त्रे। बहुजनसम्पाद्ये यागादौ तु तैरपि पुरोहिता ऋत्विजश्च वरणीया एव।

आत्म-स्त्री-पुत्र-भृत्यादिपोषणाय यजनादिधर्मानुष्ठानाय च राज्ञां करादान-विधिमाह विष्णुः—"प्रजाभ्यो बल्यर्थं संवत्सरेण धान्यतः षष्ठमंशमादद्यात। सर्वस्सयेभ्यश्च। द्विकं शतं पशुहिरण्येभ्यो वस्त्रेभ्यश्चे"त्यादि। द्विकं शत-मिति॥ प्रतिशतं भागद्वयमित्यर्थः। मनुरपि—

पञ्चाशद्भाग आदेयो राज्ञा पशु-हिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा॥ इत्यादि।

अष्टम-षष्ठेत्यादिको यो बह्वल्पग्रहणविकल्पः, स भूम्युत्कर्षापकर्षापेक्षया कर्षणादिलाघवगौरवापेक्षया चेति बोद्धव्यः। साधारणस्तु षड्भाग एव ग्राह्यः। तथाच हारितेनाप्युक्तम्—

दद्याद्दानं द्विजातिभ्यो धर्मबुद्धिसमन्वितः।
स्वभार्यानिरतो नित्यं षड्भागार्हः सदा नृपः॥ इति।

यथा प्रजाः करपीडिता न भवन्ति, तथा राज्ञा द्रष्टव्यमित्याह मनुः। यथा—

यथा फलेन युज्येत राजा कर्ता च कर्मणाम्।
तथाऽवेक्ष्य नृपो राष्ट्रे कल्पयेत सततं करान्॥ इति।

एकदाऽधिककरग्रहणञ्च निषेधति। यथा—

यथाऽल्पाल्पमदन्त्याद्यं वार्योको-वत्स-षट्पदाः।
तथाऽल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः॥ इति।

वार्योका जलौकाः। आद्यम्। भक्ष्यमित्यर्थः। पराशरोऽप्याह—

पुष्पं पुष्पं विचिनुयान्मूलच्छेदं न कारयेत्।
मालाकार इवोद्याने न यथाऽङ्गारकारकः॥ इति।

अङ्गारकारकः॥ दग्धकारीत्यर्थः। ब्राह्मणेभ्यः करादानं निषेधति विष्णुः—"ब्राह्मणेभ्यः करादानं न कुर्यात। ते हि राज्ञो धर्मकरदाः" इति। मनुरपि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पयित्वाऽस्य वृत्तिञ्च रक्षेदेवं समन्ततः ।
राजा हि धर्मषड्भागं तस्मात् प्राप्नोति रक्षितात् ॥

तस्येति ॥ ब्राह्मणस्य । प्रजा अरक्षतो राज्ञः करादाने तस्य नरकप्राप्ति-माह मनुः—

योऽरक्षन् बलिमादत्ते करं शुल्कञ्च पार्थिवः ।
प्रतिभागञ्च दण्डञ्च स सद्यो नरकं व्रजेत् ॥
अरक्षितारं राजानं बलिषड्भागहारिणम् ।
तमाहुः सर्वलोकस्य समग्रमलहारकम् ॥ इति ।

राजा धर्मानुष्ठानपराणां प्रजानां धर्मषड्भागमाप्नोति, पापिनाञ्च पापषड्भागम्, इत्यतः स दुष्टान् दमयेत, सुकृतञ्च पालयेत । यदाह विष्णुः— 'राजा प्रजाभ्यः सुकृत-दुष्कृतषष्ठांशभागि"ति । मनुरप्याह—

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः ।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ॥
यदधीते यद् यजते यद्ददाति यदर्चति ।
तस्य षड्भागभाग् राजा सम्यग् भवति रक्षणात् ॥ इति ।

ननु "पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोरि"त्यादिवाक्यैर्मनुना राज्ञः करग्रहणविधिरुक्तः । तेन च तस्य जीविकादयः सम्भवन्ति । साधारण-क्षत्रियाणान्तु वृत्तिः क्षितित्राणमिति यदुक्तम्, तेन कथं तेषां स्वजीविकोप-योगी धनसंग्रहः स्यादिति चेत्, अत्रोच्यते—

द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ।
तथा ग्रामशतानाञ्च कुर्याद्राष्ट्रस्य संग्रहः ॥

इत्याद्युपक्रम्य राज्ञो ग्रामगुल्माद्यधिपतिनियोगं निर्दिश्य,

नगरे नगरे चैकं कुर्यात् सर्वार्थचिन्तकम् ।
उच्चैः स्थानं घोररूपं नक्षत्राणामिव ग्रहम् ॥

इत्यादिवाक्यैश्च नगराधिपत्यादिनियोगो मनुनोपदिष्टः । ते तु ग्रामाधि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्यादयः क्षत्रिया एव भवेयुः, शासनादिकर्तृत्वात् तेषाम्। तेषां वृत्ति-रपि मनुनैव निर्दिष्टा। तद् यथा—

यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्॥ इति।

एवं नगराधिपतिगुल्माधिपतीनां त्तिरपि निर्दिष्टा। एतेन प्रजाभी राज्ञे दैनिकदेयं ग्रामाधिपत्यादयः प्राप्नुवन्ति, वार्षिकदेयन्तु स्वयं राजा इति विवेक्तव्यम्। ये तु सेनापतिसैनिकादयस्तेषां वेतनादिवृत्तिरपि राज्ञैव निर्धार्य प्रदेया। यथाह मनुः—

राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च।
प्रत्यहं कल्पयेद् वृत्तिं स्थानकर्मानुरूपतः॥
पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम्।
षाण्मासिकस्तु आच्छादो धान्यद्रोणस्तु मासिकः॥ इति।

अवकृष्टस्य॥ दासादेः। उत्कृष्टस्य॥ राष्ट्ररक्षकसैनिकादेरित्यर्थः। अवकृष्टापेक्षयोत्कृष्टस्य वेतनादिकं षड्गुणेनाधिकमिति वचनार्थः। युद्धजित-द्रव्याण्यपि सैनिकादिभिरेव प्राप्याणि। यदाह मनुः—

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः।
सर्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत्॥ इत्यादि।

न च "सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेदि"त्यादिना मनुना सेवा निषिद्धा, तत् कथं तेषां राज्ञो वेतनग्रहणं न दोषावहमिति वाच्यम्, मनुना निकृष्टकर्माभिप्रायेणैव सेवा निषिध्यते, उत्कृष्टा तु सा न निषिद्धा। तथाच मेधातिथिनाऽपि तद्वचनभाष्ये उक्तम् "सेवा प्रेष्यत्वं यत्र कुत्रचित् कर्मणि प्रेष्यते उचितेऽनुचिते वा स सेवकः। अत उत्कृष्टेनाऽऽयुधादिकर्मादिना ये राजान-मुपसर्पन्ति, ते न श्ववृत्तयः" इति। अथवा ब्राह्मणवृत्तिप्रकरणत्वाद् ब्राह्मणस्यैव सेवा निषिद्धा मनुना, न तु क्षत्रियादीनाम्। तथा चोपक्रमे—

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि॥ इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः प्रकरणमिदं विप्रेतिपदेन ब्राह्मणविषयकमेवेति तस्यैव सेवा निषिद्धा। कृतत्रेतादियुगानां राज्ञश्चेष्टितविशेषेणैवोत्पत्तिर्भवति—न तु ते कालपौर्वापर्यजनितास्तद्धर्मा वा इत्येतदाह मनुर्यथा—

कृतं त्रेतायुगञ्चैव द्वापरं कलिरेव च।
राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते॥
कलिः प्रसुप्तो भवति स जाग्रद् द्वापरं युगम्।
कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम्॥ इति

नृपाणां पञ्चयज्ञानाहात्रिर्यथा—

दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोषस्य च सम्प्रवृद्धिः।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम्॥ इति।

कलौ तु म्लेच्छादिभिरधिकृत आर्यावर्ते क्षत्रियाणां रक्षकत्वाभावात् कृषिमेव तेषां वृत्तित्वेन निर्दिशति पराशरः, कलियुगस्य सर्वथैवापत्कल्पकत्वात्। तथाच—

क्षत्रियोऽपि कृषिं कृत्वा द्विजान् देवांश्च पूजयेत्।
वैश्यः शूद्रः सदा कुर्यात् कृषिवाणिज्यशिल्पकान्॥ इति।

मन्वादिभिर्यत् कृषिकर्मणः पापजनकत्वमुक्तम्, तत् कलौ नास्तीति मन्तव्यम्; तत्तच्छास्त्रविहितस्वस्वजात्यनुरूपकृत्यर्जनासम्भवात्। अत ए कृषिकर्मजनितपापक्षयार्थं पराशरेण तदपवादोऽप्युक्तः। तद्यथा—

राज्ञे दत्त्वा तु षड्भागं देवानाञ्चैकविंशकम्।
विप्राणां त्रिंशकं भागं कृषिकर्ता न लिप्यते॥ इति।

एतत् तु ब्राह्मणादिवर्णचतुष्टयसाधारणम्। न च विप्रेभ्यो राज्ञः करग्रहणनिषेधात् कथं विप्रैः करो देय इति वाच्यम्, यतो ब्राह्मणाश्चेद् याजनाध्यापनप्रतिग्रहरूपां साधारणवृत्तिमनुवर्तयन्ति तत्रैव तेभ्यः करादाननिषेधः, कलौ तु तेषां कृष्यादिविशिष्टवृत्त्यवलम्बनान्न तदादानं राज्ञो दोषाय भवति। अत एव पराशरेणापि कृषिकर्तृभ्यः सर्ववर्णेभ्य एव राज्ञः करादानं विहितमिति। कैश्चित् तु—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥

इति मनुवचनात्, तथा "महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवाखिलक्षत्रियान्तकारी भविता। ततः प्रभृति शूद्रा भूपा भविष्यन्ती"ति विष्णुपुराणवाक्याच्च कलाविदानीन्तनक्षत्रियाणां शूद्रत्वमुच्यते, तन्न सुचिन्तितः सिद्धान्तः। यतः "शनकैस्तु क्रियालोपादि" त्यादि मनुवचने "इमाः क्षत्रियजातयः" इत्यत्र इदंशब्देन परामृष्टानां येषां वृषलत्वमुक्तम्, परवचन एव तान् नामतो निर्दिशति। यथा—

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥ इति।

विष्णुपुराणवाक्येऽपि क्षत्रियभूपानामेवाभाव उच्यते, न तु क्षत्रियजातेः शूद्रत्वमपि। न चाखिलक्षत्रियान्तकारीतिपदेन सकलक्षत्रियाणां विनाशोऽभिप्रेतः; अखिलपदस्य बहुसंख्यकत्वे सङ्कोचात्। कथमन्यथा परशुरामेण निःशेषितेऽखिलक्षत्रियकुले तेषां पुनरुद्भवः स्यात्। तेन च क्षत्रियाणां कलौ भूपत्वाभावेऽपि शूद्रत्वप्राप्तिं प्रति कारणं नानुभवामः।

नृपतिरिन्द्रार्कवायुयमवरुणचन्द्राग्निधराणामष्टानां देवतानां कार्यानुरूपव्यवहारमनुष्ठाय तत्तद्देवताव्रतमाचरेत्। तदाह मनुः, यथा—

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च।
चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ॥ इति।

तद्विशेषमाह, यथा—

वार्षिकांश्चतुरो मासान् यथेन्द्रोऽभिप्रवर्षति।
तथाऽभिवर्षेत् स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ॥ इति।

नात्र प्रकरणे मासनियमोऽभिप्रेतः। तेन च यथेन्द्रश्चतुर्षु मासेषु सन्ततवर्षी भवति, तथा राजा सर्वकालमेव राष्ट्रं कामैर्वाञ्छितार्थप्रदानैर्वर्षेदित्यर्थः।

अष्टौ मासान् यथादित्यस्तोकं हरति रश्मिभिः।
तथाहरेत् करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रापि मासनियमो नास्ति ।

प्रविश्य सर्वभूतानि यथा चरति मारुतः ।
तथाचारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ॥

मरणकाले यथा यमः प्रियाप्रियौ तुल्यमेव नियमयति, तथा राज्ञाऽपि अपराधकाले रागद्वेषादिपरिहारेण प्रजा दण्डनीया इत्यर्थः ।

वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते ।
तथा पापान्निगृह्णीयाद् व्रतमेतद्धि वारुणम् ॥

यथा वरुणपाशैर्बन्धनयोग्योऽपराधी तेन बद्ध एव सर्वैर्दृश्यते, एवं राजाऽप्यपराधिनं बद्ध्वा सर्वसमक्षं शासयेदित्यर्थः ।

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः ।
तथा प्रकृतयो यस्मिन् स चान्द्रव्रतको नृपः ॥

प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्मसु ।
दुष्टसामन्तहिंस्रश्च तदाग्नेयव्रतं स्मृतम् ॥
यथा सर्वाणि भूतानि धरा धारयते समम् ।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥ इति

बहुगुणोपेता अपि क्षत्रिया ब्राह्मणैर्न नमस्याः । तथा चाहोशनाः—

नाभिवाद्यास्तु विप्राणां क्षत्रियाद्याः कथञ्चन ।
ज्ञान-कर्म-गुणोपेता यद्यप्येते बहुश्रुताः ॥ इति ।

विष्णुरप्याह—

ब्राह्मणं दशवर्षञ्च शतवर्षञ्च भूमिपम् ।
पितापुत्रौ विजानीयाद् ब्राह्मणस्तु तयोः पिता ॥ इति ।

हेतुमप्यत्राह मनुः—

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् ।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरमपि—

वैशेष्यात् प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥ इति ।

ब्राह्मणानां स्वस्वजातिष्वपि वयआधिक्यमात्रेणैव यो ज्येष्ठत्व-नमस्कार्यत्वादिव्यवहारः, सोऽप्यपव्यवहार एव । शास्त्रे तन्निषेधात् । तथाच मनु-विष्णू—

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥ इति ।

विष्णुर्विशेषेणाह—

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मानस्थानानि गरीयो यद्यदुत्तरम् ॥ इति ।

इममेवार्थं मनुर्द्वितीयेऽध्यायेऽर्थवादेनाङ्गिरःपुत्रस्योपाख्यानादुक्तवान् । तद्यथा—

अध्यापयामास पितॄञ्छिशुराङ्गिरसः कविः ।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥
ते तमर्थमपृच्छन्त देवानागतमन्यवः ।
देवाश्चैतान् समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥
अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ इति

यत्तु मनुनोक्तम्—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥ इति

तज्ज्ञानिवृद्धविषयमिति । ज्ञाने रहितं वृद्धन्तु केवलमहमिति उक्त्वा वाचनिकं नमस्कारं कुर्यात्, स्वनाम न कीर्तयेत् । तथाच मनुः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥
नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥

प्रत्यभिवादनहीनस्य नमस्कार्यत्वमपि निषेधति । यथा—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ इति ।

स्त्रियोऽपि ज्ञानविरहिता मातृष्वस्रादयोऽपवादविधानान्नमस्कार्या एव । यथा—

मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ।
संपूज्या गुरुपत्नीवत् समास्ता गुरुभार्यया ॥ इत्यादि ।

वस्तुतस्तु यथा यवीयसो मातुलादयो वाचनिकेन नमस्कारेण नमस्कार्याः, तथा ज्ञानरहिता वृद्धाः पुमांसो मातृष्वस्रादिभिन्नाः स्त्रियश्चेति । यथा तत्रैव—

मातुलांश्च पितृव्यांश्च श्वशुरान् ऋत्विजो गुरून् ।
असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥ इति ।

विस्तरस्तु मेधातिथिभाष्यादौ द्रष्टव्य इति संक्षेपेणोक्तः क्षत्रिय-धर्मः ॥

अथ वैश्यधर्मः । तथाच विष्णुः—"वैश्यस्य पशुपालनमि"ति । यथा क्षत्रियाणां प्रजापालनं विशिष्टो धर्मस्तथा वैश्यस्य पशुरक्षणमिति तात्पर्यम् । तथाचाह मनुः—

प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन ॥ इति ।

न च—"दानमध्ययनं वापि यजनञ्चेति वै विशः" इत्यत्रिवचनाद् दानादिकमेव वैश्यानां धर्मत्वेन निर्दिष्टम्, तत् कथं विष्णुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशुपालनमेव वैश्यधर्म इत्युक्तमिति वाच्यम्, यतोऽत्रिणा दानादिकं त्रैवर्णिक-साधारणधर्म उक्तः, विष्णुना तु विशिष्टो धर्म इति। मनुस्त्वेतत्त स्पष्टत एवाह। तद् यथा—

वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम।
वार्तायां नित्ययुक्तः स्यात पशूनाञ्चैव रक्षणे ॥ इति।

अत्र पशुरक्षणस्य वार्तात्वेऽपि यत पृथगुपादानम्, तद् वैश्यानां पशु-रक्षणस्य जोविकात्वं विशिष्टधर्मत्वञ्चेत्युभयविधत्वज्ञापनार्थम्। एषां वृत्तिमाह विष्णुः—

कृषि-गोरक्षा-वाणिज्य-कुसोद-योनिपोषणानि वैश्यस्येति।

योनिपोषणञ्च धान्यादिवीजरक्षणम्। अत्रापि पशुपालनस्य धर्मत्वमुक्त्वा यत पुनर्गोरक्षणस्य वृत्तित्वमाह, तत् पशुपालनस्य वृत्तित्वं धर्मत्वञ्च वैश्यानां प्रतिपादयति। अत्र गोरक्षापदं पशुपालनोपलक्षकम्; मनुवचनेनैकवाक्यत्वात। मेधातिथिनाऽप्युक्तम्—"पशुरक्षणं वैश्यस्य न केवलं जीविकार्थं, यावद्धर्माय प्रीतिं दर्शयती"ति। पराशर एषां वृत्तिमाह—

लोहकर्म तथा रत्नं गवाञ्च प्रतिपालनम्।
वाणिज्यं कृषिकर्माणि वैश्यवृत्तिरुदाहृता ॥ इति।

शङ्खोऽप्याह—

कृषि-गोरक्षावाणिज्यं वैश्यस्य परिकीर्तितम्। इति।

हारीतस्तु वैश्यानां वृत्तिं निर्दिश्य धर्मानुष्ठानप्रकारञ्च विशेषेणाह, यथा—

गोरक्षां कृषिवाणिज्यं कुर्याद् वैश्यो यथाविधि।
दानं देयं यथाशक्त्या ब्राह्मणानाञ्च भोजनम् ॥
दम्भमोहविनिर्मुक्तस्तथा वागनसूयकः।
स्वदारनिरतो दान्तः परदारविवर्जितः ॥

(क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिलिन्दप्रश्नः

[निबन्धकः—म० म० भट्टाचार्य-श्रीविधुशेखरशास्त्री]

प्रसिद्धो बौद्धमागध्यां मिलिन्द-नागसेनयोः ।
संवादो यः स तस्यैतत् स्तोकं किञ्चित्समर्प्यते ॥

प्रव्रज्या

राजाह । 'किमर्थाय, भदन्त नागसेन,* युष्माकं प्रव्रज्या । कश्च युष्माकं परमार्थः' ।

स्थविर आह । 'किमिति महाराज, इदं दुःखं निरुध्येत अन्यच्च दुःखं नोत्पद्येत्येतदर्था, महाराज, अस्माकं प्रव्रज्या । अनुपादाय परिनिर्वाणं खलु पुनरस्माकं परमार्थः' ।

'किं पुनः, भदन्त नागसेन, सर्वे एतदर्थाय प्रव्रजन्ति' ।

'नहि, महाराज, केचिदेतदर्थाय प्रव्रजन्ति; केचिद् राजभीता प्रव्रजन्ति; केचिच्चोरभीताः प्रप्रजन्ति; केचिद् रणार्ताः प्रव्रजन्ति; केचिदाजीविकार्थाय प्रव्रजन्ति; ये पुनः सम्यक् प्रव्रजन्ति, ते एतदर्थाय प्रव्रजन्ति' ।

'त्वं पुनः, भदन्त, एतदर्थाय प्रव्रजितोऽसि' ।

'अहं खलु, महाराज, दहरकः सन् प्रव्रजितः । न जानामि अस्मै नामार्थाय प्रव्रजामीति । अपि च खल्वेवं मेऽभूत् पण्डिता इमे श्रमणाः शाक्यपुत्रीयाः, ते मां शिक्षयिष्यन्तीति । सोऽहं तैः शिक्षितो जानामि च पश्यामि च अस्मै नामार्थाय प्रव्रज्या' ।

'कल्योऽसि, भदन्त नागसेन' ।

पुनर्जन्म

राजाह । 'भदन्त नागसेन, अस्ति कश्चिन्मृतो न प्रतिसन्दधाति (पुनर्जन्म गृह्णाति)' ।

---

* संबोधनचिह्नम् ! इति प्राचीनारीतिरिदानीन्तनैराङ्ग्लैर्न साधु मन्यते, अतः चिह्नमेव, संबोधनस्थानेऽपि नूतनाङ्ग्लरीत्यनुसारेण देयमिति प्रकृतनिबन्धका अस्मात्स्वविधे सूचयन्ति स्म !!!! (सं०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थविर आह । 'कश्चित्प्रतिसन्दधाति कश्चिन्न प्रतिसन्दधाति'।

'कः प्रतिसन्दधाति ? को न प्रतिसन्दधाति' ?

'सक्लेशो* महाराज, प्रतिसन्दधाति, निष्क्लेशो न प्रतिसन्दधाति' ॥

'त्वं पुनः, भंदन्त प्रतिसन्धास्यती'।

'तच्चेन्महाराज, सोपादानो (उपादानं दृढासक्तिः) भविष्यामि, प्रतिसन्धास्यामि, तच्चेदनुपादानो भविष्यामि, न प्रतिसन्धास्यामि'।

'किं न सर्वे समानाः ?'

राजाह । 'भदन्त नागसेन, केन कारणेन मनुष्या न सर्वे समकाः। अन्येऽल्पायुष्का अन्ये दीर्घायुष्काः, अन्ये बह्वाबाधा अन्ये अल्पाबाधाः, अन्ये दुर्वर्णा अन्ये वर्णवन्तः, अन्येऽल्पेशाख्या अन्ये महेशाख्याः, अन्येऽल्पभोगा अन्ये महाभोगाः, अन्ये नीचकुलीना अन्ये महाकुलीनाः। अन्ये दुष्प्रज्ञा अन्ये प्रज्ञावन्तः।'

स्थविर आह । 'कस्मात् पुनः, महाराज, वृक्षाः सर्वे न समकाः। अन्येऽम्लाः, अन्ये लवणाः, अन्ये तिक्तकाः, अन्ये कटुकाः, अन्ये कषायाः, अन्ये मधुराः।'

'मन्ये, भदन्त, बीजानां नानाकरणेन।'

'एवमेव खलु, महाराज, कर्मणां नानाकरणेन मनुष्या न सर्वे समकाः। अन्येऽल्पायुष्काः अन्ये दीर्घायुष्काः, अन्ये बह्वाबाधा अन्ये अल्पाबाधाः, अन्ये दुष्प्रज्ञा अन्ये प्रज्ञावन्तः। भाषितमप्येतत्, महाराज, भगवता— कर्मस्वकाः, माणव, सत्त्वाः कर्मदायादाः कर्मयोनयः कर्मबन्धवः कर्मप्रतिसरणाः। कर्म सत्त्वान् विभजति यदिदं हीनप्रणीततया।'

'कल्योऽसि, भदन्त नागसेन।'

———

* क्लेशो रागद्वेष मोहरूपः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनागतं दुःखम्

राजाह। 'भदन्त नागसेन, यूयं भणथ—किमिति इदं दुःखं निरुध्येत अन्यच्च दुःखं नोत्पद्येतेत्येतदर्था महाराजास्माकं प्रव्रज्येति। किं पूर्वमेव व्यायामेन ? ननु सम्प्राप्ते काले व्यायमनीयम्।'

स्थविर आह। 'सम्प्राप्ते काले महाराज, व्यायामोऽकृत्यकरो भवति।'

'औपम्यं कुरु।'

'तत् किं मन्यसे, महाराज, यदा त्वं पिपासितो भवेस्तदा त्वमुदपानं खानयेस्तडागं खानयेः ? पानीयं पास्यामि।'

'न हि भदन्त।'

'एवमेव खलु, महाराज, सम्प्राप्ते काले व्यायामोऽकृत्यकरो भवति, पूर्वमेव व्यायामः कृत्यकरो भवति।'

'भूय औपम्यं कुरु'।

'तत्किं मन्यसे, महाराज, यदा त्वं बुभुक्षितो भवेस्तदा त्वं क्षेत्रं कर्षयेः ? शालिं रोपयेः ? धान्यमतिहारयेः ? भक्तं भुंक्ष्ये।'

'न हि भदन्त।'

'एवमेव खलु, महाराज, सम्प्राप्ते काले व्यायामोऽकृत्यकरो भवति, पूर्वमेव व्यायामः कृत्यकरो भवति।'

'भूय औपम्यं कुरु।'

'तत्किं मन्यसे, महाराज, यदा ते संग्रामः प्रत्युपस्थितो भवेत्तदा त्वं परिखां खानयेः ? प्राकारं कारयेः ? गोपुरं कारयेः ? अट्टालकं कारयेः ? धान्यमतिहारयेः ? तदा त्वं हस्तिनि शिक्षेथाः ? अश्वे शिक्षेथाः ? रथे धनुषि त्सरौ शिक्षेथाः ?'

'न हि भदन्त।'

'एवमेव, महाराज, सम्प्राप्ते काले व्यायामोऽकृत्यकरो भवति, पूर्वमेव व्यायामः कृत्यकरो भवति।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैरयिकोऽग्निः

राजाह। 'भदन्त नागसेन, यूयं भणथ—प्राकृतिकादग्नेर्नैरयिकोऽग्निर्महाभितापतरो भवति। क्षुद्रकोऽपि पाषाणः प्राकृतिकेऽग्नौ प्रक्षिप्तो दिवसमपि ध्मायमानो न विलयं गच्छति। कूटागारमात्रोऽपि पाषाणो नैरयिकेऽग्नौ प्रक्षिप्तः क्षणेन विलयं गच्छत्येतस्मिन् वचने न श्रद्दधामि। एवं च पुनर्वदथ—ये च तत्रोत्पन्नाः सत्त्वास्तेऽनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्तीति तस्मिन्नपि वचने न श्रद्दधामि।'

स्थविर आह। 'तत् किं मन्यसे, महाराज, यास्ताः सन्ति मकर्योऽपि शिशुमार्योऽपि कच्छप्योऽपि मयूर्योऽपि कपोत्योऽपि, किं नु ताः कक्खटानि पाषाणशकलानि शर्कराश्च खादन्ति।'

'आं भदन्त, खादन्ति।'

'किं पुनस्तानि नासां कुक्षौ कोष्ठाभ्यन्तरगतानि विलयं गच्छन्ति।'

'आं भदन्त, विलयं गच्छन्ति।'

'यः पुनस्तासां कुक्षौ गर्भः सोऽपि गच्छति।'

'न हि भदन्त।'

'केन कारणेन।'

'मन्ये, भदन्त, कर्माधिकारेण।'

'एवमेव खलु, महाराज, कर्माधिकारेण नैरयिकाः सत्त्वा अनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्ति [तत्रैव जायन्ते तत्रैव वर्धन्ते तत्रैव म्रियन्ते]। भाषितमप्येतत्, महाराज, भगवता—स न तावत्कालं करोति (=म्रियते) यावन्न पापं कर्म व्यक्तीभवति।'

'भूय औपम्यं कुरु'।

'तत् किं मन्यसे, महाराज, यास्ताः सन्ति सिंह्योऽपि व्याघ्र्योऽपि द्वीपिन्योऽपि कुक्कुर्योऽपि, किं नु ताः कक्खलान्यस्थिकानि मांसानि खादन्ति।'

'आं भदन्त, खादन्ति।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080539

'किं पुनस्तानि तासां कुक्षौ कोष्ठाभ्यन्तरगतानि विलयं गच्छन्ति।'

'आं भदन्त, गच्छन्ति।'

'यः पुनस्तासां कुक्षौ गर्भः, सोऽपि विलयं गच्छति।'

'न हि भदन्त।'

'केन कारणेन।'

'मन्ये, भदन्त, कर्माधिकारेण न विलयं गच्छति।'

एवमेव खलु, महाराज, कर्माधिकारेण नैरयिकाः सत्त्वा अनेकान्यपि वर्षसहस्राणि निरये पच्यमाना अपि न विलयं गच्छन्ति।'

'भूय औपम्यं कुरु।'

'तत् किं मन्यसे, महाराज, यास्ताः सन्ति यवनकसुकुमार्योऽपि क्षत्रिय-सुकुमार्योऽपि ब्राह्मणसुकुमार्योऽपि गृहपतिसुकुमार्योऽपि किं नु ताः कक्खलानि खाद्यकानि मांसानि खादन्ति।'

आं भदन्त, खादन्ति।'

'किं पुनस्तानि तासां कुक्षौ कोष्ठाभ्यन्तरगतानि विलयं गच्छन्ति।'

'आं भदन्त, विलयं गच्छन्ति।'

'यः पुनस्तासां कुक्षौ गर्भः, सोऽपि विलयं गच्छति।'

'न हि भदन्त।'

'केन कारणेन।'

'मन्ये भदन्त, कर्माधिकारेण।'

'एवमेव खलु, महाराज, कर्माधिकारेण नैरयिकाः सत्त्वा अनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्ति। [तत्रैव जायन्ते तत्रैव वर्धन्ते तत्रैव म्रियन्ते]।' भाषितमप्येतत्, महाराज, भगवता—स न तावत् कालं करोति, यावन्न पापं कर्म व्यक्तीभवतीति।

'कल्योऽसि भदन्त नागसेन।'

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat.

Executive Committee for 1936-37.

President.

Mahamahopadhyaya Durgacharan Sankhya-Vedantatirtha.

Vice-Presidents.

Mahamahopadhyaya Anantakrishna Sastri.
,, Phanibhushan Tarkavagish
Dr. Adityanath Mukherjee, M. A., Ph. D.
Pandit Dwarikanath Nyayasastri.
,, Sitanath Siddhantavagish.
Raja Bhupendranarayan Singh Bahadur.

Secretaries.

Dr. Amareswar Thakur, Vedantashastri, M. A., Ph. D.
Sj. Jatindra Nath Basu, M. A., M. L. A.

Assistant Secretaries

Pandit Dinabandhu Sahityashastri.
,, Rasamay Chatterjee, M.A.
,, Ramkrishna Chakravartty, M. A.
,, Ashokanath Bhattacharjee, M.A, P.R.S., Vedantatirtha.

Members.

Pandit Jagadish Chandra Vedavyas.
,, Jaganmohan Jyotirvinode.
,, Bamapada Vidyaratna.
,, Dakshinacharan Bhattacharjee, M. A.
,, Janakinath Sahityashastri.
,, Kalipada Tarkacharyya.
,, Bamacharan Kavyatirtha.
,, Chintaharan Chakravartty, M. A., Kavyatirtha.
,, Jogendramohan Vidyaratna.
,, Dakshinacharan Bhattacharjee.
Sj. Kasinath Bhattacharjee, B. Sc. (Engr.)
Dr. Bhupendranath Basu, M.B.
Sj. Rajendra Narain Banerjee, B. L.
Pandit Chintamani Sahityacharyya.
,, Vanamali Vedantatirtha, M. A.
Sj. Kshitish Chandra Chakravartty, M. A., B. L.
Pandit Durgamohan Kavya-Sankhya-Puranatirtha, M.A.
,, Kalipada Vyakaranatirtha.
,, Kshitish Chandra Chatterjee, M. A.
Dr. Suniti Kumar Chatterjee, M. A., D. Lit.
Sj. Bhupati Roy Chowdhury, Kavyatirtha.
Sj. Brajendrakishore Bhattacharjee.
Pandit Upendramohan Sankhyatirtha.
,, Chandicharan Tarkatirtha.
Dr. Upendranath Ghoshal, M. A., Ph. D.
Sj. Ramaprasad Mukherjee, M. A., B. L.
,, Damodardas Khanna.
Kaviraj Bimalananda Tarkatirtha
Sj. Prabodh Chandra De, I.C.S., Siddhantasindhu.
Sj. Prabodh Kumar Das, M.A., B.L.
Pandit Gaurinath Bhattacharjee, M. A., P. R. S.
Dr. Prabodh Chandra Bagchi, M. A., D. Lit.
Pandit Taranath Nyaya-Tarkatirtha.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

সুলভে পুস্তক বিক্রয়

কোনও পুস্তক-বিক্রেতার নিকট হইতে পরিষৎ কয়েক কপি নিম্নলিখিত পুস্তক পাইয়াছেন, পুস্তকগুলি শীঘ্র বিক্রী করিয়া ফেলার জন্য সর্ব্বসাধারণকে আগামী ৩০শে ফাল্গুন পর্য্যন্ত শতকরা ২৫৲ টাকা হারে কমিশন দেওয়া হইবে। পুস্তকগুলি বোর্ড বাঁধান।

সাংখ্যদর্শনের আদ্য পরীক্ষায় পাঠ্য—

যোগসূত্রবৃত্তি—

(মণিপ্রভা টীকা, হিন্দী ও বঙ্গভাষানুবাদ, সূত্রপাঠ ও সূত্রানুক্রমণিকা সহিত) মূল্য—১৷৷০ স্থলে ১৵০

কাব্যের মধ্য পরীক্ষায় পাঠ্য—

কিরাতার্জ্জুনীয়ম্—

(মূল, অন্বয়, বাচ্যান্তর, অনুক্তালঙ্কার-নির্দ্দেশ, মল্লিনাথটীকা, হিন্দী ও বঙ্গভাষানুবাদ, বিস্তৃত সমালোচনা ও গ্রন্থকার-জীবনকথা সহ) মূল্য—৩৷০ স্থলে ২৷৵০

পুস্তক-প্রাপ্তির ঠিকানা—

সংস্কৃত-সাহিত্য-পরিষৎ

১৭, আর. জি. কর রোড, শ্যামবাজার,

কলিকাতা।

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

C... ied
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri